BIBLIOTHECA BUDDHICA. XXI.

SPHUṬĀRTHĀ

ABHIDHARMAKOÇAVYĀKHYĀ

THE WORK OF

YAÇOMITRA.

FIRST KOÇASTHĀNA.

EDITED BY

Prof. S. Lévi and Prof. Th. Stcherbatsky.

ПЕТРОГРАДЪ, 1918.

ПРОДАЕТСЯ ВЪ КНИЖНОМЪ СКЛАДѢ РОССІЙСКОЙ АКАДЕМІИ НАУКЪ И У ЕЯ КОМИССІОНЕРОВЪ:

И. И. Глазунова и К. Л. Риккера въ Петроградѣ; Н. П. Карбасникова въ Петроградѣ, Москвѣ; Н. Я. Оглоблина въ Петроградѣ и Кіевѣ; Люзакъ и Комп. въ Лондонѣ.

Цѣна: 3 р. = 3 rbl.

Напечатано по распоряженію Россійской Академіи Наукъ.

Апрѣль 1918 г. Непремѣнный Секретарь академикъ *С. Ольденбургъ.*

Introduction.

The plan of undertaking this edition as part of a series connected with the elucidation of the Abhidharmakoça was conceived in 1912 at Paris on my return from a visit to India. During my stay at Calcutta and Darjeeling after the rains of 1911 I had the good luck of meeting Dr. Denison Ross, at that time director of the Medresse College at Calcutta and enjoyed the pleasure of his company and the honour of becoming friend to this energetic promotor in many a field of oriental research. Dr. Denison Ross was busy in deciphering new bits of Uighur Mss. sent over to Calcutta from Chinese Turkestan when the news reached him that Sir Aurel Stein had discovered in Turkestan and brought over to London an Uighur Ms. containing a complete work of considerable extent which, after examination, proved to be Uighur version of the Abhidharmakoça. The fact of this most abstruse and difficult work, which till then had resisted all endeavours of European elucidation at the hands of the greatest scholars beginning with E. Burnouf and others, — the fact of this work having been translated into Uighur could not but make an impression. It called for attention on the part of those scholars who devoted their labours to the discoveries in Turkestan, as well as on the part of those who were interested in the scientific litterature of the Northern Buddhists. The Uighur Ms. in question was made over by Sir Aurel Stein to Prof. S. Lévi at Paris. On being informed of Dr. Denison Ross's

interest in Uighur litterature Prof. S. Lévi made the following proposal: namely that Dr. D. Ross during his forthcoming leave should visit Paris where conjointly with other indianists then and there present a plan of combined work should be settled not only for the edition of the Uighur part, but likewise for the edition of the Abhidharmakoça itself, as it was quite clear that the Uighur translation would resist every attempt at comprehension as long as the work of Vasubandhu itself remained immersed in the greatest obscurity. So it happened that the Mss. discovered in Chinese Turkestan, having no great intrinsic value but being the scientific fashion of the day and gratifying the historical taste of European scholarship, had an unexpected result in promoting a serious attempt to analyse and translate an Indian çāstra, to study a scientific work for its own sake, leaving the historical point of view cherished by European science préalablement untouched. For Vasubandhu's Koça is a çāstra, and what a çāstra is, when it is constructed by a great Indian thinker, and how it is developed by his followers is well known and for an instance we have only to call to mind Pāṇiṇi's, Kātyāyana's and Patañjali's grammatical çāstra.

The proposal was gladly accepted and it was immediately resolved to secure the participation of Prof. L. de la Vallée Poussin and Prof. U. Wogihara who both were known to have devoted much time and labour to the Abhidharmakoça.

Prof. S. Lévi confessed that the study of the Paris Ms. of the Abhidharmakoçavyākhyā had been for a long while his favourite pursuit and that he had some time ago already prepared a romanised transcript of the first koçasthāna along with a litteral French translation of it. But being at that period wholely taken up by other work he did not attempt the second chapter. However the work thus interrupted had been carried on by Prof. L. de la Vallée Poussin, who continued the study of Yaçomitra's Sanscrit text together with the Tibetan translation of Vasubandhu's kārikās and his bhāṣya. Prof. U. Wogihara had in pre-

paration a critical edition of the Sanscrit text of the vyākhyā, which he studied at the light of the Chinese translation of kārikā and bhāṣya as well as of the exegetic Chinese and Japanese litterature.

Dr. Denison Ross and myself began preparatory work devoting to it as much time as was then possible. A copy of the Nepalese Ms. of Yaçomitra's vyākhyā was obtained by Dr. Denison Ross, this we began reading together. He also began the study of Vasubandhu's work, the Koça itself, at the hand of both the Chinese translations of Paramārtha and Hiouen-Thsang. We derived great help from Mr. S. Yamakami, a Buddhist priest of the Zen sect, at that time lecturer at the Calcutta University. The acquaintance with Mr. S. Yamakami allowed us to see that some fixed tradition was living among the Buddhists of Japan regarding the system of philosophy embodied in Vasubandhu's çāstra. This tradition seemed to be in general trustworthy and enabled men like Mr. S. Yamakami to answer with precision many a question which appeared to European scholars veiled in hopeless intricacy.

I accordingly informed my pupil and friend, Mr. O. Rosenberg, at present lecturer at the University of Petrograd, of these facts, entreating him to direct his studies towards the exploration of the Buddhist litterature of Japan and highly recommending him to get into close contact with the traditional teaching prevailing in its Buddhist monasteries. From the field of research that opened before him Mr. O. Rosenberg has gathered valuable information. The result of Mr. O. Rosenberg's four years work in Japan is at present laid before us *). It consists in 1) a lexi-

---

*) *Introduction to the Study of Buddhism* according to Material preserved in Japan and China, by O. Rosenberg. — Part I. *Vocabulary*. A survey of Buddhist Terms and Names arranged according to Radicals with Japanese Readings and Sanskrit Equivalents. Supplemented by addition of Terms and Names relating to Shintō and Japanese History 1917. — Part II. *Problems of Buddhist Philosophy* 1918 (in Russian). («Oriental Series published by the Faculty of Oriental Languages of the University of Petrograd № 45».

cografical register giving the concordance of Buddhist technical terms as found in the special Buddhist lexicograpical litterature of China and Japan, 2) a work bearing the title: «Problems of Buddhist Philosophy» being an analysis of the fundamental principles of Vasubandhu's and, as a matter of fact, of all Buddhist philosophy. These two volumes are the first of a series appearing under the general title of an «Introduction to the Study of Buddhism, according to Material preserved in Japan and China».

It appeared that Japan preserves an immense litterature — written in Chinese explicatory of the Abhidharmakoça. This litterature, the outcome of the activity of Hiouen-Thsang and his school, seems to be lost in China. It remained unknown to the late Prof. Vassiljev as indeed it did to all other European sinologists. Not only were the works of Hiouen-Thsang's school carefully preserved and studied in Japan but moreover a considerable litterary activity was produced, the whole presenting a large bulk of trustworthy information, utterly unknown to European scholars and only partly touched even by Japanese writers in some works carried out according to the lines of European scholarship.

In conformity with the proposal of Prof. S. Lévi we met at Paris in December 1912. Prof. L. de la Vallée Poussin was prevented by his official duties from arriving at Paris and Dr. D. Ross went to Brussels and there secured his approval of the plan and promise of collaboration. Prof. U. Wogihara likewise informed us that he gladly adhered to the enterprise.

The plan which was provisionally settled at Paris — later alterations of course admitted as possible — is the following:

1) an edition of the Tibetan text of the Abhidharmakoça, kārikās and bhāṣya, 1[t] and 2[d] part by Prof. Th. Stcherbatsky, the remaining parts by Prof. L. de la Vallée Poussin[1]).

---

1) Of this the first part has already appeared in the Bibliotheca Buddhica series, № XX.

2) an edition of the Sanscrit text of Yaçomitra's vyākhyā, 1st part by Prof. S. Lévi, the second and following parts by Prof. U. Wogihara.

3) an edition of the Uighur version by Dr. Denison Ross.

4) an edition of both Chinese translations of Hiouen-Thsang and Paramārtha by Prof. U. Wogihara.

5) a French translation of the kārikās and bhāṣya by Prof. L. de la Vallée Poussin[1]).

6) a Russian translation of the same by Prof. Th. Stcherbatsky and priv.-doc. O. Rosenberg.

7) a French translation of the vyākhyā, 1st part by Prof. S. Lévi, the remaining by Prof. L. de la Vallée Poussin.

8) a systematical review of the philosophy embodied in Vasubandhu's work by priv.-doc. O. Rosenberg[2]).

9) an English translation of the kārikās and bhāṣya by Prof. Th. Stcherbatsky and priv.-doc. O. Rosenberg.

During summer 1913 Prof. S. Lévi visited Petrograd and brought his Ms. containing 1) the text of the 1-st chapter of Yaçomitra's vyākhyā retranscribed in Devanagari, 2) a partial reconstruction of Vasubandhu's Sanscrit text of the kārikā's and bhāṣya, 3) a litteral French translation of the first chapter of the vyākhyā. This Ms. represented his contribution in that stage which it had reached some time ago. Prof. S. Lévi entrusted the Bibliotheca Buddhica to make in it any alteration as would seem convenient.

My task has been chiefly to compare the Sanscrit text with the Tibetan translation, as embodied in the Tanjour. The result of this comparison will be given in critical notes which will appear at the end independently from the text, as the system of foot notes seemed cumbrous and presented some difficulties for

1) Of this the translation of the third koçasthāna in the publications the Academy of Brussels was already completed before the war, and the translation of the forth koçasthāna (karma) was at that time begun printing in the Muséon.

2) Of this two volumes as stated above have already appeared.

the printer. Not enough praise can be bestowed on the splendid work of the Committee of translators that achieved the Tibetan translation. It is a most accurate mirror of the original text; the cutting clearness of Tibetan style, its division of sentences makes its help invaluable, especially when a difficult work is preserved in a single Ms. and that in an almost hopelessly deteriorated state.

Proof sheets of the Sanscrit text were reiteratedly sent to Prof. S. Lévi at Paris, but postal intercourse between Petrograd and Paris proved to be impossible, no answer was obtained, neither could it be ascertained whether the proofs did at all reach Paris. In the mean while the issue could not be postponed, the printer was pressing: so it came that the present part appears without a revision by Prof. S. Lévi, under the sole responsibility of the joint editor for the many alterations introduced chiefly on the authority of the Tibetan translation. It must be hoped that a change in the political situation will allow Prof. S. Lévi to embody his observations at the end of the volume along with our critical notes.

This edition could be carried through press not without serious difficulties owing to the present state of war. It seems almost wonderful that it should have been brought to term at this time of public distress, when the very existence of the realm is at stake. It is a consolation if any that ever in times of the greatest calamities, external and civil war, during the reign of treachery, and looting, wholesale destruction of wealth accumulated through centuries, even now as in former ages, there still remains a body of men devoted to higher aims, working in the spirit that soars above the ocean of devastation threatening to flood the earth.

Amid these we must remember in the first ranks the Academy of Sciences of Petrograd and its Perpetual Secretary and Member S. d'Oldenburg, towards whom we here acknowledge a debt of gratitude for his never failing readiness to assist and promote every effort, every scheme that holds a promise of widening the scope

of scientific research. To his undefatigable good will and unrelenting energy we owe the appearance of the present edition in these difficult times.

The figures in margin refer to my edition of the Tibetan text of the bhāṣya in this series. Those in brackets to the Chinese translation of Hiouen-Thsang. The three figures at the top of the page refer 1) to the Chinese division of the koça in 30 fasciculi (chüan), 2) to the old division of Vasubandhu's work in eight chapters (koçasthāna) a 3) to Hiouen-Thsang's subdivision of each koçasthāna. Thus **1**.I.1 means: first chüan, first koçasthāna, first subdivision. The first large figure is connected with the figures in brackets. Thus **1** and (2a—4) means: first chüan, fol. 2a, line 4.

These references to the Chinese are the contribution of Mr. O. Rosenberg; to him also as well as to S. d'Oldenburg I am indebted for assistance in reading the proofs. Some missprints have nevertheless found there way — I am sorry to say — in the Sanscrit text of the vyākhyā as well as in the Tibetan text of the kārikās and bhāṣya. A list of them is attached to this fasciculus. A strict appliance of the rules of sandhi has not been the aim of the editors, and the small stroke has been made the widest use of, even when it does not interrupt sandhi, for in the opinion of the editors no effort should be spared, which is likely to facilitate the reading of difficult çāstra texts.

Prof. **Th. Stcherbatsky.**

स्फुटार्थाभिधर्मकोशव्याख्या ॥

नमो मारबलप्रमथनाय । नमो रत्नत्रयाय ॥

महाबलो ज्ञानसमाधिदन्तो यः पञ्जरं जन्ममयं विदार्य ।
विवेश निर्वृत्यटवीं प्रशान्तां तं शास्तृनागं शिरसा नमामि ॥ १ ॥
परमार्थशास्त्रकृत्या कुर्वाणं शास्तृकृत्यमिव लोके ।
यं बुद्धिमतामग्र्यं द्वितीयमिव बुद्धमित्याहुः ॥ २ ॥
तेन वसुबन्धुनाम्ना भविष्यपरमार्थबन्धुना जगतः ।
अभिधर्मप्रत्यासः कृतोऽयमभिधर्मकोशाख्यः ॥ ३ ॥
अभिधर्मभाष्यसागरसमुद्धृतस्यास्य शास्त्ररत्नस्य ।
व्याख्या मया कृतेयं यथार्थनामा स्फुटार्थेति ॥ ४ ॥
गुणमतिवसुमित्राद्यैर्व्याख्याकारैः पदार्थविवृतिर्या ।
सुकृता साभिमता मे लिखिता च तथायमर्थ इति ॥ ५ ॥
सिद्धान्तार्थापसृता क्वचित्क्वचिद्या तु तैः कृता व्याख्या ।
तामुद्भाव्य यथावद्विहितेह मयान्यथा व्याख्या ॥ ६ ॥

अभिधर्मविभाषायां कृतश्रमा ये ऽभिधर्मकोशे च ।
प्रविचार्यतामियं तैर्व्याख्या युक्ता न वा युक्ता ॥ ७ ॥
युक्ता चेद्ग्राह्येयं न चेदतो ऽन्यथा विधातव्या ।
न हि विषमे ऽर्थे स्खलितुं न संभवेन्मादृशां बुद्धिः ॥ ८ ॥

3.1 (1a–5) **यः सर्वथा सर्वहतान्धकारः संसारपङ्काज्जगदुज्जहार ।
तस्मै नमस्कृत्य यथार्थशास्त्रे शास्त्रं प्रवक्ष्याम्यभिधर्मकोशम् ॥**

3.5 (1a–7) इत्यस्य श्लोकस्यार्थं विवृण्वान आचार्य आह । शास्त्रं प्रणेतुकामः स्वस्य शास्तुर्माहात्म्यज्ञापनार्थं गुणाख्यानपूर्वकं तस्मै नमस्कारमारभत इति । शास्त्रमभिधर्मकोशम् । प्रणेतुकामः कर्तुकामः । स्वस्य शास्तुरात्मीयस्य शास्तुः । स हि भगवानाचार्यस्यात्मीयः शास्ता, तच्छासनप्रतिपन्नत्वात् । तेन वा शास्त्रा महाकरुणापरतन्त्रेण सकलो लोकः स्वत्वेन परिगृहीतः । तस्मादाचार्यस्यापि स्वत्वेन गृहीतस्य स भगवान्स्वः शास्ता भवति । माहात्म्यज्ञापनार्थमिति महात्मत्वं माहात्म्यं स्वपरार्थप्रतिपत्तिसम्पत् । तज्ज्ञापनार्थं तदवबोधार्थम् । गुणाख्यानपूर्वकं गुणकथनपूर्वकम् । तस्मै नमस्कारमारभते तस्मै प्रणामं करोतीत्यर्थः । अतीतकालत्वादारब्धवानिति वक्तव्ये वर्तमानकाले पदप्रयोगः, अद्यापि नमस्कारारम्भाभिप्रायात्, शिष्यपरंपरया वा नमस्कारारम्भाविरामात् । शब्दशास्त्रे ऽपीदृश एव शब्दप्रयोगो दृश्यते, अथ शब्दानुशासनं, अथेत्ययं शब्दो ऽधिकारार्थः प्रयुज्यत इति । गुणाख्यानमात्रेण माहात्म्यावबोधो न नमस्कारेणेति चेत् । न, तस्य तत्सूचकत्वात् । नमस्कारेण हि माहात्म्यं सूच्यते । अथवा गुणाख्यानेनैव माहात्म्यं ज्ञाप्यते न नमस्कारेण, नमस्कारारम्भस्तु स्वपुण्यप्रसवार्थम् । सदाचारानुवृत्तिप्रदर्शनार्थं वा । कृताभिमतदेवतापूजास्तुतिनमस्कारा हि सन्तः क्रियामारभन्त इति सतामाचारात् । तत्र माहात्म्यज्ञापनं किमर्थमिति । आचष्टे । तद्गौरवोत्पादनार्थम् । गौरवोत्पादनं पुनस्तत्प्रवचनं सत्कृत्य श्रवणार्थम् । सत्कृत्य श्रवणं क्रमेण श्रुतचिन्ताभावनामयप्रज्ञोत्पादनार्थम् । तदुत्पादनं क्लेशप्रहाणार्थम् । तत्पुनः सर्वदुःखोपशमलक्षणनिर्वाणप्रापणार्थमिति प्रयोजननिष्ठा । माहात्म्यज्ञापनं त्वेकमाचार्येण

प्रयोजनमुक्तं ' साक्षात्प्रयोजनत्वात् । तदितराणि त्वभ्यूहितुं शक्यानीति नोक्तानि । य इति बुद्धं भगवन्तमधिकृत्याहेति । सामान्यशब्दो ऽपि यच्छब्दो विहितविशेष- 3.7 (1a–8)
णत्वाद्विशेषवृत्तिर्भवति । तद्यथा । य एषां ब्राह्मणानां गौरः शुक्लवासाः स देवशर्मेति । तद्वदिहापि । यः सर्वथा सर्वहतान्धकारः संसारपङ्काज्जगदुज्जहार तस्मै नमस्कृत्येति बुद्ध एव भगवति यच्छब्दो वर्तते । न हि बुद्धादन्य एवं गुणविशिष्टः संभवतीत्यतो व्याचष्टे ' य इति बुद्धं भगवन्तमधिकृत्याहेति ॥ बुद्ध इति कर्तरि क्तविधानम् । बुद्धेर्विकसनाद्बुद्धः । विबुद्ध इत्यर्थः । विबुद्धं पद्ममिति यथा । अथवाविद्यानिद्रापगमाद्बुद्धः प्रबुद्ध इत्यर्थः । प्रबुद्धपुरुष इति यथा । कर्मकर्तरि क्तविधानमित्यपरे । स्वयं बुध्यत इति बुद्ध इत्यर्थः । कर्मण्यपि क्तविधानमप्यदोषं पश्यामः । सर्वगुणसम्पत्संपन्नतया सर्वदोषविनिर्मुक्ततया च बुद्धैरन्यैर्वा बुद्धो ज्ञात इत्यर्थः ॥ भगवन्तमिति हितोपदेशोपादानमनादरसंभावनानिवृत्त्यर्थम् । निरुपपदानामभिधानानां हि लोके ऽनादरो दृश्यते ' देवदत्त इति । विनयविभाषाकारास्तु चतुष्कोटिकं कुर्वन्ति । अस्ति बुद्धो न भगवान् । प्रत्येकबुद्धः स्वयंभूत्वाद्बुद्ध इति शक्यते वक्तुं ' न तु भगवानपरिपूर्णदानादिसंभारत्वात् । यो हि माहात्म्यवान्स भगवानुच्यते । अस्ति भगवान्न बुद्धश्चरमभविको बोधिसत्त्वः परिपूर्णदानादिपारमितत्वाद् ' अनभिसंबुद्धत्वाच्च । अस्त्युभयथा बुद्धो भगवान् ' अस्ति नोभयथा ' एतानाकारान्स्थापयित्वेति । अतो बुद्धं भगवन्तमित्युभयविशेषणम् ॥ हतमस्यान्धकारमनेन वेति हतान्धकारः । षष्ठीबहुव्रीहौ मार्गेण हतमिति 3.8 (1a–8)
कर्तृभूतो मार्गो ऽध्याहार्यः । तृतीयाबहुव्रीहौ तु मार्गेणेति करणमध्याहार्यम् । अपर आह । विग्रहद्वयप्रदर्शनं हन हिंसागत्योरिति हन्त्यर्थद्वयपरिग्रहार्थम् । यदा हतमस्यान्धकारमिति विग्रहस्तदा गत्यर्थो हन्तिर्गृह्यते ' गतमस्यान्धकारमित्यर्थः । यदा पुनस्तृतीयाबहुव्रीहिस्तदा हिंसार्थो हन्तिर्गृह्यते ' हिंसितमनेनान्धकारमित्यर्थः । एवमुत्तरयोः पदयोरेकपदं कृत्वा पश्चात्सप्तमीतत्पुरुषं करोति ' सर्वस्मिन्हतान्ध- 3.9 (1a–9)
कारः सर्वहतान्धकार इति । तथा च सति हतशब्दो ऽत्र न पूर्वं निपतति । सप्तमीसमासस्त्विह केन लक्षणेन भवतीति चिन्त्यम् । सप्तमी शौण्डैरिति समासः । हता-

न्धकारशब्दः शौण्डादिषु पठ्यते ' शौण्डादीनामाकृतिगणत्वात्तत्रास्यानुप्रवेशो ऽवगन्तव्यः । सप्तमीति योगविभागाद्वा । उत्सर्गेण वा समासः । सह सुपेति सुप् इति वर्तमाने सुबन्तं सुबन्तेन सह समस्यते । यत्रेष्टमित्यकृतलक्षणो वा तत्पुरुषो मयूरव्यंसकादिषु द्रष्टव्य इति । अनेन वा ' कथमुपसर्जनीभूतमन्धकारं सर्वस्मिन्नित्यनेनाभिसंबध्यते । सत्यम् । नान्धकारमनेनाभिसंबध्यते । अन्धकारघातस्त्वनेनाभिसंबध्यते । येन ह्यन्धकारघातेन योगाद्भगवान्हतान्धकारः स तस्यान्धकारघातः सर्वाधारो ऽवगन्तव्यः । यथान्येषु धूर्त इति । येन धौर्त्यलक्षणेन गुणेन योगादसौ धूर्तः सो ऽत्राधारः । एवमिहाप्यवगन्तव्यम् । अन्यथापि चेह संभवन्तं समासं पश्यामः । सर्वस्मिन्हतं सर्वहतं ' सर्वेण प्रकारेण सर्वहतं सर्वथा सर्वहतं ' सर्वथा सर्वहतमस्यान्धकारं ' अनेन वेति सर्वथा सर्वहतान्धकारः । एवं हतशब्दस्यान्धकारेण सामानाधिकरण्यं ' न च पूर्वनिपात इति ॥

सर्वेण प्रकारेणेति क्लिष्टाक्लिष्टान्धकारविगमतः । सर्वस्मिं ज्ञेये द्वादशायतनलक्षणे ' सर्वं सर्वमिति ब्राह्मण यावदेव द्वादशायतनानीति सूत्रे वचनात् ॥ किमत्र शार्वरं तमो
3.10 (1a–10) ऽन्धकारशब्देनोच्यते । नेत्याह ' अज्ञानं हि भूतार्थदर्शनप्रतिबन्धादन्धकारमित्यवगन्तव्यम् । अन्धकारशब्दो हि नैशे तमसि प्रसिद्धः । अन्धमिव जनं करोतीत्यन्धकारम् । सद्भूतघटपटादिरूपदर्शनप्रतिबन्धात्तत्साधर्म्यादज्ञानमप्यन्धकाराख्यां लभते ' भूतार्थदुःखादिसत्यदर्शनप्रतिबन्धात् । तच्चेति तदज्ञानम् । प्रतिपक्षलाभेनेत्यार्यमार्गलाभेन । विपक्षः क्लेशः ' विपक्षप्रतिघाताय पक्षः प्रतिपक्ष इति कृत्वा । अथवा ज्ञानमनास्रवमज्ञानप्रतिपक्षः ' तस्य लाभेन । अत्यन्तं सर्वथा ' सर्वत्र ज्ञेये ' पुनरनुत्पत्तिधर्मत्वापादनमसमुदा-
4.1 (1b–1) चारप्रहाणीकृतमित्यर्थः । अतो ऽसाविति भगवान् । प्रत्येकबुद्धश्रावका अपि । अभ्यर्हितत्वात्प्रत्येकबुद्धशब्दपूर्वनिपातः । काममित्यनुज्ञायाम् । न तु सर्वथेत्यक्लिष्टसंमोहात्यन्तविगमात् । ननु च सर्वं सास्रववस्तु श्रावकप्रत्येकबुद्धानामपि बुद्धवत्प्रहीणम् । किमिदमुच्यते ' क्लिष्टसंमोहस्य तेषामत्यन्तविगम इति । तथा ह्युक्तं ' नाहमेकधर्ममप्यनभिज्ञायापरिज्ञाय दुःखस्यान्तक्रियां वदामीति ' तथा नाहमेकधर्ममप्यपरिज्ञायाप्रहाय दुःखस्यान्तक्रियां वदामीति । तस्माच्छ्रावकप्रत्येकबुद्धानामपि तद-

क्लिष्टमज्ञानं चक्षुरादिवच्छन्दरागप्रहाणात्प्रहीणमेव । अन्यथा हि श्रावकप्रत्येकबुद्धानां दुःखान्तक्रिया न भवेत् । सत्यम् । अस्त्येतदेवम् । प्रहीणमेव तेषां क्लिष्टवदक्लिष्टमप्यज्ञानम् । ननु तेषां चक्षुरादिवत्प्रहीणमपि समुदाचरति । बुद्धस्य तु प्रहीणं सन्न समुदाचरति । अत एव च विशेषितं ' पुनरनुत्पत्तिधर्मत्वाद्धतमिति । अन्यथा तत्सर्वथा सर्वत्र ज्ञेये प्रहीणमित्येवावक्ष्यत् । ये तु व्याचक्षते श्रावकप्रत्येकबुद्धानां क्लिष्टसंमोहमात्रविगमात्संक्लेशविनिवृत्तिरिति तदपव्याख्यानमेषां यथोक्तमिति प्रत्याचक्ष्यते । तथा ह्येषामिति विस्तरः । तथा हीति यस्मादित्यर्थः । अथवा तथेति यथा 4.4 (1b–3) न सर्वथा तथेति । हिशब्दो हेतौ । एषामिति श्रावकप्रत्येकबुद्धानाम् । बुद्धधर्मेष्वावेणिकादिषु । अतिविप्रकृष्टदेशकालेषु चार्थेषु ' अतिविप्रकृष्टदेशेष्वतिविप्रकृष्टकालेषु च ' अनन्तप्रभेदेषु चाबुद्धधर्मस्वभावेष्वपि रूपादिष्वर्थेषु । भवत्येवाक्लिष्टमज्ञानं ' समुदाचरत्येव तदित्यर्थः । तत्र ये बुद्धधर्मा आवेणिकादयस्तेषु स्वभावपरमसूक्ष्मगम्भीरत्वाद्बुद्धादन्येषामज्ञानम् । यथोक्तम् । जानीषे त्वं शारिपुत्र तथागतस्य शीलस्कन्धं समाधिस्कन्धं प्रज्ञास्कन्धं विमुक्तिस्कन्धं विमुक्तिज्ञानदर्शनस्कन्धमिति भगवता पृष्टेन स्थविरशारद्वतीपुत्रेणोक्तं ' नो हीदं भगवन्निति । ये त्वन्ये ऽर्था रूपिणः परमाणुसंचितास्ते ऽतिविप्रकृष्टदेशा यदि भवन्ति ' ये ऽप्यविज्ञप्त्यरूपिणास्ते ऽपि यद्यतिविप्रकृष्टदेशाधारत्वादतिविप्रकृष्टदेशा भवन्ति ' तेष्वपि तेषामज्ञानं ' अनेकलोकधात्वन्तरितदेशत्वात् । श्रूयते हि स्थविरमौद्गल्यायनस्यातिविप्रकृष्टदेशमरीचिलोकधातुजातस्वमातृदेशापरिज्ञानम् । अतिविप्रकृष्टकालेष्वप्यतीतेष्वनागतेषु वा तेष्वर्थेष्वतिबहुकल्पान्तरान्तरितविनाशप्रादुर्भावत्वात्तेषां भवत्येवाज्ञानम् । श्रूयते हि स्थविरशारिपुत्रेण मोक्षभागीयकुशलमूलादर्शनात्प्रव्रज्यापेक्षिपुरुषप्रत्याख्यानम् । भगवता तु तस्य मोक्षभागीयं दृष्टमुक्तं च ।

मोक्षबीजमहं ह्यस्य सुसूक्ष्ममुपलक्षये ।
धातुपाषाणविवरे निलीनमिव काञ्चनम् ॥ इति ॥

स च पुरुषः प्रव्रजित इति । अनन्तप्रभेदेष्विति धातुगतिजात्युपपत्त्यादिप्रभेदे दुर्बोधेष्वर्थेषु । तेषामज्ञानं भवत्येव । तथा ह्याह ।

सर्वाकारं कारणमेकस्य मयूरचन्द्रकस्यापि ।
नासर्वज्ञैर्ज्ञेयं सर्वज्ञज्ञानबलं हि तत् ॥

ज्ञानमिति । तान्येतानि चत्वार्यज्ञानकारणानि भवन्ति । तेषां कानिचिदेकं कानिचिद्द्वे कानि-
4.6 (1b–4) त्रीणि कानिचिच्चत्वारीति संभवतो योज्यानि ॥ इत्यात्महितप्रतिपत्तिसंपदिति विस्तरः । आत्महिताय प्रतिपत्तिरात्महितप्रतिपत्तिः । आत्महितप्रतिपत्तेः संपदात्महितप्रतिपत्तिसंपत् । फलनिष्पत्तिरित्यर्थः । सा चेयं संपद्ज्ञानप्रहाणसंपत्स्वभावा वेदितव्या । परहितप्रतिपत्तिसंपदपि तथैव वर्णनीया । अपरे व्याचक्षते । आत्महितप्रतिपत्तिरात्महितप्रतिपादनमात्महितोपायग्रह इत्यर्थः । तस्याः संपदात्महितप्रतिपत्तिसंपत् । एवं परहितप्रतिपत्तिसंपदपि व्याख्येया । सा पुनः सर्वदुःखोपशमनिर्वा-
4.9 (1b–5) णपरिप्रापणस्वभावा । संसारपङ्काज्जगदुज्जहारेति वचनात् । संसरणं संसार आजवंजवीभावो जन्ममरणपरंपरेत्यर्थः । अथवा संसरन्त्यस्मिन्सत्त्वा इति संसारस्त्रैधातुकम् । संसारः पङ्क इव संसारपङ्कः पङ्कसाधर्म्यात् । अत आह । संसारो हि जगदासङ्गस्थानत्वाद्दुस्तरत्वाच्च पङ्कभूत इति । पङ्को हि लोके ऽवसादात्मकत्वादासङ्गस्य स्थानम् । अत एव च दुस्तरः । चञ्चलत्वाद्वा पराश्रयोत्तरणीयत्वाद्वा दुस्तरः । संसारो ऽपि हि तृष्णाभिष्यन्दितत्वादासङ्गस्थानं ' दुस्तरश्च तस्मादेव दृष्टिविचिकित्साविष्पन्दितेन वा । बुद्धाद्याश्रयोत्तरणीयत्वेन वा दुस्तरः । तत्रावमग्नं तादात्म्यानुप्रवेशतः समुदायावयवरूपतो वा । जगत्सत्त्वलोकः । अत्राणमनाक्रन्दम् । अनुक-
4.13 (1b–6) म्पमानः करुणायमानो भगवान् । सद्धर्मदेशनाहस्तप्रदानैः । सद्धर्मदेशनैव हस्ताः । तेषां प्रदानानि । उत्तरणीयबहुत्वाद्बहुवचनम् । तैर्यथाभव्यमत्युद्धृतवान् । यथाभव्यमित्यनुच्यमानमपि गम्यते ' लोके तथादृष्टत्वात् । तद्यथा ब्राह्मणानानीय भोजयामासेत्युक्ते ' ये तत्र भोजयितुं शक्या ग्रामे नगरे वा संनिहितास्तानेव भोजयामासेति गम्यते ' सर्वलोकब्राह्मणानां भोजयितुमशक्यत्वात् । एवमिहापि यो जनो शक्यो
4.19 (1b–8) ऽत्युद्धर्तुं तमेवात्युद्धृतवानिति । अतो यथाभव्यमिति व्याचष्टे ॥ तस्मै नमस्कृत्येति शिरसा प्रणिपत्य । क्रियास्पदीभूतत्वान्नमःशब्दस्य प्रणिपत्यार्थो नमस्कृत्यशब्दो

भवति। प्रणिपातश्च लोके शिरसा प्रतीत इति शिरसेत्याह। वाङ्मनोनमस्कारो ऽप्यत्रानुक्तसिद्धो गुणाख्यानपूर्वकत्वात्' मनस्कर्मपूर्वकत्वाच्च कायकर्मणः। तस्मायिति किंलक्षणेयं चतुर्थी। अत्र बहवो व्याख्यानकारा मुह्यन्ति। आचार्यगुणमतिस्तच्छिष्यश्चाचार्यवसुमित्र आहतुः। नमःशब्दयोगे चतुर्थी। नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्चेति। तदेतदयुक्तम्। स्वतन्त्रस्य नमःशब्दस्य योगे सा चतुर्थी भवति। अस्वतन्त्रश्चायं नमःशब्दः क्रियास्पदीभूतत्वात्। अत एव चानेनैवाचार्येण व्याख्यायुक्तौ' नमस्कृत्य मुनिं मूर्ध्नेति कर्मलक्षणा द्वितीया प्रयुक्ता। तस्मान्न नमःशब्दयोगे चतुर्थीति। द्वितीयायाः स्थाने चतुर्थी प्रयुक्तेत्यपरे। तदिदमेषामिच्छामात्रम्। न हि लक्षणमस्यास्तीति। केन तर्हीयं चतुर्थी। संप्रदानलक्षणेयं चतुर्थीति व्याचक्ष्महे। कथं संप्रदानसंज्ञा। कर्मणा यमभिप्रैति स संप्रदानमिति। चूर्णिकारेण कर्मशब्द उभयथा वर्ण्यते। पारिभाषिकं कर्म लौकिकं चेति। तत्र यदा कर्तुरीप्सिततमं कर्मेति पारिभाषिकं कर्माश्रीयते तदा कर्तुरीप्सिततमेन यमभिप्रैति स संप्रदानसंज्ञो भवति। ब्राह्मणाय गां प्रयच्छतीत्येतत्सिद्धं भवति। यदा तु कर्म क्रियेति लौकिकं कर्माश्रीयते तदा क्रियया यमभिप्रैति स संप्रदानसंज्ञो भवतीति। तदेतत्सिद्धं भवति' युद्धाय संनह्यति' पत्ये शेत इति। संनहनक्रियया युद्धमभिप्रैति कर्ता' शयनक्रियया पतिमिति युद्धादीनां संप्रदानसंज्ञा सिद्धा भवति। तथेहापि नमस्कारक्रियया शास्तारमभिप्रैत्याचार्यः। तस्माच्छास्तरि संप्रदानसंज्ञा। संप्रदानसंज्ञायां सत्यां संप्रदाने चतुर्थीति चतुर्थी भवति। एवं च कृत्वा'

पूर्वं प्रणम्य वदतां प्रवराय शास्त्रे ॥
प्रमाणभूताय जगद्धितैषिणे
प्रणम्य शास्त्रे सुगताय तायिने ॥ इति ॥

एवमादीनि काव्यशास्त्रान्तरोक्तानि शब्दरूपाणि सुनीतानि भवन्ति। यदि तर्हि संप्रदानसंज्ञैवेष्यते' नमस्कृत्य मुनिं मूर्ध्नेत्यत्र द्वितीया न प्राप्नोति। नैष दोषः। विवक्षातः कारकाणि भवन्ति। यदा कर्मविवक्षा तदा द्वितीया। यदा संप्रदानविवक्षा तदा चतुर्थीत्युभयमपि सिद्धं भवति॥ यथार्थशास्त्र इति शास्त्रित्यौणादिकः शब्दः 4.16 (1b–8)

तृन्तृचौ शंसिक्षदादिभ्यः संज्ञायां चानिटाविति तृन्प्रत्ययान्तो ऽनिट् शास्तेति भवति ।
ननु च संज्ञायां शास्तेति भवति , न चेयं संज्ञा । संज्ञैवेयम् । द्विविधा हि संज्ञा । विशेष-
संज्ञा सामान्यसंज्ञा च । विशेषसंज्ञा देवदत्तो यज्ञदत्त इति । सामान्यसंज्ञा माता पितेत्ये-
वमादिका । मात्रादयो ऽपि हि तत्र संज्ञायामेव निपात्यन्ते , नप्तृनेष्टृत्वष्टृहोतृपोतृभ्रा-
तृजामातृमातृपितृदुहितृरिति । तेन यथा सर्वासां मातॄणामियं संज्ञा मातेति सर्वेषां
च पितॄणां पितेति , एवं सर्वेषां च शास्तॄणामियं संज्ञा शास्तेति ॥ स तु शास्ता
द्विविधो भवति , अयथार्थो यथार्थश्च । अयथार्थश्च पूर्णादिः । यथार्थश्च तथागत इति ।
4.14 (1b–10) अतो विशिनष्टि , यथार्थमविपरीतं शास्तीति यथार्थशास्ता । एतच्च विशेषणं
परहितप्रतिपत्त्युपायसूचनार्थम् । अत एवाह , परहितप्रतिपत्त्युपायमस्याविष्क-
4.17 (2a–1) रोतीत्येवमादि । न ऋद्धिवरप्रदानप्रभावेनेति । प्रभावशब्दः प्रत्येकमभिसंबध्यते ,
ऋद्धिप्रभावेन वरप्रदानप्रभावेनेति । ऋद्धिप्रभावस्तद्यथा , विष्णोर्विश्वरूपसंदर्शनम् । वर-
प्रदानप्रभावस्तद्यथा , महेश्वरो वरं प्रयच्छतीति प्रवादः । अथवा त्रिपदो द्वन्द्वः । ऋद्धिश्च
वरप्रदानं च प्रभावश्चेति । प्रभावः शक्तिविशेषः । ननु च बुद्धा अपि कदाचिदृद्धिप्रातिहार्यं
विनेयानामुपदर्शयन्ति । अस्त्येतदेवं , अपि त्वावर्जनमात्रं तु तेषाम् । अनुशासनीप्रातिहार्येण
5.1 (2a–2) तु रागादिप्रतिपक्षभावनाक्रमेण संसारोत्तरणं भवति ॥ किं करिष्यतीति प्रश्नः , नम-
स्कृत्येति क्त्वाविधिः क्रियान्तरापेक्षत्वात् । समानकर्तृकयोर्हि पूर्वकाले क्त्वाविधिर्भवति ।
5.2 (2a–3) शास्त्रं प्रवक्ष्यामीति । अर्थविशेषाभिद्योतको नामसमूहः शास्त्रम् । क्षणिकत्वात्समूहानु-
पपत्तिरिति चेत् । न , तद्ग्राहकबुद्धिरूपसमूहकल्पनात् । शिष्यशासनाच्छास्त्रमिति ।
किं शास्त्रमिति । किं नामधेयमित्यभिप्रायः । अभिधर्मकोशमित्यस्य निर्वचनं वक्ष्यते ।
आस्तां तावदेतत् ॥ १ ॥

5.9 (2a–4) अवयवार्थावबोधपूर्वकः समुदायार्थावबोध इत्यवयवार्थं तावत्पृच्छति । को ऽयमभि-
धर्मो नामेति । प्रज्ञामला सानुचराभिधर्म इति । धर्मप्रविचयकाले प्रज्ञा प्रधानमिति
5.11 (2a–5) मुख्यवृत्त्या प्रज्ञाग्रहणम् । अमलेत्यनास्रवा , मलानामास्रवपर्यायत्वात् । सानुचरेति
सपरिवारा । राज्ञा समं चरन्नपि भृत्यो राजानुचर इत्युच्यते , तदनुवृत्तिकारित्वात् । तथे-

ह्यपि समकालं चरन्तो ऽपि तत्सहभुवो धर्मा अनुचरा एवोच्यन्ते। के पुनस्ते। चित्तचैत्ता अनास्रवसंवरा ज्ञात्यादयश्च चित्तविप्रयुक्ता इति। ननु च चित्तं चैत्तेभ्यः प्रधानम्। तथा हि, चित्तस्येमे चित्ते वा भवाश्चैत्ता इति। तेन प्रज्ञैव चित्तस्य परिवारो ऽर्हति, न तु चित्तं प्रज्ञायाः, चैतसिकत्वात्। अस्त्येतत्। अपि तु धर्मप्रविचयकाले प्रज्ञा चैत्तस्यापि सर्वस्य कलापस्य राजायते। क्वचित्कश्चिद्धर्मः प्राधान्यमास्कन्दति। तद्यथा, अभिसंप्रत्ययकाले श्रद्धेत्येवमादि॥ अनास्रवः पञ्चस्कन्धक इति। अनास्रवसंवरस्तस्मिन्कलापे 5.12 (2a–6)
रूपस्कन्धः। या वेदना स वेदनास्कन्धः। या संज्ञा स संज्ञास्कन्धः। चेतनादि ज्ञात्यादयः संस्कारस्कन्धः। विज्ञानं चात्र विज्ञानस्कन्धः॥ एष तावदिति। तावच्छब्दः 5.13 (2a–6)
क्रमार्थः। पारमार्थिक इति परमार्थ एव पारमार्थिकः। परमार्थे वा भवः पारमार्थिकः। परमार्थेन वा दीव्यति चरतीति वा पारमार्थिकः। सांकेतिकस्तु सांव्यवहारिकः। 5.14 (2a–7)
तत्प्राप्तये यापि चेति, प्रज्ञा सानुचरा सो ऽभिधर्म, इति चात्राधिकृतम्। तस्या अनास्रवायाः प्रज्ञायाः प्राप्त्यर्थं साक्षात्पारंपर्येण वा या श्रुतमयी चिन्तामयी च भावना- 5.15 (2a–8)
मया च प्रज्ञा सास्रवा या चोपपत्तिप्रतिलम्भिका सानुचरा सापि सांकेतिको ऽभिधर्मः। तत्र श्रुतप्रयोगजा श्रुतमयी, युक्तिनिध्यानप्रयोगजा चिन्तामयी, भावनाप्रयोगजा भावनामयी, उपपत्तिलम्भजोपपत्तिप्रतिलम्भिका, उपपत्तिप्रतिलम्भो ऽस्यास्तीति। अत इनिठनाविति ठन्विधानान्न वृद्धिः। श्रुतचिन्तामयी उपपत्तिप्रतिलम्भिका भावनामयी चारूप्यावचरी चतुःस्कन्धको ऽभिधर्मो, अनुपरिवर्तकरूपाभावात्। रूपावचरी तु ध्यानसंवरसद्भावात्पञ्चस्कन्धको ऽभिधर्मः॥ यच्च शास्त्रमित्यभिधर्मशास्त्रमभिप्रेतम्। 5.17 (2a–8)
तत्तु सानुचरं, न सानुचरमिति व्याख्याभेदः। केचित्तावदचित्तचैतसिककलापरूपत्वात्सानुचरमिति नानुवर्तयन्ति। ज्ञात्यादिसंभवात्केचिदनुवर्तयन्ति। एकस्कन्धको ह्यसावभिधर्मः। द्विस्कन्धको वा, तस्य च ज्ञात्यादयः सन्तीति। अन्ये तु व्याचक्षते। शास्त्रमिति ज्ञानप्रस्थानम्। तस्य शरीरभूतस्य षट्पादाः। प्रकरणपादो विज्ञानकायो धर्मकायः प्रज्ञप्तिशास्त्रं धातुकायः संगीतिपर्याय इति। अतस्तदपि शास्त्रं सानुचरमेव, पारंपर्येण पारमार्थिकाभिधर्मप्राप्तये सांकेतिको ऽभिधर्म इत्युच्यते। उपपत्तिप्रतिलम्भिका

हि प्रज्ञा शास्त्रश्रवणात्तदर्थमनुसरति । तस्याः श्रुतमयी । श्रुतमय्याश्चिन्तामयी । चिन्ता-
6.2 (2a–10) मय्याः सास्रवा भावनामयी । तस्या अनास्रवा प्रज्ञा जायत इत्यनुक्रमः ॥ तदयमि-
ति । तदिति वाक्योपन्यासः । अयमिति स्वलक्षणधारणत्वेन निरुक्तः पारमार्थिकसांके-
तिकाभिधर्मः । परमार्थधर्ममिति परमस्य ज्ञानस्यार्थः परमार्थः । अथवा सर्वधर्माग्र-
6.3 (2a–10) त्वात्परमार्थः । परमार्थश्चासौ धर्मश्च परमार्थधर्मः । धर्मलक्षणं वेति स्वसामान्यलक्षणं '
खक्खटलक्षणः पृथिवीधातुरनित्यं दुःखमित्येवमादि । तत्प्रत्यभिमुखः ' प्रतिलम्भाय
प्रतिवेधायावबोधाय प्रतिबोधाय वाभिमुखो धर्मो ऽभिधर्मः । कुगतिप्रादय इति तत्पुरु-
षसमासः । ननु च लक्षणेनाभिप्रती आभिमुख्य इत्यव्ययीभावः प्राप्नोति । यदा ह्यभिर्लक्षणेन
सह समस्यते तदाव्ययीभावः । तद्यथा ' अत्यग्नि शलभाः पतन्ति । शलभपतनमग्निना
लक्ष्यते । सो ऽग्निरस्य लक्षणम् । न त्वयं धर्मो ऽन्यस्य लक्षणं ' किं तर्हि लक्ष्यः ' स्व-
यमेवाभिमुख्यात् । शास्त्राख्यो ऽपि सांकेतिको ऽभिधर्मः प्रापणायाभिद्योतनाय वा नि-
र्वाणं धर्मलक्षणं वा प्रत्युपनिषद्भावेनाभिमुखः ' किमङ्ग पारमार्थिक इत्यतस्तत्पुरुष-
6.4 (2b–1) समासेनाभिधर्म इति सिद्धं भवति ॥ उक्तो ह्यभिधर्म इति स्वभावप्रभेदनिर्वचनतो
ऽवयवार्थो ऽवबुद्धः । समुदायार्थस्तु न तावदित्यतः समुदायार्थं पृच्छति ' इदं तु शास्त्रं
कथमभिधर्मकोशमिति । तस्यार्थतो ऽस्मिन्निति । तस्याभिधर्मसंज्ञकस्य शास्त्र-
स्यानन्तरोक्तत्वाद्ग्रहणम् । अर्थत इति न व्यञ्जनत इति । अर्थतो ऽयमनुप्रवेशो न सा-
6.7 (2b–4) कल्येन । तस्माद्यथाप्रधानमित्यव्ययीभावः । अन्तर्भूतः प्रविष्ट इत्येतच्छास्त्रं मदीयं
तस्यार्थस्य कोशस्थानीयं भवति कोशसदृशम् । एतस्मिन्नर्थे षष्ठीतत्पुरुषसमासः ।
6.9 (2b–4) अभिधर्मस्य कोशो ऽभिधर्मकोश इति । यत्र ह्यसिः प्रविशति स तस्य कोशः । अथवा
सो ऽभिधर्मो ज्ञानप्रस्थानादिरेतस्य मदीयस्य शास्त्रस्याश्रयभूतः । ततो ह्यार्षादभि-
धर्मादेतन्मदीयं शास्त्रं निराकृष्टम् । अर्थत इत्यधिकृतम् । अतः स एवास्याभिधर्मकोश
इत्येतस्मिन्नर्थे बहुव्रीहिसमासः । अभिधर्मः कोशो ऽस्येत्यभिधर्मकोशः । यतो ह्यसिर्नि-
राकृष्यते स तस्य कोश इत्येतच्छास्त्रमभिधर्मकोशमिति । समुदायार्थो ऽप्यस्यावगमित
6.13 (2b–6) इति सूचयति ॥ किमर्थं पुनरभिधर्मोपदेशः । किं प्रयोजनमित्यर्थः । सप्रयोजनस्य

हि शास्त्रस्य प्रत्ययः साधुर्भवति । न निःप्रयोजनस्य । केन चायं प्रथमत उप-
दिष्टः । केन वायमभिधर्म आदितो देशितः । आप्तोपदिष्टस्य हि शास्त्रस्य प्रत्ययो
ऽर्हद्रूपः स्यादित्यभिप्रायः । प्रथमत इति विशेषणम् । भदन्तकात्यायनीपुत्रादीनां पिण्डी-
करणेन पश्चादुपदेशस्य सिद्धत्वात् । प्रथमतउपदेशे हि विवादः । यत इति विस्तरः । 6.14 (2b–6)
यतः कारणात् । आचार्यः शास्त्रकारः । अभिधर्मकोशं प्रत्ययशास्त्रम् । वक्तुं
प्रणेतुम् । आद्रियते आदरं करोतीत्यर्थः । एवं कृते प्रश्नद्वये ऽभिधर्मशास्त्रस्य सप्र-
योजनतामाप्तोपदेशतां च प्रदर्शयन्नाह ॥ २ ॥

धर्माणां प्रविचय इति विस्तरः । यतो विना धर्मप्रविचयेन ' रूपं वेदनानित्यं 7.4 (2b–8)
दुःखमित्येवमाकारेण ' नास्ति क्लेशोपशमाभ्युपायः । अन्य इति वाक्यशेषः । स एव
तु क्लेशोपशमाभ्युपाय इत्यर्थादापन्नं भवति । तद्यथा । नाहारेण विना प्राणसंधारणोपाय
इत्युक्ते स एवाहारः प्राणसंधारणोपाय इत्यर्थादापन्नं भवति । तद्वदेतत् । यदि क्लेशो-
पशमो न स्यात्किं स्यादित्यत आह । क्लेशैश्च भ्रमति भवार्णवे ऽत्र लोक 7.6 (2b–9)
इति । अनेन क्लेशोपशमस्यावश्यंकर्तव्यतां दर्शयति । भवः संसार इत्येको ऽर्थः । भव
एवार्णवो भवार्णवः । मज्जनस्थानसाधर्म्यात्समुद्रकल्पो भवः । एतस्मिन्भवार्णवे ऽत्र ।
प्रत्यक्षीकृतपञ्चोपादानस्कन्धलक्षणाव्यतिरिक्तभवप्रतिषेधार्थमत्रग्रहणम् । अत्र लोको
भ्रमति तादात्म्यावस्थानात् । तादात्म्यावस्थानतो ऽपि ह्यधिकरणनिर्देशो दृश्यते ।
तद्यथा ' अन्यपादपानुपयोगेन पलाशेष्वारामः स्थित इति । वृत्ते तु हेत्वर्थतां तृतीयायाः
सूचयता हेतुमभिवचा हेत्वर्थ उक्तः ' क्लेशाश्च लोकं भ्रमयन्तीति । अत इत्युद्दिष्टहेतु- 7.7 (2b–10)
प्रत्यवमर्षः ' यत एवमत उद्दिष्टो ऽभिधर्म इत्यर्थः । धर्मप्रविचयः क्लेशोपशमोपायो ना-
न्यो धर्म इत्यभिधर्मोपदेशकः संबन्ध इति । अत उक्तं तद्धेतोरिति । स एव हेतुस्तद्धेतुः ।
तस्य तस्माद्वा तद्धेतोरिति । तस्य धर्मप्रविचयस्यार्थे हि धर्मोपदेशहेतुको धर्मप्रविचयः ।
कथं नाम धर्मप्रविचयः स्यादित्यभिधर्म उपदिष्टः शास्त्रा बुद्धेनात एव । न हि वि- 7.9 (3a–2)
नाभिधर्मोपदेशेन शिष्यः शक्तो धर्मान्प्रविचययितुमिति । उदित इति वदेर्निष्ठायां
कृतसंप्रसारणस्यैतद्रूपम् । न विणा उत्पूर्वस्य ' अर्थायोगात् । उदित इत्युक्त उपदिष्ट

7.9 (3a–2) इत्येको ऽर्थः । किलेति किलशब्दः पराभिप्रायं द्योतयति ' आभिधार्मिकाणामेतन्म-
तं ' न त्वस्माकं सौत्रान्तिकानामिति भावः । श्रूयन्ते ह्यभिधर्मशास्त्राणां कर्तारः । तद्य-
था ' ज्ञानप्रस्थानस्य आर्यकात्यायनीपुत्रः कर्ता । प्रकरणपादस्य स्थविरवसुमित्रः ।
विज्ञानकायस्य स्थविरदेवशर्मा । धर्मस्कन्धस्य आर्यशारिपुत्रः । प्रज्ञप्तिशास्त्रस्य आर्य-
मौद्गल्यायनः । धातुकायस्य पूर्णः । संगीतिपर्यायस्य महाकौष्ठिलः ॥ कः सौत्रान्ति-
कार्थः । ये सूत्रप्रामाणिका न तु शास्त्रप्रामाणिकास्ते सौत्रान्तिकाः । यदि न शास्त्र-
प्रामाणिकाः कथं तेषां पिटकत्रयव्यवस्था ' सूत्रपिटको विनयपिटको ऽभिधर्मपिटक
इति । सूत्रे ऽपि ह्यभिधर्मपिटकः पठ्यते ' त्रैपिटको भिक्षुरिति । नैष दोषः । सूत्र-
विशेषा एव ह्यर्थविनिश्चयादयो ऽभिधर्मसंज्ञा ' येषु धर्मलक्षणं वर्ण्यते । एतदाशङ्का-
7.11 (3a–3) निवृत्त्यर्थमाह ' स तु प्रकीर्ण उक्तो भगवतेति विस्तरः । यथा स्थविर-
धर्मत्रातेन उदाना ' अनित्या बत संस्कारा इत्येवमादिका विनेयवशात्तत्र तत्र सूत्र
उक्ता वर्गीकृता एकस्थीकृताः ' एवमभिधर्मो ऽपि धर्मलक्षणोपदेशस्वरूपो विनेयवशा-
त्तत्र तत्र भगवतोक्तः । स्थविरकात्यायनीपुत्रप्रभृतिभिर्ज्ञानप्रस्थानादिषु पिण्डीकृत्य
स्थापित इत्याहुर्वैभाषिकाः । विभाषया दीव्यन्ति चरन्ति वा वैभाषिकाः । विभाषां वा
विदन्ति वैभाषिकाः । उक्थादिप्रक्षेपाट्ठक् ॥ ३ ॥

8.1 (3a–7) सास्रवानास्रवा धर्मा इति । सहास्रवैः सास्रवाः । न सन्त्यास्रवा एष्वित्यना-
स्रवाः । सास्रवाश्चानास्रवाश्चेति समासः । स्वसामान्यलक्षणधारणाद्धर्माः । एवं सर्वधर्मा-
णां समासनिर्देश इति । एतावन्तो धर्मा यदुत सास्रवाश्चानास्रवाश्च । नैतद्व्यतिरिक्ता
धर्माः सन्ति । तस्मादाह ' सर्वधर्माणामिति । समासनिर्देश इति संक्षेपनिर्देशः । विस्तर-
निर्देशस्तु पश्चादा शास्त्रपरिसमाप्तेर्भविष्यति । अन्ये ऽपि समासनिर्देशाः सन्ति । संस्कृ-
तासंस्कृता रूप्यरूपिणः सनिदर्शनानिदर्शना इत्येवमादयः । किमर्थमयमेव समासनिर्देश
उक्तः । यस्मिन्नुक्ते न पर्यनुयोगः । अथवा सांक्लेशिकव्यावदानिकपक्षप्रदर्शनार्थं ' तदर्थ-
त्वाच्छास्त्रस्य । तत्पक्षद्वयावबोधे हि संक्लेशपक्षमपहाय व्यवदानपक्षासेवनान्निःश्रेय-
8.4 (3a–7) सावाप्तिर्भवेत् । संस्कृता मार्गवर्जिताः सास्रवा इति संस्कृता एव ' नासंस्कृताः ।

हेतुप्रत्ययजनिता रूपादयः संस्कृताः। किं सर्वे। नेत्याह ' मार्गवर्जिताः। मार्गसत्येन वर्जिताः। मार्गसत्यस्य संस्कृतत्वात्प्रसङ्ग इत्यत एवं विशिनष्टि। एतदुक्तं भवति ' मार्गसत्यं वर्जयित्वा सर्वे संस्कृताः सास्रवा इति॥ कथं पुनस्ते सास्रवाः। यद्यास्रवसंप्रयोगात् ' क्लिष्टा एव चित्तचैत्ताः सास्रवाः स्युर्नान्ये। अथास्रवसहोत्पादात्। एकस्यां संततौ समुदाचरत्क्लेशस्य सत्त्वस्य यथासंभवं पञ्चोपादानस्कन्धाः सास्रवाः स्युः ' नासमुदाचरत्क्लेशस्य ' नापि बाह्या धर्माः। अथास्रवाणां य आश्रयास्ते सास्रवा इति। षडेवायतनान्याध्यात्मिकानि सास्रवाणि स्युः। अथास्रवाणामालम्बनानि सास्रवाणि। निरोधमार्गसत्यमपि सास्रवं प्राप्नोति ' ऊर्ध्वा च भूमिरूर्ध्वभूम्यालम्बनैरास्रवैः सास्रवा स्यादिति। अत आह ' आस्रवास्तेषु यस्मात्समनुशेरत इति। तस्मात्सास्रवा 8.5 (3b–2)
इति पूर्वमेवाध्याहार्यस्तस्माच्छब्दः। अनुशेरत इति पुष्टिं लभन्त इत्यर्थः। प्रतिष्ठां लभन्त इत्यर्थो वा। पुष्टिलाभे प्रतिष्ठालाभे वा ते रागादयः संतायन्ते। अपरे व्याचक्षते। यथानुशेते ममायमाहार इति पथ्यो ऽनुगुणीभवतीत्यर्थः ' तथा रागादयो ऽपि तेषु धर्मेष्वनुशेरते ऽनुगुणीभवन्तीत्यर्थः। रागाद्यभिष्यन्दितकर्मनिर्वर्तिता हि सास्रवा धर्माः। कर्मजं लोकवैचित्र्यमिति वचनात्। प्रत्ययानुगुण्येनानुशेरते पुष्टिं लभन्त इत्यनुशयाः। अनुशेरते ऽनुगुणा वर्तन्ते प्रत्यया एष्विति वानुशयाः। अनुशयनं चैषामालम्बनतः संप्रयोगतो वा द्रष्टव्यम्। गुणमतिस्त्वाचार्य इह व्याचष्टे। किं कारणं यत्सर्वधर्मेष्वास्रवाणामालम्बनीभवेषु संस्कृता एव मार्गवर्जिताः सास्रवा उच्यन्त इति सर्वे धर्मा आस्रवाणामालम्बनमिति। अनाभिधर्मिकीयमेतत्। आकाशप्रतिसंख्यानिरोधयोरास्रवानालम्बनत्वात्। षडेव ह्यनुशया ऽनास्रवालम्बनाः पठ्यन्ते। ते च निरोधमार्गालम्बना एव।

मिथ्यादृग्विमती ताभ्यां युक्ताविद्याथ केवला।
निरोधमार्गदृग्घेयाः षडनास्रवगोचराः॥

इति वचनात्। तस्मान्न सुलिखितमेतदिति पश्यामः। काममिति यद्यपीत्यर्थः। अथवा काममिति निपातो ऽभ्युपगमार्थः। अभ्युपगम्यत एव निरोधमार्गसत्यालम्बना अपि

8.10 (3b-4) सास्रवा उपज्ञायन्त इत्यर्थः। तत्र निरोधमार्गसत्ययोः॥ अनुशयनिर्देश एव ज्ञापयिष्याम इति।

नानास्रवोर्ध्वविषया अस्वीकाराद्विपक्षतः।

इत्यत्र। यद्धि वस्त्वात्मदृष्टितृष्णाभ्यां स्वीकृतं भवति तत्रान्ये ऽप्यनुशया अनुशयितुमुत्सहन्ते। आर्द्र इव पटे रजांसि संस्थातुम्। न चैवमनास्रवम्। नाप्यूर्ध्वभूमिः। अतो न तदालम्बनास्तेष्वनुशेरते। विपक्षभूतौ च निर्वाणमार्गौ तदालम्बनानां क्लेशानां, ऊर्ध्वा च भूमिरधराणाम्। अतो ऽपि न तेषु प्रतिष्ठां लभन्ते। तप्त इवोपले तलानि पादानामिति॥ ४॥

8.17 (3b-4) अनास्रवा मार्गसत्यं त्रिविधं चाप्यसंस्कृतमित्यर्थापत्तिसिद्धत्वान्न सूत्रयितव्यमेतदित्येवं चोद्ये, आचार्यगुणमतिस्तावदाह। वक्तव्यमेवेदम्। किं कारणम्। द्विविधो हि मार्गो लौकिको लोकोत्तरश्च। अतो विशेषार्थं पुनरभिधीयते। अत एव चात्र मार्गसत्यग्रहणम्। प्रसिद्धं चार्थापत्त्या गम्यते नाप्रसिद्धम्। अप्रसिद्धं चासंस्कृतमिति। अपरे व्याचक्षते। तृतीयराश्याशङ्कानिवृत्त्यर्थमर्थापत्तिसिद्धमप्येतत्पुनरुच्यते। यथा हि तिस्रो वेदना भवन्ति सुखा दुःखा अदुःखासुखा वेति, एवं धर्मा अपि संभाव्येरन्, सास्रवा अनास्रवाः सास्रवानास्रवाश्चेति। अथवा नैव सास्रवा नानास्रवाश्चेति। तेन ये ऽर्थापत्त्या निरस्ताः किं ते ऽनास्रवा एव, उताहो सास्रवानास्रवा एव, आहोस्विन्नोभयथेति संदिह्येत। अस्ति हि सास्रवानास्रवत्वविकल्पावकाशः। कथमिति। वैभाषिकप्रक्रियया तावत्।

द्विधा सानुशयं क्लिष्टमक्लिष्टमनुशायकैः।

इति वचनात्। ये चक्षुरादयो बाह्या वा रूपादयो ऽक्लिष्टास्ते ऽनुशयानैरेवास्रवैः सास्रवाः, नाननुशयानैः। प्रहीणैस्तैरननुशयानैरास्रवैर्न सास्रवाः, अप्रहीणैस्त्वन्ततः परसंतानगतैरपि सास्रवा एवेति। दार्ष्टान्तिकप्रक्रिययापि च, चक्षुरादयो ऽर्हत्संतानगता बाह्याश्च रूपादयो ऽनास्रवाः, आस्रवाणामनाश्रयत्वात्। सास्रवाश्च ते, आस्रवाणामप्रतिपक्षत्वादिति पार्यायिकं सास्रवानास्रवत्वं चक्षुरादीनां कल्प्यत इति संदेहः।

तत्संदेहविनिवृत्त्यर्थमिदमुच्यते । अनास्रवा मार्गसत्यं त्रिविधं चाप्यसंस्कृतमिति निष्पर्यायमनास्रवा एवामी ' न सास्रवा यथोक्तमिति पुनर्वचनम् । ते तर्ह्यर्हच्चक्षुरादयो वैभाषिकैः क्व पक्षे निक्षेप्तव्याः । किं सास्रवपक्षे ' अथानास्रवपक्ष इति । सास्रवपक्ष इति त आहुः । कथं प्रहीणैरास्रवैस्ते सास्रवा व्यवस्थाप्यन्ते । येष्वास्रवा अनुशेरते ऽनुशयितवन्तो ऽनुशयिष्यन्ते वा ते सास्रवाः । त्रैकालिकार्थविवक्षयापि हि लोके वर्तमानकालप्रयोगो दृश्यते । यः प्रजा रक्षति स राजेति । यो ऽपि रक्षितवान्यो ऽपि रक्षिष्यति स चापि राजेति गम्यत एवेति ' अत एवं व्याख्यायते । अथवा यद्यपि ते प्रहीणैरास्रवैर्न सास्रवा अप्रहीणैस्त्वपरिमितैरास्रवैरन्ततः परसंतानगतैरपि सास्रवा एव भवन्ति । ननु च समासनिर्देशादेव सास्रवानास्रवा धर्मा इति तृतीयराश्यप्रसङ्गः । न ' तत्रैकशेषनिर्देशसंभवात् । सास्रवाश्चानास्रवाश्च सास्रवानास्रवाश्चेति सास्रवानास्रवा इत्येकशेषः । असद्रूपाणामप्येकशेष इष्यते । गुणो यङ्लुकोरिति यथा । अपरे पुनराहुः । अर्थापत्त्या सिद्धमेवैतत् । स्पष्टीकरणार्थं तु प्रपञ्च उच्यते । तद्यथा ' विशेषणं विशेष्येण बहुलमित्यनेनैव सर्वं सिद्धम् । पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेनेत्येवमादिप्रपञ्च उच्यते । तद्वदेतत् ॥ कतमत्त्रिविधमसंस्कृतमित्यप्रतीतत्वात्पृच्छति । 8.18 (3b—5)
त्रिविधग्रहणमियत्तावधारणार्थम् । सन्ति हि केचिदेकमेवासंस्कृतं निर्वाणमित्याहुर्यथा वात्सीपुत्रीयाः । परमाण्वादयो बहवो ऽसंस्कृता इति वैशेषिकाः । तन्मतप्रतिषेधार्थमियत्तावधारणम् । कतमौ द्वाविति प्रतिसंख्याऽप्रतिसंख्यानिरोधावेव पृच्छति ' नाकाशं ' आकाशस्य लोके प्रसिद्धत्वात् । तत्राकाशमनावृतिरिति । तत्रेति निर्धारणे 9.6 (3b—7)
वाक्योपन्यासे वा । अवकाशं ददातीत्याकाशमिति निर्वचनम् । भृशमस्यान्तःकाशन्ते भावा इत्याकाशमित्यपरे । अनावृतिरनावरणम् । कर्तृसाधनं कर्मसाधनं वा । यो धर्मो ऽन्यान्धर्मान्नावृणोति ' अन्यैर्वा नाव्रियते ' तदनावरणस्वभावमाकाशम् । तदप्रत्यक्षविषयत्वादन्यधर्मानावृत्त्यानुमीयते । न त्वावरणाभावमात्रम् । अत एव च व्याख्यायते ' यत्र रूपस्य गतिरिति । यदि यन्नावृणोति नाव्रियते वा तदाकाशं ' अप्रतिघा अपि चित्तादयः संस्कारास्तथैवेत्याकाशं प्राप्नुवन्ति । न प्राप्नुवन्ति । परेषामावरणाभावात् । ऋद्धिमन्तो हि चित्त-

चैत्तबलेन परेषां गतिं चित्तादीन्वा विबध्नन्ति। प्रतिसंख्याऽप्रतिसंख्यानिरोधौ तर्ह्यविबन्धकत्वादाकाशं प्राप्नुतः। न, तयोः संयोगद्रव्यानुत्पत्तिधर्माणां संयोगप्राप्तिनियतरोधभूतत्वेनोत्पत्तिविघ्नरोधभूतत्वेन वावरणभूतत्वात्। अथवा यस्यानावरणेन लक्षणं नान्यल्लक्षणं तदाकाशम्। तयोश्चान्यल्लक्षणमस्तीति न तौ निरोधावाकाशं प्राप्नुतः। असर्वगतं तर्ह्याकाशमनित्यं वा प्राप्नोति। आवरणाभावे भावात्तद्भावे चाभावात्। कुड्यादिषु ह्यन्यरूपस्यावरणं भवतीति, अत्राकाशलक्षणाभावप्रसङ्गः। कुड्याद्यपगमे च पुनस्तद्भवतीत्यनित्यं प्राप्नोति। नानित्यं प्राप्नोति। तत्रापि कुड्याद्यवकाशदानादाकाशमस्त्येव। यदि हि तत्राकाशं न स्यात्, तस्यैव कुड्यादेरनवकाशत्वादवस्थानं न स्यात्। यत्तु तत्र रूपान्तरस्यानवस्थानं तत्कुड्याद्यावरणाद्, नाकाशाभावात्। उक्तं हि भगवता। पृथिवी भो गौतम कुत्र प्रतिष्ठिता। पृथिवी ब्राह्मण अब्मण्डले प्रतिष्ठिता। अब्मण्डलं भो गौतम क्व प्रतिष्ठितम्। वायुप्रतिष्ठितम्। वायुर्भो गौतम क्व प्रतिष्ठितः। आकाशे प्रतिष्ठितः। आकाशं भो गौतम कुत्र प्रतिष्ठितम्। अतिसरसि महाब्राह्मण, अतिसरसि महाब्राह्मण, आकाशं ब्राह्मण अप्रतिष्ठितं, अनालम्बनमिति विस्तरः। तस्मादस्त्याकाशमिति वैभाषिकाः॥ ५॥

9.12 (3b–9) यो विसंयोग इति विशेषणेनानित्यतानिरोधो ऽप्रतिसंख्यानिरोधश्च व्युदस्तौ भवतः। न हि विसंयोगलक्षणौ तौ निरोधौ। विसंयुक्तिर्विसंयोगः क्लेशविसंयुक्ति-
9.14 (3b–10) लक्षणः। संयोगप्राप्तिनियतरोधभूतो वा यो धर्मः स प्रतिसंख्यानिरोधः॥ दुःखादीनामार्यसत्यानामिति विशेषणपरिग्रहात्प्रतिसंख्यानमनास्रवैव प्रज्ञा गृह्यते। न हि
9.15 (3b–10) लौकिकी प्रज्ञा दुःखसत्याद्याकारा, किं तर्ह्युत्तराधरभूमिशान्ताद्युदाराद्याकारा। प्रज्ञाविशेष इति विशेषग्रहणं क्लेशप्रहाणानन्तर्यमार्गप्रज्ञाग्रहणार्थम्। तेन प्रज्ञाविशेषेण प्राप्यो निरोध इति प्रतिसंख्यानिरोधः। मध्यपदलोपं कृत्वेति। शाकपार्थिवादीनामुपसंख्यानं, शाकप्रियाः पार्थिवाः शाकपार्थिवा इतोष्या मध्यपदलोपः। यदि प्रतिसंख्यानास्रवैव प्रज्ञा गृह्यते लौकिकमार्गप्राप्यो निरोधो न गृह्णीत इत्यव्यापि लक्षणं प्राप्नोति। नाव्यापि। सर्वो हि त्रैधातुकसास्रववस्तुनिरोधो ऽनास्रवया प्रज्ञया प्राप्यते। न

स निरोधोऽस्ति यो लौकिक्यैव प्रज्ञया प्राप्यते नानास्रवयेति किं लौकिक्या प्रज्ञया
प्रयोजनम्। यो हि लौकिकेन मार्गेण कश्चिन्निरोधः प्राप्यते स एव पुनर्लोकोत्तरेण
प्राप्यत एवेति लोकोत्तरैव प्रज्ञा तत्त्वं न लौकिकी। द्रव्यसन्प्रतिसंख्यानिरोधः, सत्यच-
तुष्टयनिर्देशनिर्दिष्टत्वाद्, मार्गसत्यवदिति वैभाषिकाः॥ पृथक्पृथगिति नानेत्यर्थः। या- 10.2 (4a—2)
वन्ति हि संयोगद्रव्याणीति। संयुक्तिः संयोगः। संयोगाय द्रव्याणि संयोगद्रव्याणि।
संप्रयुज्यन्ते तेष्विति वा संयोगाः। संयोगाश्च ते द्रव्याणि चेति संयोगद्रव्याणि, सास्रवद्र-
व्याणीति यावदुक्तं भवति। सास्रवं हि द्रव्यं स्तम्भस्थानीयं, संप्रयोजनं रज्जुस्थानीयं,
पुद्गलस्तु बलीवर्दस्थानीय इति भगवतोक्तम्। अन्यथेति पच्चेक इत्यर्थः। सर्वक्लेश- 10.5 (4a—3)
निरोधसाक्षात्क्रियेति समुदयादिदर्शनभावनाहेयक्लेशनिरोधप्राप्तिरित्यर्थः। शेषप्रति- 10.6 (4a—4)
पक्षभावनावैयर्थ्यमिति। शेषक्लेशसमुदयादिदर्शनभावनाप्रहातव्यात्मकप्रतिपक्षमार्गो-
त्पादनं निष्प्रयोजनमित्यर्थः। यत्तर्ह्युक्तमसभागो निरोध इति। क्वोक्तम्। सूत्रे। पूर्व- 10.7 (4a—5)
भर्त्रा विशाखेन गृहपतिना पृष्टया धर्मदिन्नया भिक्षुण्योक्तम्। किं सभाग आर्ये निरोधः।
असभाग आयुष्मन्विशाखेति। अप्रतिसदृशो निरोध इत्यर्थः। अभिसमीक्ष्य पृच्छति,
अस्य कोऽर्थ इति। बहुत्वे हि सति प्रतिसदृशोऽन्यतमो भवेदिति परस्याभिप्रायः। नास्य 10.8 (4a—5)
कश्चित्सभागहेतुरिति। सभागहेतुः सभाग इत्येकोऽर्थो हेतुशब्दलोपात्। दृश्यन्ते हि
पदेषु पदैकदेशान्प्रयुञ्जाना वाक्येषु च वाक्यैकदेशान्। तद्यथा सत्यभामा भामा, देवदत्तो
दत्तः, प्रविश पिण्डीं, प्रविश तर्पणमिति। नित्यः खलु प्रतिसंख्यानिरोधः। तस्य किं
सभागहेतुना प्रयोजनमित्यसभागहेतुरसभागः। नास्ति सभागोऽस्येत्यसभागो बहुव्री-
हिसमासः। नासौ कस्यचिदिति। नासौ प्रतिसंख्यानिरोधः कस्यचिदन्यस्य धर्मस्य 10.9 (4a—5)
सभागहेतुरित्यधिकृतम्। किं कारणम्। संस्कृत एवेति सभागहेतुरिष्यते। तत्र न
सभागोऽसभाग इति तत्पुरुषः। न तु नास्य कश्चित्सभागोऽस्तीति। न त्वस्य निरो-
धस्य कश्चिदन्यो निरोधः सदृशो न भवतीत्यर्थः॥ उत्पादात्यन्तविघ्नोऽन्यो निरोधो 10.11 (4a—7)
ऽप्रतिसंख्यया। अनागतानां धर्माणामुत्पादस्यात्यन्तं विघ्नोऽत्यन्तविघ्नोऽत्यन्तनिय-
तरोधः। अन्य इत्यप्रतिसंख्यानिरोधः। स हि प्रतिसंख्यानिरोधादनन्तरोक्तादन्यः। 10.13 (4a—7)

अप्रतिसंख्ययेति प्रसज्यप्रतिषेधे ऽयमकारः । न प्रतिसंख्यया प्राप्य इत्यर्थः । अथवा पर्युदासे , प्रतिसंख्याया यदन्यत्प्रत्ययवैकल्यं साप्रतिसंख्या , तया प्राप्यो निरोधो ऽप्रतिसंख्यानिरोधः , मध्यपदलोपात् । अयुक्तमेतत् । प्रत्ययवैकल्यं ह्यभावः । कथमभावेन स निरोधः प्राप्यत इति । औपचारिकत्वाददोषः । अथवाप्रतिसंख्यानिरोध इति न प्रतिसंख्यानिरोधो ऽप्रतिसंख्यानिरोधः । प्रतिसंख्यानिरोधादन्यत्वमात्रमेवोच्यते , न तु प्रत्ययवैकल्यस्य व्यापार इति । उत्पादग्रहणमनित्यतानिरोधव्युदासार्थम् । अनित्यतानिरोधो हि धर्मस्थितेरत्यन्तविघ्नो , न धर्मोत्पादस्य । अत्यन्तग्रहणमसंज्ञिनिरोधसमापत्त्यसंज्ञिकव्युदासार्थम् । तानि ह्यनागतानां चित्तचैत्तानामुत्पादविघ्नो न त्वत्यन्तं , तावत्का-
10.16 (4a—8) लिकत्वात्तद्विघ्नभावस्य ॥ यथैकरूपव्यासक्तचक्षुर्मनस इति विस्तरः । यथेत्युदाहरणकथनम् । यथैकस्मिन्नीले रूपे व्यासक्तं चक्षुर्मनश्च यस्य स एकरूपव्यासक्तचक्षुर्मनाः । तस्य यानि रूपान्तराणि , गृह्यमाणान्नीलादन्यानि नीलान्तरपीतलोहितावदातादीनि वर्णरूपाणि संस्थानरूपाणि च , शब्दगन्धरसस्प्रष्टव्यानि च सर्वाणि । अत्ययन्ते प्रत्युत्पन्न-
10.1 (4a—9) मध्वानमतिक्रामन्ति । अतीतमध्वानं प्रतिपद्यन्त इत्यर्थः । तदालम्बनैरिति । तानि नीलान्तरादीन्यनन्तरोक्तान्यालम्बनान्तराणि येषां ते तदालम्बनाः । के । पञ्च विज्ञानका-
10.19 (4a—9) याः । तैर्न शक्यमुत्पत्तुमिति भावसाधनमेतत् । न हि ते समर्था इति विस्तरः । न हि ते पञ्च विज्ञानकाया अतीतं विषयं स्वालम्बनमपि शक्ता ग्रहीतुं , वर्तमानालम्बनत्वात्पञ्चानां विज्ञानकायानाम् । अथान्यदिदानीं नीलान्तरादिकं वर्तमानमालम्ब्य कस्मान्नोत्पद्यन्ते । न शक्यमेवं भवितुम् । सर्वधर्माणां चतुष्के नियतत्वात् । हेतौ फल आश्रय आलम्बने चेति । यस्य विज्ञानस्य यदालम्बनं तदेव तस्यालम्बनं भवेद् , भवेन्नान्यदिति । आलम्बनप्रत्ययवैकल्यात्तु पञ्च विज्ञानकाया न पुनरुत्पद्यन्ते । अत आह ।
10.20 (4a—10) स तेषामप्रतिसंख्यानिरोध इति विस्तरः । तेषां पञ्चानां विज्ञानकायानां प्रत्ययवैकल्यात्प्राप्यत आलम्बनप्रत्ययवैकल्यात् । चतुर्भिरेव हि प्रत्ययैर्हेतुसमनन्तरालम्बनाधिपतिप्रत्ययैश्चित्तचैत्ता उत्पद्यमाना उत्पद्यन्ते । तेषामन्यतरवैकल्ये ऽप्यनुत्पत्तिः । समनन्तरप्रत्ययवैकल्यादित्यपरे । समनन्तरप्रत्ययो हि तदानीं चित्तचैत्तलक्षण एकस्यैव

तस्य नीलविज्ञानस्योत्पत्ताववकाशं ददाति , नेतरेषां नीलान्तरादिविज्ञानानां , युग-
पद्विज्ञानोत्पत्त्यसंभवात् । उदाहरणमात्रं चैतत् । एवं नान्तिलाभ्यादीनां पञ्चानामप्या-
पायिकानामनागतानां स्कन्धानां तदुत्पत्तिविरुद्धप्रत्ययसंमुखीभावेन प्रत्ययवैकल्याद्-
प्रतिसंख्यानिरोधः प्राप्यत इत्युदाहार्यम् । अप्रतिसंख्यानिरोधमेव वाभिसंधाय स्रोतआ-
पन्नं पुद्गलमधिकृत्योक्तं भगवता , निरुद्धा अस्य नरकास्तिर्यञ्चः प्रेता इति । तदेवंजा-
तीयकानामनागतानां धर्माणां प्रत्ययवैकल्यात्प्रतिसंख्यामन्तरेणोत्पादस्य नियतरोध-
भूतो यो धर्मः सोऽप्रतिसंख्यानिरोध इत्युच्यते ॥ न हि प्रत्ययवैकल्यमात्रादत्यन्तं तद-
नुत्पत्तिरुपपद्यते , पुनस्तज्जातीयप्रत्ययसांनिध्ये तदुत्पत्तिप्रसङ्गात् , को हि तदा
तदुत्पत्तौ विबन्धः स्यादिति वैभाषिकाः ॥ चतुष्कोटिकं चात्रेति विस्तरः । अत्र 11.1 (4b-1)
प्रतिसंख्याऽप्रतिसंख्यानिरोधलक्षणनिर्देशे चतुष्कोटिकं चतुष्प्रकारं प्रश्नविसर्जनम् । कि-
मर्थम् । व्युत्पादनार्थम् ॥ तद्यथातीतप्रत्युत्पन्नोत्पत्तिधर्माणां सास्रवाणामिति 11.3 (4b-1)
सास्रवत्वात्प्रतिसंख्यानिरोध एव लभ्यते । अतीतप्रत्युत्पन्नानामुत्पादस्य कृतत्वात् ,
उत्पत्तिधर्माणां चावश्यंभावान्नाप्रतिसंख्यानिरोधो लभ्यते । उत्पादात्यन्तविघ्नलक्षणो
ह्यप्रतिसंख्यानिरोधः । तद्यथानुत्पत्तिधर्माणामनास्रवसंस्कृतानामिति । अत्यन्त- 11.5 (4b-2)
विघ्नितोत्पादत्वादेषामनुत्पत्तिधर्मत्वम् । अतश्च तेषामप्रतिसंख्यानिरोधो लभ्यते । तद्यथा
षड्भूमिकानामनागम्यध्यानान्तरध्यानभूमिकानां श्रद्धानुसारिमार्ग एकस्मिन्संमुखीभूते
शेषानां पञ्चानामप्रतिसंख्यानिरोधो लभ्यते । न तु प्रतिसंख्यानिरोधोऽनास्रवत्वात् ।
न हि निर्दोषं प्रहाणार्हं भवति । अनुत्पत्तिधर्मग्रहणमतीतप्रत्युत्पन्नोत्पत्तिधर्मनिरा-
सार्थम् । अनास्रवग्रहणं सास्रवनिरासार्थम् । संस्कृतग्रहणमसंस्कृतग्रहणनिरासार्थम् ।
असंस्कृतमपि हि स्वभावतोऽनुत्पत्तिधर्मकं , अतस्तत्प्रसङ्गो मा भूदिति तद्विशेषणम् ।
केषांचिदेवं पाठः , तद्यथानुत्पत्तिधर्माणामनास्रवाणामिति । तेषां कथमसंस्कृतानां ग्रहणा-
प्रसङ्गः । न भवति । येषां धर्माणां प्रतिसंख्यानिरोधोऽप्रतिसंख्यानिरोधो वा संभवति
तेषामधिकारः । न चासंस्कृतानां तौ निरोधौ संभवतः । उत्पादात्यन्तविघ्नो ह्यप्रतिसं-
ख्यानिरोधः । न चासंस्कृतानामुत्पादोऽस्ति । किं चानुत्पत्तिधर्माणामिति पर्युदासेन

नञ्समासः। उत्पत्तिधर्मेभ्यो ये ऽन्ये तत्सदृशाश्च धर्मास्ते ऽनुत्पत्तिधर्माणः। के च
तादृशाः। संस्कृता एव नासंस्कृता इत्यप्रसङ्गो ऽसंस्कृतानामिति ब्रुवते ॥ सन्ति
11.7 (4b–2) येषामुभयमिति प्रतिसंख्यानिरोधश्चाप्रतिसंख्यानिरोधश्च। तद्यथा सास्रवाणामिति
विस्तरः। सास्रवत्वात्तेषां प्रतिसंख्यानिरोधः प्राप्यते। अनुत्पत्तिधर्मत्वादप्रतिसंख्यानि-
रोधो ऽपि प्राप्यते। यदा तदानयोः प्राप्तिरभिप्रेयते ' नावश्यमनयोर्युगपत्प्राप्तिर्भवति।
केषांचिद्धि पूर्वं प्रतिसंख्यानिरोधः प्राप्यते ' पश्चादप्रतिसंख्यानिरोधः। तद्यथार्हत
एकरूपव्यासक्तचक्षुर्मनसस्तदन्यरूपाद्यालम्बनानां पञ्चानां विज्ञानकायानाम्। केषांचि-
त्पूर्वमप्रतिसंख्यानिरोधः प्राप्यते ' पश्चात्प्रतिसंख्यानिरोधः। तद्यथा क्षान्तिलाभिनो
ऽपायगतीनाम्। केषांचिद्युगपत्। तद्यथा दृष्टप्राप्तस्याधिमात्राधिमात्रक्लेशप्रतिपक्षोदये
तेषामधिमात्राणामनागतानां क्लेशानां प्रतिसंख्यानिरोधश्चाप्रतिसंख्यानिरोधश्च युगप-
11.9 (4b–4) त्प्राप्येते। एवमन्येषामपि संभवतो योज्यम्॥ तद्यथातीतप्रत्युत्पन्नोत्पत्तिधर्माणा-
मनास्रवाणामिति। अतीतादीनामेषामुत्पादस्य विघ्नयितुमशक्यत्वादप्रतिसंख्यानिरोधो
न लभ्यते। अनास्रवत्वाच्चैषां प्रतिसंख्यानिरोधो ऽपि न लभ्यते। असंस्कृतानां तूत्पादा-
भावान्नाप्रतिसंख्यानिरोधो ऽस्ति। उत्पादात्यन्तविघ्नो ह्यप्रतिसंख्यानिरोध इत्युक्तं
प्राक्। अनास्रवत्वाच्च प्रतिसंख्यानिरोधो ऽपि नास्ति ॥ ६ ॥

एवमसंस्कृतस्याल्पवक्तव्यत्वात्पुरस्तात्तत्प्रश्नान्परिसमाप्य संस्कृतान्निर्देष्टुकाम
11.12 (4b–4) उपोद्घातमुत्थापयति ' यदुक्तं संस्कृता मार्गवर्जिताः सास्रवा इति कतमे ते संस्कृ-
11.18 (4b–5) ता इति। ते पुनः संस्कृता धर्माः। पुनःशब्दः प्रभेदान्तरप्रदर्शनार्थः। उक्तः पूर्वप्रभेदः
सास्रवानास्रवा इति। अयं तु पुनःप्रभेद इति। असंस्कृतनिर्देशेन व्यवहितत्वात्पुनः
संस्कृतग्रहणमसंस्कृतनिरासार्थम्। त इति तच्छब्दः पूर्वप्रकृतापेक्षः। के च पूर्वप्रकृताः।
अवर्जिताश्च ये सास्रवाः। वर्जिताश्च ये मार्गसत्यस्वभावाः। उभये ह्यपेक्षिताः। कथं
गम्यते। ये सास्रवा उपादानस्कन्धास्त इत्यनास्रवेभ्यः सास्रवनिष्कर्षवचनात्। यद्रू-
पादिस्कन्धपञ्चकं वक्ष्यमाणलक्षणं ते ऽमी संस्कृता द्रष्टव्याः ' अन्योन्यमेषां संग्रहः।
रूपादिग्रहणं शीलादिस्कन्धनिरासार्थम्। अन्ये ऽपि हि पञ्च स्कन्धाः सन्ति। शी-

लस्कन्धः समाधिस्कन्धः प्रज्ञास्कन्धो विमुक्तिस्कन्धो विमुक्तिज्ञानदर्शनस्कन्धश्चेति।
स्कन्धग्रहणं रूपादिविषयनिरासार्थम्॥ समेत्य संभूयेति पर्यायावेतौ। अथवा समेत्य 12.4 (4b–9)
समागम्यान्योन्यमपेक्ष्येत्यर्थः। संभूय संहन्येत्येवं संशब्दस्यार्थं दर्शयति। न ह्येकप्रत्य-
यजनितमिति सर्वाल्पप्रत्ययत्वे ऽप्यवश्यं द्वौ प्रत्ययौ स्तः।

चतुर्भिश्चित्तचैत्ता हि समापत्तिद्वयं त्रिभिः।
द्वाभ्यामन्ये तु जायन्ते।

इति वचनात्। दुग्धवदिति संस्कृतशब्दस्य निष्ठान्तत्वान्निष्ठान्तशब्देनैव दृष्टान्तं 12.6 (4b–10)
दर्शयति। दुग्धवदिति दुग्धं नाम क्षीरम्। यत्स्तनान्निष्कासितं तद्दुग्धमिति न्याय्यम्।
यत्तु निष्कासिष्यते यच्च नैव निष्कासिष्यते धेनुस्थमेव वर्तते तद्दुग्धमिति न प्राप्तम्।
उच्यते च लोके दुग्धमिति। एवमिहापि ये संस्करिष्यन्त उत्पत्तिधर्माणो ऽनागता ये
ऽपि न संस्करिष्यन्ते ऽनुत्पत्तिधर्माणस्ते ऽपि संस्कृता इत्युच्यन्ते। तज्जातीयत्वात्स्वल-
क्षणसादृश्यात्॥ त एवाध्वेति विस्तरः। सर्वाभिधर्मः सूत्रार्थः सूत्रनिष्कर्षः सूत्रव्या- 12.7 (4b–10)
ख्यानमिति। सूत्रोक्तानामप्यध्वादीनां स्कन्धपर्यायरूपाणामिह वचनम्। गतगच्छद्गमि-
ष्यदिति लोके प्रसिद्धमध्वानमपेक्ष्यायमध्वा व्याख्यातः। तथा हि लोके कथ्यते। अय-
मध्वा ग्रामं गतो ऽयमध्वा गच्छत्ययमध्वा गमिष्यतीति। एवमिहापि गतो ऽध्वा यो ऽतीतो
गच्छति यो वर्तमानो गमिष्यति यो ऽनागत इति। अद्यन्ते ऽनित्यतयेति वा। अध्वान इत्य-
धिकृतम्। नैरुक्तं विधानमपेक्ष्यायमर्थो दर्शितः। अद्यन्ते ऽनित्यतया भक्ष्यन्त इत्यध्वान इति
संस्कृता एवाध्वशब्देन भगवता देशिताः॥ कथावस्तुशब्देनापि त एव संस्कृता भगवता
देशिताः। त्रीणीमानि भिक्षवः कथावस्तून्यचतुर्थान्यपञ्चमानि यान्याश्रित्यार्याः कथां
कथयन्तः कथयन्ति। कतमानि त्रीणि। अतीतं कथावस्त्वनागतं कथावस्तु प्रत्युत्पन्नं
कथावस्त्विति। कथा वाक्यमिति विस्तरः। कथा वाक्यं वर्णात्मकः शब्द इत्यर्थः। 12.9 (5a–1)
तस्या वस्तु नाम विषय इत्यर्थः। नाम्ना पुनरर्थो ऽभिधेयः। तथा हि वक्ष्यति वाङ् ना-
म्नि प्रवर्तते नामार्थं द्योतयतीति। यदि नामैव कथावस्तु। नामैव संस्कारस्कन्धैकदेश
एवेति कथं कृत्वा कथावस्तुशब्देन संस्कृता एवोक्ता इत्यत आह। सार्थकवस्तुग्रह- 12.10 (5a–2)

12.11 (5a–3) णात्तु संस्कृतं कथावस्तूच्यत इति । अन्यथा ह्यीति विस्तरः । यदि सार्थकं वस्तु
न गृह्येत प्रकरणग्रन्थो विरुध्येत ' कथावस्तून्यष्टादशभिर्धातुभिः संगृहीतानी-
ति । कया पुनर्युक्त्या सार्थकं वस्तु गृह्यते । द्विविधः कथाया विषयः ' साक्षात्पारंपर्येण च ।
साक्षाद्विषयो नाम ' पारंपर्येणार्थः । स हि स्वविषयभूतस्य नाम्नो विषय इति । अतस्तस्यापि
विषयो व्यवस्थाप्यते । असंस्कृतं कस्मान्न कथावस्तुत्वेनोक्तम् । अध्वपतितस्य नाम्नो
ऽनध्वपतितेन सहार्थायोगात् । विषयो हेतुरिति वा ' अर्थद्वयवाचकवस्तुशब्दपरिग्रहाद्वा ।
यद्धि कथाया विषयो हेतुः प्रत्ययश्च भवति तत्कथावस्तु । असंस्कृतं तु न हेतुप्रत्ययः
कथाया इति न कथावस्तु । अथवातीतादीनां संस्कृतानामतिबहुरूपत्वेनाख्यातकर-
णायोग्यत्वात् । एवं चैवं च दीपंकरस्तथागतो ऽभूत् । एवं चैवं च मैत्रेयस्तथागतो भवि-
ष्यति । एवं चैवं च राजा कप्फिणो भवतीति । अतः संस्कृता एव कथावस्तुत्वेनोक्ता
12.14 (5a–4) नासंस्कृताः ॥ सर्वस्य संस्कृतस्य निर्वाणमिति निरुपाधिशेषनिर्वाणम् । यद्येवं सा-
स्रवस्य तदस्तीति भवति सास्रवस्य सनिःसारत्वयोगो ' मार्गसत्यस्य तु कथम् । कोलो-
पमं धर्मपर्यायमाजानद्भिर्धर्मा अपि प्रहातव्याः प्रागेवाधर्मा इति मार्गसत्यस्यापि निःसरणं
12.15 (5a–5) कल्पत एवेति सर्व एव संस्कृता सनिःसारा भवन्ति ॥ सवस्तुका इति । वसन्त्य-
स्मिन्प्राक्कार्याणि पश्चात्तत उत्पत्तिरिति । वस्तु हेतुरित्यर्थः । स एषामस्तीति
सवस्तुकाः । प्रवचने हि वस्तुशब्दः पञ्चस्वर्थेषु दृश्यते । स्वभाव आलम्बने संयोजनीये
हेतौ परिग्रहे च । स्वभावे तावत् । यद्वस्तु प्रतिलब्धं समन्वागतः स तेन वस्तुनेति
तेन स्वभावेनेति गम्यते । आलम्बने । ज्ञेया धर्माः कतमे । आह । सर्वे धर्मा ज्ञानेन
ज्ञेया यथावस्तु ' यथालम्बनमित्यर्थः । संयोजनीये । यस्मिन्वस्तुन्यनुनयसंयोजनेन संयुक्ताः
प्रतिघसंयोजनेनापि तस्मिन्निति । हेतौ । सवस्तुका धर्माः कतमे । सर्वे संस्कृता धर्मा
इति । परिग्रहे । क्षेत्रवस्तु गृहवस्त्वापणवस्तु धनवस्तु । परिग्रहं प्रहाय ततः प्रति-
12.17 (5a–5) विरतो भवतीति । इह हेतौ वस्तुशब्दो वेदितव्यो हेतुवचनः ॥ किलेति किलशब्दः
परमतं दर्शयति । स्वमतं त्वस्य लक्ष्यते । सवस्तुकाः सस्वभावाः संस्कृताः । असंस्कृ-
तास्त्ववस्तुकाः ' प्रज्ञप्तिसत्त्वादिति ॥ ७ ॥

त एव पुनः संस्कृता इति ये सास्रवाः पूर्वमुक्ता इति दर्शयति । **ये सास्रवा** 12.19 (5a–6)
उपादानस्कन्धास्त इति तेषामित्यत्राहार्यम् । **किं सिद्धमिति** । यदर्थापन्नं तद्वि- 12.20 (5a–10)
चारयति । उपादानस्कन्धादयः सूत्रेषूक्ताः । तेनेह ते व्याख्यायन्ते । सर्वो ऽभिधर्मः सूत्रार्थ
इति विस्तरेणोक्तमेतत् ॥ **तत्संभूतत्वादुपादानस्कन्धा** इति । उपादानसंभूताः स्क- 13.8 (5b–1)
न्धा उपादानस्कन्धाः मध्यपदलोपात् । यथा तृणसंभूतो ऽग्निस्तृणाग्निः, तुषसंभूतो 13.9 (5b–1)
ऽग्निस्तुषाग्निरिति । उपादानानां स्कन्धा उपादानस्कन्धा इति षष्ठीसमासेनैव मध्यप-
दलोपमकृत्वान्ये साधयन्ति । एवं च निदर्शयन्ति, यथा तृणानामग्निस्तृणाग्निरिति ।
युक्तं, ये सत्त्वसंख्यातास्ते उपादानस्कन्धाः क्लेशाभिष्यन्दितकर्महेतुकत्वात् । बाह्यास्तु
भावाः कथमुपादानस्कन्धाः । ते ऽप्युपादाननिर्वृत्ताः, कर्मजं लोकवैचित्र्यमिति सिद्धा-
न्तात् ॥ **तद्विधेयत्वाद्वा राजपुरुषवदिति** । यथा राज्ञो विधेयः पुरुष एवमुपादानानां 13.10 (5b–2)
विधेयाः स्कन्धाः । तद्वशेनालम्बनगत्यन्तरप्रवृत्तेः ॥ **उपादानानि वा तेभ्यः संभ-** 13.11 (5b–2)
वन्तीत्यर्थकथनमात्रमेतत् । पदानि त्वेवं वक्तव्यानि । उपादानानां संभवहेतवो वा
स्कन्धा उपादानस्कन्धाः । **पुष्पफलवृक्षवत्** । यथा पुष्पाणां फलानां वा संभवो 13.12 (5b–3)
हेतुर्वृक्षः पुष्पवृक्षः फलवृक्ष इति वा, तद्वत् ॥ अर्हत्स्कन्धा अपि पारसांतानिकोपा-
दानविधेया, विक्रियोत्पादनात् । तेभ्यो ऽपि पारसांतानिकान्युपादानानि संभवन्तीत्य-
विरुद्धमेषामुपादानस्कन्धत्वम् ॥ **रणा हि क्लेशाः** । **आत्मपरव्याबाधनादिति** । ये 13.13 (5b–3)
ह्यात्मानं परांश्च व्याबाधन्ते ते रणा युद्धानीत्यर्थः । तथैव च क्लेशा रणा उच्यन्ते ॥
तदनुशयितत्वादिति तैरनुशयिता उपसेविता इत्यर्थः । अथवानुशयिनः कृतास्तैरनुश- 13.15 (5b–4)
यिताः, तद्भावस्तदनुशयितत्वं, तस्मात्तदनुशयितत्वात् । अथवा तेषामनुशयितत्वम् । तस्मा-
त्सरणाः **सास्रववत्** । सास्रवत्वे यद्व्याख्यानं तदेवास्य वक्तव्यम् ॥ **आर्याणां प्रतिकू-** 13.17 (5b–5)
लत्वाद्दुःखमिति संस्कारदुःखतयार्याणां तत्प्रतिकूलम् ॥ **समुदेत्यस्माद्दुःखमिति समु-** 13.18 (5b–5)
दय इति । हेतुभूताः स्कन्धाः समुदयः, फलभूता स्कन्धा दुःखमिति वर्णयन्ति ॥ **लुज्यत** 13.18 (5b–5)
इति लोक इति । अस्मिन्नेव रोहित व्यायाममात्रे कलेवरे लोकं प्रज्ञापयामि लोक-
समुदयं चेति सूत्रम् । लुज्यते प्रलुज्यते तस्माल्लोक इति च भगवतैवोक्तम् । लुज्यते

विनश्यतीत्यर्थः । लुजिरिह गृहीतो न लोकिः । नैरुक्तेन तु विधानेन गकारस्य
14.1 (5b–6) स्थाने ककारः कृतः । तस्माल्लोक इति भवति ॥ दृष्टिरस्मिंस्तिष्ठतीति । ये केचिद्भिक्षव आत्मत आत्मीयतश्च समनुपश्यन्ति त इमानेव पञ्चोपादानस्कन्धानात्मत
14.2 (5b–7) आत्मीयतश्च समनुपश्यन्तीति वचनादुपादानस्कन्धा दृष्टिस्थानम् ॥ भवतीति भव इति सास्रवा एव धर्मा भवशब्देनोक्ताः । भवः कतमः । पञ्चोपादानस्कन्धा इति वचनात् ॥ एते च दुःखादयः शब्दा मार्गसत्ये ऽपि प्रसज्यन्ते । मार्गसत्यमपि हि संस्कारदुःखतया दुःखम् । समनन्तरप्रत्ययादिभावेन चास्मात्सास्रवं वस्तु समुदेति । लुज्यते च । दृष्टिश्च तदालम्बते । भवति च तदुत्पद्यत इत्यर्थः । नैष दोषः । रूढिं ह्यपेक्षते शब्दप्रवृत्तिः । ये धर्माः संस्कारदुःखतयार्याणां प्रतिकूला दुःखाविरोधिनः तदुत्पादकाः प्रसिद्धा दृष्टिपुष्टिजनका अनादिमति च संसारे विनश्यन्ति भवन्ति तेष्वेवामी दुःखादय आर्यैः संकेतिताः । न मार्गसत्ये । तस्मात्सास्रवा एव धर्मा दुःखशब्दाद्यभिधेया भवन्ति । नानास्रवाः । न हि गच्छतीति गौरित्युक्ते सर्वो गन्ता गौरित्युच्यते । तस्मात्सूक्तं । दुःखं समुदय इत्येवमादि ॥ ८ ॥

14.9 (5b–10) रूपमिति रूपस्कन्धः । पञ्चेति मनइन्द्रियव्युदासार्थम् । अर्था विषयाः । अर्यन्ते ज्ञा-
14.15 (6a–4) यन्त इत्यर्थः । पुनः पञ्चेति ग्रहणं धर्मायतनविषयनिरासार्थम् ॥ तद्विज्ञानाश्रया इति । तच्छब्दो ऽर्थानपेक्षते । तेष्वर्थेषु तेषां वा विज्ञानानि तद्विज्ञानानि । तेषामाश्रयास्तद्वि-
14.18 (6a–4) ज्ञानाश्रयाः ॥ रूपप्रसादा इति । रूपाणि च तानि प्रसादाश्च त इति रूपप्रसादाः । अनेन विशेषणेन मनइन्द्रियं निरस्तं भवति । मनो ऽपि हि तद्विज्ञानाश्रयः । पञ्चानां सहजाश्च तैर् । इति सिद्धान्तात् । अनुशयितास्ते । न तु मनो रूपस्वभावमित्यतो निरस्तम् । रूपग्रहणं त्विह श्रद्धाप्रसादनिरासार्थम् । तद्विज्ञानाश्रया इत्यनेन विशेषणेन च श्रद्धाया अप्रसङ्ग इति चेत् । न । बहुव्रीहिकल्पनायां तत्प्रसङ्गसंभवात् । रूपग्रहणे तु बहुव्रीहिकल्पना निवर्तते । न हि रूपमयो ऽस्ति प्रसादो यस्य तद्विज्ञानान्याश्रयत्वेन कल्पेरन् । प्रसादग्रहणं पुनरिन्द्रियग्राह्यवस्तुव्यतिरिक्तरूपप्रसादविशेषज्ञापनार्थम् । वैभाषिका हि ब्रुवते । भूतविकारविशेषा एवेन्द्रियाणीति । प्रवचने तु नैवम् । किं तर्हि । रूपा-

दिविषयव्यतिरिक्तान्यच्छान्यतीन्द्रियाणि स्वविज्ञानानुमेयानीन्द्रियाणि येषां चक्षुरा-
दीन्यधिष्ठानानि दृश्यन्ते। तद्विज्ञानाश्रया इति च विशेषणमन्योन्यलक्षणसांकर्यनिवृ-
त्त्यर्थम्। यदि हि रूपप्रसादाश्चक्षुरादय इत्येतावदवक्ष्यच् चक्षुरपि श्रोत्रादि प्रासंक्ष्यत।
श्रोत्रादि वा चक्षुः। यतस्त्वेवं विशिष्यते रूपविज्ञानाश्रयो यो रूपप्रसादस्तच्चक्षुरित्य-
तो लक्षणसांकर्यं न भवति। न हि श्रोत्रमन्यद्वेन्द्रियं रूपविज्ञानस्याश्रयः। एवं या-
वत्कायविज्ञानाश्रयो यो रूपप्रसादस्तत्कायेन्द्रियमिति वक्तव्यम्। **यथोक्तं भगवतेति**। 15.2 (6a–6)
एतद्व्याख्यानं सूत्रानुगतमित्यभिप्रायः। कथमिति। **आध्यात्मिकमिति** विज्ञानाश्रय
इत्यर्थः। आत्मशब्दो हि चित्त आत्मेत्युपचर्यत इति वक्ष्यते। आत्मनि अधि अध्यात्मं ।
अध्यात्ममेव आध्यात्मिकम्। आत्मनि चित्तलक्षणे कर्तव्ये हेतुरित्ययमर्थ आध्यात्मि-
कशब्देनोच्यते। विज्ञानाश्रय इति यावदुक्तं भवति॥ **अथवा यानीति** विस्तरः। 15.4 (6a–8)
अथवा तच्छब्देनेन्द्रियाण्यभिसंबध्यन्ते। चक्षुर्विज्ञानं श्रोत्रविज्ञानमित्येवमादि। प्रवचने
प्रसिद्धमेतद्। न तु रूपविज्ञानं शब्दविज्ञानमिति। लोके तु कदाचिदेवं भवेत्। तस्मा-
दिदं व्याख्यानान्तरमाश्रीयते। तस्मादाह। **एवं च कृत्वा प्रकरणग्रन्थो ऽप्यनुवृत्त** 15.7 (6a–10)
इति विस्तरः। कथमिहासिद्धमसिद्धेन साध्यते। चक्षुरेव ह्यसिद्धम्। तदसिद्धौ चक्षुर्वि-
ज्ञानमप्यसिद्धम्। कथं तत्तेन तदाश्रयतया साध्यते। सिद्धा एव ते पञ्च विज्ञानविशेषाः।
परस्परविशेषोपलक्षणार्थं तु वयमेतैश्चक्षुरादिभिस्तान्विशेषयन्तो दर्शयामः। एतदुक्तं
भवति। एतस्य प्रथमस्यैकस्य स्वसंवेद्यस्य विज्ञानविशेषस्य य आश्रयो रूपप्रसादस्त-
च्चक्षुरिन्द्रियम्। एवं यावदेकस्य पञ्चमस्य स्वसंवेद्यस्य विज्ञानविशेषस्य य आश्रयो
रूपप्रसादस्तत्कायेन्द्रियमिति नासिद्धेनासिद्धस्य साधनम्॥ ९॥

रूपं द्विधेति। चक्षुषो ऽर्थो वर्णसंस्थानभेदाद् द्विप्रकारः। लोकप्रतीतत्वात्तस्य 15.17 (6b–4)
स्वलक्षणमनुक्त्वा प्रभेद एव कथ्यते। **वर्णश्चतुर्विधो नीलादिरिति**। नीललोहित-
पीतावदाता वर्णाः। **तद्भेदाः अन्य** इत्यभ्रादयः। अपरे व्याचक्षते। तद्भेदा अन्य इति 15.18 (6b–5)
नीलादिवर्णचतुष्टयसंपर्कविशेषात्काकाण्डवर्णादयो ऽपि जायन्ते। न केवलमभ्रादय इति॥
संस्थानमाकृतिविशेषः॥ पुनस्तदेवान्तर्गणिकेन भेदेन भिद्यते **विंशतिधेति**। तद्यथा 16.2 (6b–5)

संस्थानमष्टविधं दीर्घादिविशातान्तं ' शेषो द्वादशविधो वर्ण इति विंशतिधा ।
16.4 (6b–7) नभश्चैकवर्णमिति यद्दूरतो वैडूर्यभित्त्याकारं दृश्यते ॥ वृत्तं वर्तुलम् । परि-
मण्डलं चक्रलम् । उन्नतं स्थूलादिरूपम् । अवनतं निम्नरूपम् । यत्र रूपाणां
16.13 (6b–10) दर्शनमिति वचनं छायान्धकारयोर्नानाकारणप्रदर्शनार्थम् ॥ न विपञ्चितं न विभक्त-
मित्यर्थः ॥ इदमिह विचार्यम् । यदि नीलादिवर्णचतुष्टयभेदा एवाभ्रादयो ' न तद्व्यतिरिक्ता
भवन्ति ' यथेह काकाण्डादिवर्णा नोक्तास्तथाभ्रादयो ऽपि न वक्तव्या इति । नैतद्व्या-
ख्यानकारैर्विचारितम् । शक्यं त्वेवं भणितुम् । मायारूपसदृशत्वान्नीलादिभेदभूता अपि ते
ऽभ्रादयः पृथगुक्ताः । तथा हि ते दूरतो भित्तय इव लक्ष्यन्ते । अभ्याशगमने तु न दृश्यन्ते ।
मा कस्यचिदेवं भूद् ' नैतत्किंचिदस्ति ' विमतिर्वा ! किमस्त्येतद् ' उत भ्रान्तिमात्रमिति ।
तद्विपर्याससंशयनिवृत्त्यर्थमिमे ऽभ्रादय उक्ताः ' सन्त्येवामी रूपायतनस्वभावा इति ॥
16.17 (7a–2) दीर्घादीनां प्रदेश इति दीर्घादिविशातान्तप्रदेश इत्यर्थः । कतरो ऽसौ प्रदेश इत्याह ।
कायविज्ञप्तिस्वभाव इति । कायविज्ञप्तिर्हि कदाचिद्दीर्घा कदाचिद्ध्रस्वा कदाचिद्या-
वद्विशातेति । कीदृशी पुनः सावगन्तव्या । तदालम्बनचित्तसमुत्थापितं यत्कायकर्म ।
16.18 (7a–3) अकायकर्मस्वभावं तु दीर्घादिविशातान्तं निरस्तं बोद्धव्यम् । अस्त्युभयथा परिशिष्ट-
मिति ' यन्निरस्तं दीर्घादि ' अभ्रधूमरजोमहिकाश्च । दृश्यते हि नीलादीनां दीर्घा-
दिपरिच्छेद इति नीलपीतलोहितावदातच्छायान्धकाराणां दीर्घादिसंस्थानग्रहणम् ।
17.1 (7a–4) तस्मादेषामपि तृतीयायां कोट्यामन्तर्भाव इत्यभिप्रायः ॥ कथं पुनरेकं द्रव्यमुभयथा
विद्यत इति । कथमेकं द्रव्यं वर्णसंस्थानात्मकं भवति । वर्णरूपाद्धि संस्थानरूपं द्रव्या-
न्तरमिति वः सिद्धान्तः । उभयस्य तत्र प्रज्ञानात् । वर्णसंस्थानस्य तत्र ग्रहणात् ।
17.2 (7a–6) ज्ञानार्थो ह्येष विदिर्न सत्तार्थ इति । विद ज्ञान इत्येतस्य धातोर्लुग्विकरणस्यैतद्रूपं
विद्यत इति । न तु विद सत्तायामित्येतस्य धातोः श्यन्विकरणस्यैतद्रूपमित्यर्थः । ज्ञानं
17.3 (7a–6) तत्रोभयाकारं प्रवर्तते ' न तु द्रव्यमेकमुभयलक्षणमिति वैभाषिकपरिहारः ॥ कायवि-
ज्ञप्तावपि तर्हि प्रसङ्ग इत्याचार्यः । न हि कायविज्ञप्तौ गृह्यमाणायां वर्णग्रहणं न
प्रवर्तते । वैभाषिकानामयमभिप्रायः ' नीलादिग्रहणमातपालोकग्रहणं वा संस्थान-

निरपेक्षं प्रवर्तते । कायविज्ञप्तिग्रहणं तु वर्णनिरपेक्षम् । परिशिष्टरूपायतनग्रहणं तु
वर्णसंस्थानापेक्षं प्रवर्तत इति । सौत्रान्तिकपाक्षिकस्त्वयमाचार्यो नैनमर्थं प्रयच्छतीति ।
न हि चाक्षुषमेतत्संस्थानग्रहणम् । मानसं ह्येतत्परिकल्पितम् । वर्णसंनिवेशविशेष एव
हि संस्थानम् । न संस्थानं नाम द्रव्यं किंचिदस्ति ' वर्णाग्रहणे संस्थानग्रहणाभावात् ।
एतच्च कर्मकोशस्थाने परीक्षिष्यते ॥ सत्त्वासत्त्वाख्यश्चेति वाग्विज्ञप्तिशब्दस्तद्व्यति- 17.6 (7a-8)
रिक्तश्चेत्यर्थः । सत्त्वासत्त्वसंख्यातश्चेति केचित्पठन्ति । अयमेव चेदर्थो ऽभिप्रेतः । यदि
हि सत्त्वासत्त्वसंतानज इत्ययमर्थो ऽभिप्रेतो भवेत् ' सत्त्वाख्यो वाग्विज्ञप्तिशब्दो ऽसत्त्वाख्यो
ऽन्य इत्येवंवक्ष्यमाणकं विवरणं निःप्रयोजनमेव । तस्मात्सत्त्वासत्त्वाख्यश्चेति पाठः स्फुटः
पठितव्यः ॥ उपात्तमहाभूतहेतुक इति । प्रत्युत्पन्नानीन्द्रियाविनिर्भागानि भूतान्यु- 17.8 (7a-9)
पात्तानि । अन्यान्यनुपात्तानि । उपात्तानि महाभूतानि हेतुरस्येत्युपात्तमहाभूतहेतुकः ।
यथा हस्तवाक्छब्द इति । यदि सत्त्वसंतानज इत्यभिप्रेतो ' बाह्यो ऽपि हि नि- 17.9 (7a-9)
र्मितो मानुषाकारो हस्तवाक्छब्दं कुर्यात् ' स चानुपात्तमहाभूतहेतुकस्वभावो ऽवग-
न्तव्य इन्द्रियविनिर्भागवर्तित्वात् । स च मानुषीमपि वाचं निर्मातृवशाद्भाषेत् । वक्ष्य-
ति हि ।

एकस्य भाषमाणस्य भाषन्ते सर्वनिर्मिताः ।
एकस्य तूष्णींभूतस्य सर्वे तूष्णींभवन्ति ते ॥

तस्य च बाह्यनिर्मितशब्दस्यानुपात्तमहाभूतहेतुक इत्यत्र ग्रहणं ' यथा वा- 17.10 (7a-10)
युवनस्पतिनदीशब्द इति यथाशब्दस्योदाहरणार्थत्वात् ॥ सत्त्वाख्यो वाग्विज्ञप्ति- 17.11 (7a-10)
शब्दो ऽसत्त्वाख्यो ऽन्य इति । सत्त्वमाचष्ट सत्त्वाख्यः । वाग्विज्ञप्तिशब्देन हि सत्त्वो
ऽयमिति विज्ञायते । तं वाग्विज्ञप्तिशब्दं वर्जयित्वान्यः शब्दो हस्तशब्दो ऽपि यावदस-
त्त्वाख्य एव ' किमङ्ग असत्त्वसंतानज इति व्याख्यातं भवति । तदेवमुपात्तमहाभूतहेतुकः
सत्त्वाख्यश्चासत्त्वाख्यश्च भवति । अनुपात्तमहाभूतहेतुको ऽपि निर्मितशब्दो वाग्विज्ञप्ति-
स्वभावः सत्त्वाख्यः । तस्यैव हस्तशब्दो वायुवनस्पत्यादिशब्दश्चासत्त्वाख्य इति चतुर्विधः
शब्दः । मनोज्ञामनोज्ञभेदात्पुनरष्टविधो भवति ॥ यथैको वर्णपरमाणुरिति । न 17.15 (7b-2)

17.17 (7b–4) भूतचतुष्कद्वयमुपादाय वर्तते शब्दः ' उपादायरूपत्वाद्वर्णपरमाणुवदिति भावः ॥ रसः षोढे-
ति षण्मूलजातिमधिकृत्यैवमुक्तम् । रसषट्कस्यान्योन्यसंपर्कविशेषाद्बहुप्रकारा रसाः
संभवन्ति । एककद्विकत्रिकचतुष्कपञ्चकषट्कसंपर्कयोगाद्धि चरके त्रिषष्टी रसा उपदिष्टाः ॥
सुगन्धदुर्गन्धयोः समविषमगन्धत्वादित्यनुत्कटोत्कटगन्धत्वादित्यर्थः । अस्मिन्पक्षे
17.20 (7b–5) द्विविधो गन्ध इष्टः । त्रिविधस्तु शास्त्र इति समगन्धो ऽन्यस्तृतीय इत्यर्थः । अपरे
पुनर्व्याचक्षते ' सुगन्ध इति तयोरेवैकदेश इति । स एवार्थो भवति ' शब्दमात्रं तु भिद्यते ॥
18.8 (7b–9) शीतमुष्णाभिलाषकृदिति संभवं प्रत्येवमुच्यते । यो धर्म उष्णाभिलाषं कुर्यात्तच्छीतं
नामोपादायरूपम् । ग्रीष्मे यद्यपि तन्न कुर्यात्तज्जातीयत्वात्तु शीतमेव तदवगन्तव्यम् ॥
18.9 (7b–9) कारणे कार्योपचारादिति ' अत्तुमिच्छा जिघत्सा चैतसिको धर्मः ' तस्य कारणम-
18.10 (8a–1) न्तरे कायेन्द्रियेण यः स्पृश्यते सा जिघत्सा नामोपादायरूपम् । यथा ' बुद्धानां
सुखमुत्पाद इत्यादि । अभ्युदयनिःश्रेयससुखकारणत्वाद्बुद्धोत्पादस्य स सुखमित्युच्यते '
18.17 (8a–4) तद्वत् । एवं पिपासापि वक्तव्या ॥ संचितानि पुनस्तुल्यन्त इति सूक्ष्मगुरुत्वसद्भावादित्य-
भिप्रायः । अत्रानुमानम् । सद्गुरुत्वं रूपावचरं वस्त्रादि ' आधाराधेयभावात् ' कुण्डबदरवदिति ॥
18.18 (8a–4) अनुग्राहकं किलास्तीति किलशब्दो वैभाषिकमतद्योतनार्थम् । स्वमतं तु ' समाधिरे-
18.20 (8a–5) वात्रानुग्राहकः ' किमत्र शीतेन परिकल्पितेनेति ॥ यदा तत्प्रकारव्यवच्छेद इति
19.3 (8a–7) यदा नीलादिप्रकारनिमित्ताभोगः ॥ एवं श्रोत्रादिविज्ञानमिति । य एष बहुविधः
शब्द उक्तो ऽत्र कदाचिदेकेन द्रव्येण श्रोत्रादिविज्ञानमुत्पद्यते यदा तत्प्रकारव्यव-
च्छेदो भवति ' कदाचिद्बहुभिर्यदा न व्यवच्छेदः । तद्यथा तूर्यशब्दसमूहमनेकाकारता-
19.4 (8a–8) रमन्द्रतादिशब्दरूपं शृण्वतः । एवं घ्राणजिह्वाविज्ञाने अपि स्वविषये योज्ये । काय-
विज्ञानं तु परं पञ्चभिरिति । कथम् । कदाचिदेकेन द्रव्येणोत्पद्यते यदा तत्प्रका-
रव्यवच्छेदो भवति । कदाचिद्द्वाभ्यां यावत्पञ्चभिर्यदा न व्यवच्छेदः । एकेन च श्लक्ष्णा-
19.8 (8a–9) त्वादिनेति । किमत्र कारणम् । कर्कशत्वादीनामन्यभूतचतुष्काश्रितत्वात् ॥ ननु चैवमि-
ति विस्तरः । यथा चक्षुःश्रोत्रघ्राणजिह्वाकायविज्ञानालम्बनान्यभिसमस्य मनोविज्ञानं
गृह्णातीति कृत्वा सामान्यलक्षणविषयं तद्व्यवस्थाप्यते ' तथा नीलपीतलोहितावदा-

तालम्बनानां चतुर्णां चक्षुर्विज्ञानानां तानि चत्वारि बहुतराणि चालम्बनान्यभिसमस्य
चक्षुर्विज्ञानमेकं गृह्णातीति सामान्यलक्षणविषयं तत्प्राप्नोति ' रूपायतनसामान्यलक्ष-
णमस्यालम्बनमिति कृत्वा । तथा श्रोत्रघ्राणजिह्वाकायविज्ञानान्यपि स्वविषयेषु यो-
ज्यानि । आयतनस्वलक्षणं प्रतीति । स्वं लक्षणं स्वलक्षणं ' आयतनानां स्वलक्षणमा- 19.10 (8a–10)
यतनस्वलक्षणं ' चक्षुर्विज्ञानविज्ञेयत्वादि रूपायतनत्वादि वा । तत्प्रत्येते पञ्च विज्ञान-
कायाः स्वलक्षणविषया इष्यन्ते प्रवचने । न द्रव्यस्वलक्षणं प्रति ' स्वलक्षणविषया
इष्यन्त इति प्रकृतम् । द्रव्याणां नीलादिकानां स्वलक्षणं नीलाद्याकारचक्षुर्विज्ञाना-
दिविज्ञेयत्वं नीलाकारादि वा । न तत्प्रत्येते पञ्च विज्ञानकायाः स्वलक्षणविषया इष्यन्त
इत्यदोषः ॥ युगपद्विषयसंप्राप्ताविति । कायजिह्वेन्द्रिययोर्युगपद्विषयसंप्राप्तिः संभवति । 19.12 (8b–1)
द्वयोश्च विज्ञानयोर्युगपत्प्रवृत्तिर्न संभवति । अतः पृच्छति कतरद्विज्ञानं पूर्वमुत्पद्यत
इति । यस्य विषयः पटीयान् । यदि कायेन्द्रियस्य विषयः पटुतरः कायविज्ञानं
पूर्वमुत्पद्यते । अथ जिह्वेन्द्रियस्य विषयः पटीयाञ्जिह्वाविज्ञानं पूर्वमुत्पद्यते । समप्राप्ते 19.14 (8b–3)
तु विषये तुल्य इत्यर्थः । जिह्वाविज्ञानं पूर्वमुत्पद्यते कस्मात् । भोक्तुकामता-
वर्जितत्वात्संततेर्भोजनेच्छाप्रवणत्वादात्मभावस्येत्यर्थः । पूर्वं जिह्वाविज्ञानमुत्पद्यत इति
वचनात् । पश्चात्कायविज्ञानमुत्पत्स्यत इत्यर्थादुक्तं भवति ॥ तेनात्र विचार्यते । किं
यो ऽसौ जिह्वाविषयक्षणेन सह प्राप्तः कायविषयक्षण आसीत्तत्र तत्कायविज्ञानमुत्प-
द्यते ' आहोस्विदन्यस्मिन्कायविज्ञानविषयक्षण इति । अन्यस्मिन्नित्याह । कथ-
मालम्बननियमो न भिद्यते । नैष दोषः । यत्तद्विषयालम्बनं विज्ञानं तदप्रतिसंख्या-
निरोधनिरुद्धम् । अन्यत्तु तत्सदृशं कायविज्ञानमुत्पद्यत इति । अतः पश्चात्तदुत्पद्यत
इत्युच्यते ' जातिसामान्येनैकत्वोपचारात् ॥ १० ॥

अनेककथाप्रपञ्चव्यवहितत्वान्नष्ट इवाविज्ञप्तिरुद्देशाधिकार इत्यत इदमुपन्यस्यति '
उक्ताः पञ्चेन्द्रियार्था यथा च तेषां ग्रहणमिति । कदाचिदेकेन द्रव्येण चक्षुर्विज्ञा- 19.16 (8b–4)
नमुत्पद्यत इत्येवमादिना । तेषां तु ग्रहणमिति कर्मणि षष्ठी । अविज्ञप्तिरिदानीं
वक्तव्येति । रूपं पञ्चेन्द्रियाण्यर्थाः पञ्चाविज्ञप्तिरेव च ' इत्यविज्ञप्तिरेवावशिष्यते ।

20.5 (8b–5) तस्या लक्षणनिर्देशावसर इति वक्तव्या ॥ विक्षिप्तचित्तकस्येति केचिदेवं वृत्तिं पठन्ति।
अस्मिन्पाठ एवं सूत्रविग्रहः। विक्षिप्तं नास्ति वा चित्तमस्येति विक्षिप्ताचित्तकः। अथवा
विक्षिप्तं चित्तं नास्ति वा चित्तमस्येति विक्षिप्ताचित्तकः। एकस्य चित्तशब्दस्य लोपः।
केचिदेवं पठन्ति ' विक्षिप्तस्येति। अस्मिन्पाठ उत्तरपदद्वयस्य बहुव्रीहिं कृत्वा पश्चादेवं
विग्रहः ' विक्षिप्तश्चाचित्तकश्च विक्षिप्ताचित्तकः। विक्षिप्तः पुद्गलो विक्षिप्तचित्त इत्यर्थः।
20.5 (8b–7) विक्षिप्तचित्तस्येति तदन्यचित्तस्यापीत्यविज्ञप्तिचित्तादन्यचित्तस्येत्यर्थः। तद्यथा कुश-
लाया अविज्ञप्तेः समुत्थापकं चित्तं कुशलम्। तदन्यचित्तो ऽकुशलाव्याकृतचित्तः। स इह
विक्षिप्तचित्तो ऽभिप्रेतः। अकुशलायास्त्वविज्ञप्तेरकुशलं चित्तं समुत्थापकम्। तदन्यचित्तः
कुशलाव्याकृतचित्तः। स चापि विक्षिप्तचित्तो वेदितव्यः। तस्य तदन्यचित्तस्यापि।
20.6 (8b–7) अचित्तकस्यापीत्यसंज्ञिनिरोधसमापत्तिसमापन्नस्यापि। अपिशब्देनाविक्षिप्तस-
20.9 (8b–8) चित्तकस्यापीति विज्ञायत इत्येतत्पुद्गलद्वयव्यतिरिक्ततृतीयस्याप्यर्थः ॥ कुशलाकु-
शल इति कुशलाकुशल एवेत्यवधारणम्। अव्याकृतो नास्तीत्यर्थः। एतेन चक्षुरादयो
20.10 (8b–8) व्युदस्ता वेदितव्याः ॥ यो ऽनुबन्ध इति प्रवाह इति। यो धर्मो नित्यप्रवाहयुक्त
इत्यर्थः। प्रवाहेन प्रवाहो निर्दिश्यते प्रवाहोपलक्षणत्वात्। अथवानुबध्नातीत्यनुबन्धः।
प्रवाह इति च व्याख्यापदं कृतबहुव्रीहिकम्। प्रवृत्तः प्रकृष्टो वा वाहो ऽस्येति प्रवा-
20.11 (8b–9) हो धर्मः ' स एव निर्दिश्यते ' न तत्स्रोतः ॥ प्राप्तिप्रवाहो ऽप्यस्तीदृश इति।
तत्प्राप्तिरपि विक्षिप्ताविक्षिप्ताचित्तस्यापि प्रवाहिणी कुशलाकुशलैव चेति। तद्विशेष-
णार्थमुच्यते ' महाभूतान्युपादायेति ' महाभूतहेतुक इत्यर्थः। यथेन्धनमुपादायाग्निर्भ-
20.13 (8b–10) वतीत्युक्ते इन्धनहेतुको ऽग्निरिति गम्यते। जननादिहेतुभावादिति।

जननान्निश्रयात्स्थानादुपस्तम्भोपबृंहणात्।

जननहेतुस्तेभ्य उत्पत्तेः। निश्रयहेतुर्जातस्य भूतानुविधायित्वादाचार्यादिनिश्रयवत्। प्रतिष्ठाहेतुराधारभावाच्चित्रकुड्यवत्। उपस्तम्भहेतुरनुच्छेदहेतुत्वात्। उपबृंहणहेतुर्वृद्धिहेतुत्वात्। कतमानि महाभूतान्युपादाय ' किमाश्रयमहाभूतान्युताहो नाश्रय-
20.15 (9a–1) महाभूतानि। आश्रयमहाभूतानीत्याहुः ॥ तन्नामकारणज्ञापनार्थ इति। यस्माद्रूप-

क्रियास्वभावापि सती विज्ञप्तिवत्परं न विज्ञापयति तस्माद्विज्ञप्तिरित्यर्थः। रूपक्रियास्वभावापीत्युभयविशेषणं किमर्थम्। यद्धि वस्तु रूपस्वभावमेव न क्रियास्वभावं तन्न परं गमयति। तद्यथा चक्षुरादयः। यदपि क्रियास्वभावमेव न रूपस्वभावं तदपि परं न गमयति। तद्यथा चेतना। यत्तूभयस्वभावं तत्परं गमयति। तद्यथा विज्ञप्तिः। विज्ञप्तिर्हि स्वसमुत्थापकं चित्तं कुशलाकुशलाव्याकृतं सौम्यं क्रूरमनुभयमिति वा परं विज्ञापयति। तेन विज्ञप्तिवदिति विपरीतदृष्टान्तप्रयोगः॥ **समासतस्त्वि** 20.19 (9a-2)
ति विस्तरः। शिष्यसुखावबोधार्थं संक्षेपतो वाक्येन तदविज्ञप्तिरूपं दर्शयत्याचार्यः'
विज्ञप्तिसमाधिसंभूतं कुशलाकुशलं रूपमविज्ञप्तिरिति। यथासंभवमेतद्योज्यं' कायवाग्विज्ञप्तिसंभूतं कुशलं प्रातिमोक्षसंवरसंगृहीतं नैवसंवरनासंवरसंगृहीतं च। अकुशलं पुनरसंवरसंगृहीतं नैवसंवरनासंवरसंगृहीतं च। समाधिसंभूतं तु कुशलमेव। तद्द्विविधं सास्रवसमाधिसंभूतं ध्यानसंवरस्वभावं' अनास्रवसमाधिसंभूतमनास्रवस्वभावं' उपादायरूपस्वभावं च न चित्तचैतसिकादिस्वभावमित्यवगन्तव्यम्। ननु चैवं विज्ञप्तिरप्यविज्ञप्तिः प्राप्नोति। साप्युत्तरा सभागहेतुभूतपूर्वविज्ञप्तिसंभूता। कुशलाकुशलमेवेत्यवधारणाद्विज्ञप्तावप्रसङ्गः। विज्ञप्तिर्ह्यव्याकृतापि संभवति। अत एव दिव्यं चक्षुः श्रोत्रं च समाधिसंभूतमपि सद्विज्ञप्तिविपाकजं च रूपं नाविज्ञप्तिः प्रसज्यत इति॥

अत्राचार्यः संघभद्र इदमविज्ञप्तिलक्षणं सूत्रं दूषयति।

न्यूनं शास्त्रापेतं हानिरतस्याः प्रसज्यते तत्त्वम्।
अपिशब्दाधिकवचनं विशेष्यमविशेषितं चात्र॥

अनुबन्धो हि प्रवाहस्तेनैव व्याख्यातः। न चाद्यः क्षणः प्रवाहः। मा भूदतिप्रसङ्गः। तस्मात्तस्यात्र लक्षणे नास्त्यवरोध इति न्यूनम्। प्रवाहस्य चाद्रव्यत्वाद्द्रव्यमविज्ञप्तिरिति शास्त्रापेतम्। समाहितावस्थायां नास्ति विक्षिप्तचित्ताचित्तकस्यानुबन्ध इति सा चाविज्ञप्तिर्न प्रसज्यत इति हानिः। अविक्षिप्तचित्तकस्य तदनुबन्धान्नैष दोष इति चेत्। शुभाशुभाया विज्ञप्तेरविज्ञप्तिलक्षणप्रसङ्ग इत्यतस्याः प्रसज्यते तत्त्वम्। अचित्तकस्यापीत्यपिशब्दवैयर्थ्यं' पूर्वेणैव कृतत्वात्। विक्षिप्तचित्तकस्यापीत्यनेन हि सर्वसचित्तकाव-

स्थाग्रहणम्। का पुनरन्यावस्था या द्वितीयेनापिशब्देन संगृह्येतेत्यपिशब्दाधिक्यवचनम्। अचित्तकं चाधिकृत्य शुभो ऽविज्ञप्त्यनुबन्धो विशेषणीयो ' न च व्याख्याने ऽपि विशेषित इति विशेष्यमविशेषितम्। इदं चापरं विशेष्यमविशेषितं ' अप्रतिघं रूपमिति। एवमनेकदोषदुष्टत्वान्न संबद्धमेतल्लक्षणमिति। अत्र ब्रूमः। यत्तावदुक्तं न्यूनं ' प्रवाहस्याविज्ञप्त्यपदेशादाद्यः क्षणो नाविज्ञप्तिः स्यादिति ' इदं तावदसौ प्रष्टव्यः ' को ऽयं प्रवाहो नाम। बहुषु क्षणेषु प्रवाह इत्याख्या। यद्येवमाद्यो ऽपि क्षणः प्रवाहः सिध्यति ' प्रथमक्षणप्रभृतिबहुषु क्षणेषु प्रवाह इति कृत्वा। तथा स्रुतमात्तडागाद्वा निर्गच्छतामुदकानामाद्योदकावयवप्रभृतिषु प्रवाहसंज्ञेति नास्त्यव्यापिता लक्षणस्य। यदा चानुबध्नातीत्यनुबन्ध इत्यच्प्रत्ययान्तेन पदेन द्रव्यमेव निर्दिश्यते तदा न्यूनताशङ्कापि नास्ति। अत एव शास्त्रापेततादोषो ऽपि परिहृतो भवति। अथाप्यनुबन्धनमनुबन्ध इति भावो ऽभिधीयते ' तथाप्यदोषो रूपाधिकारात्। प्रवाहवर्तित्वात्तु प्रवाहशब्देन प्रदर्श्यते। समाहितायां अप्यविज्ञप्तेरग्रहणं न भवति। सापि हि यद्यपि विक्षिप्तचित्ताचित्तकसंतानं नानुबध्नातीति ' अविक्षिप्तचित्तकसचित्तकसंतानं त्वनुबध्नात्येव। अविज्ञप्तिजातिसामान्येन तु विक्षिप्ताचित्तकस्यापि यो ऽनुबन्धः साविज्ञप्तिरित्युच्यते। यत्पुनरेतदुक्तं ' अविक्षिप्तचित्तकस्य तदनुबन्धान्नैष दोष इति चेदिति ' यद्यविक्षिप्ताचित्तस्य केवलस्य यो ऽनुबन्धः साप्यविज्ञप्तिरिति समाहितायां अविज्ञप्तेस्त्यागो न भवतीति ब्रवीषि ' विज्ञप्तिरपि कुशलाकुशला तथैव भवतीत्यविज्ञप्तिस्ते प्राप्नोतीति। स चाप्यदोषः ' शुभाशुभ एवेत्यवधारणात्। विज्ञप्तिर्ह्यव्याकृतापि संभवतीति न विज्ञप्तिरविज्ञप्तिः प्रसज्यते। अथवा प्रकर्षगतेरेष प्रसङ्गो न भविष्यति। प्रकर्षेण हि यो ऽनुबन्ध सैवाविज्ञप्तिः। न च विज्ञप्तिरविज्ञप्तिवत्प्रकर्षेणानुबध्नातीति ' अविज्ञप्त्यनिरोधे ऽपि तन्निरोधदर्शनात्। यदप्युक्तं ' अपिशब्दाधिक्यवचनमिति तदप्ययुक्तमुक्तम्। तथा श्लोक एवेह सूत्रे पठितो ऽपिशब्दः। वृत्तौ तु तेन पुद्गलद्वयेन तदर्थः संबध्यत इति द्विः पुनः पठितः। तेनैकेन सूत्रपठितेनापिशब्देन विक्षिप्तविपरीतमविक्षिप्तमचित्तकविपरीतं च तमेव सचित्तकं तृतीयं पुद्गलमविज्ञप्त्याश्रयं ब्रुवन्नाचार्यः स्वनामोक्ताविक्षिप्ताचित्तकपुद्गलद्वयं ज्ञातिसा-

मान्येनाविज्ञप्त्याख्यं प्रदर्शयन् ' विज्ञप्तिचित्तचैत्तेभ्यो ऽर्थान्तरभूतामविज्ञप्तिमाचष्टे । त्रय एव हि पुद्गला भवन्ति ' विज्ञप्तिचित्तविसभागचित्तो विज्ञप्तिचित्तसभागचित्तो ऽचित्तकश्च । तत्र विज्ञप्तिचित्तविसभागचित्तो विक्षिप्तचित्त इत्यभिप्रेतः । तस्य सा वाक्कायविज्ञप्तिर्निरुद्धा भवति । अचित्तकस्य तु चित्तचैत्ता अपि निरुद्धा इति । तत्र विज्ञप्तेश्चित्तचैतसिककलापाच्चार्थान्तरभूतेयमविज्ञप्तिः ' यत एभ्यो ऽनुबन्धिनीत्वेन विशिष्यते । तमेवार्थं दर्शयन्नाह ' विक्षिप्ताचित्तकस्यापीति । अविक्षिप्तचित्तकस्याविज्ञप्तिर्वर्तत इति नातिशयः ' विज्ञप्तिरपि हि तस्य वर्तते । विक्षिप्तचित्तकस्यापि तु वर्तत इत्यतिशयः । विज्ञप्तिर्हि तस्य नास्ति ' अविज्ञप्तिस्त्वनुबन्धिनीति विज्ञप्तेर्विशिष्यते । तथा ऽविक्षिप्तचित्तकस्याविज्ञप्तिर्वर्तत इति नातिशयः ' चित्तचैत्ता अपि हि तस्य वर्तन्त एव । अचित्तकस्यापि तु वर्तत इत्यतिशयः । तस्य हि चित्तचैत्ता निरुद्धाः ' अविज्ञप्तिस्त्वनुबन्धिनीति चित्तचैत्तेभ्यो विशिष्यते । तदेवं धर्मान्तरविशेषणार्थमविक्षिप्तचित्तो विक्षिप्ताचित्तकतृतीयभूतस्तेनैवैनाप्यपिशब्देनाभिधीयते । अत एव चापिशब्देन ' अविक्षिप्तचित्तकस्यापीत्युक्तमाचार्येण ' तृतीयभूतत्वात् । इतरथा ह्यपिशब्देनाविक्षिप्ताचित्तकस्यापीत्येवावक्ष्यत् ' सचित्तकस्यापीति वा । तद्यथा । त्रयो लोके मनुष्याः । एको धनवानितरावपि धनमात्रवन्तौ । तावभिसमीक्ष्य विष्णुमित्रस्य धनमस्तीत्येकेनोक्ते ' द्वितीयो वक्ता भवेद् ' देवदत्तयज्ञदत्तयोरपि धनमस्तीत्यपिशब्देन विष्णुमित्रस्याप्यस्तीति देवदत्तयज्ञदत्तगतेन द्वैतमिवापन्नेनापिशब्देन स एव विष्णुमित्रो लक्ष्यते ' न त्ववसृज्यत इत्यर्थः । तेन नात्रापिशब्दो ऽधिक एव । तद्वदिहापि द्रष्टव्यम् ॥ यत्पुनरेतदुक्तं ' अचित्तकं चाधिकृत्य शुभो ऽविज्ञप्त्यनुबन्धो विशेषणीय इति तदपि न किंचित् । अविज्ञप्तिजातिमधिकृत्यैतल्लक्षणं प्रणीतम् । सा चाविज्ञप्तिजातिरचित्तकस्य भवतीत्येतावद्विवक्षितम् । किमनेन विशेषितेन । त्वदीये ऽप्यविज्ञप्तिलक्षणे शुभो ऽविज्ञप्त्यनुबन्धो ऽचित्तकमधिकृत्य न विशेषितः ।

कृते ऽपि विसभागे ऽपि चित्ते चित्तात्यये च यत् ।
व्याकृताप्रतिघं रूपं साह्यविज्ञप्तिरिष्यते ॥

इति । एषा च विज्ञप्तिसंभूता कुशलैवाविज्ञप्तिरचित्तकस्य संभवतीति चतुर्थे कोशस्थाने ज्ञापयिष्यते ॥ यच्चाप्रतिघमित्यविशेषितमिति तदपि पश्चाद्दर्शयिष्यामः ' सप्रतिघा दश रूपिण इति । अत्र दशैव धातवः सप्रतिघा इत्यवधारणादविज्ञप्तिर्धर्मधातुपरिपठिता सा त्वप्रतिघेति सेत्स्यति । तस्मादिदमास्माकीनमेवमदोषदुष्टमविज्ञप्तिलक्षणमिति । तदेवास्तु ॥ ११ ॥

21.7 (9a–5) भूतानि पृथिवीधातुरिति विस्तरः । धातुग्रहणं वर्णसंस्थानात्मकपृथिव्यादिनि-
21.8 (9a–7) रासार्थम् । स्वलक्षणोपादायरूपधारणाच्च धातव इति काठिन्यादिस्वलक्षणं चतुरा-
ष्युपादायरूपं च दधतीति धातवः । अष्टादश धातवस्तु स्वसामान्यलक्षणधारणादिति' तद-
पेक्ष्य गोत्रार्थो वा धात्वर्थः । धारणार्थमनपेक्ष्य षड्धा धातुदेशनायां पुनर्भवबीजार्थो वा धा-
21.10 (9a–8) त्वर्थः' भवं पुष्णातीति कृत्वा ॥ महत्त्वमेषां सर्वान्यरूपाश्रयत्वेनौदारिकत्वादिति सर्वोपा-
दायरूपाश्रयत्वेन महत्त्वादित्यर्थः । तदुद्भूतवृत्तिष्विति तैर्महाभूतैरुद्भूता व्यक्ता वृत्तिर्धृ-
त्यादिका येषु त इमे तदुद्भूतवृत्तयः पृथिव्यप्तेजोवायुस्कन्धाः ' तेष्वेषां महाभूतानां
21.14 (9a–10) महासंनिवेशत्वान्महारचनत्वात् । भूतं तन्वन्तीति भूतानि ॥ धृत्यादिकर्मसंसिद्धा
इति । धृत्यादिकर्मनिर्देशः पृथिव्यादिषु शेषानुमानार्थम् । उपलादिके हि पृथिवीद्रव्ये
संग्रहपक्तिव्यूहनदर्शनाच्छेषाणां जलतेजोवायूनामस्तित्वमनुमीयते । अप्सु नौसंधारणो-
ष्णतेरणाकर्मदर्शनात्पृथिवीतेजोवायूनामस्तित्वम् । अग्निज्वालायां स्थैर्यसंपिण्डनचलनद-
र्शनात्पृथिव्युदकवायूनामस्तित्वम् । वायौ संधारणशीतोष्णस्पर्शदर्शनात्पृथिव्यप्तेजसाम-
21.17 (9b–1) स्तित्वमिति वैभाषिकाः ॥ व्यूहनं पुनर्वृद्धिः प्रसर्पणं चेति । वृद्धिः संबन्धाधिक्या शरी-
राङ्कुराद्यवयवोत्पत्तिः । प्रसर्पणं शरीरादीनां प्रबन्धेन देशान्तरोत्पत्तिः ॥ उष्णतेति
22.3 (9b–4) स्वभावाभिधानेऽपि भावप्रत्ययः । उष्ण एवोष्णतेति ॥ देशान्तरोत्पादनात्प्रदी-
पेरणावदिति । क्षणिकानां नास्ति देशान्तरगमनम् । यत्रैवोत्पत्तिस्तत्रैव विनाशः । तेनैवमुच्यते ' देशान्तरोत्पादनस्वभावो भूतस्रोतस ईरणं ' क्षणिकत्वात्प्रदीपवत् । क्षणिकानि च भूतानि ' रूपत्वात्प्रदीपवत् । प्रदीपश्च क्षणिकः प्रसिद्ध इत्युदाहरणम् ॥
22.9 (9b–6) कर्मणास्य स्वभावोऽभिव्यक्त इति । ईरणकर्मणा लघुत्वं विशिष्यते ' यदीरणात्मकं

लघुत्वं स वायुधातुरिति । लघुसमुदीरणो वायुधातुः । लघ्वेव तु यत्तदुपादायरूपम् ॥ १२ ॥

प्रवचने पृथिवीधात्वादयः पृथिव्यादयश्चोक्ता इति । अतः पृच्छति ' कः पुनरेषां 22.10 (9b–7)
विशेष इति । लोकसंज्ञयेति लोकसंव्यवहारेण । वात्येति वातानां समूहो वात्या । 22.18 (9b–10)
ब्राह्मणादिभ्यो यञिति समूहार्थे यञ्प्रत्ययः । स्त्रीत्वाच्चाप्प्रत्ययः ॥ तथा ह्यर्थवर्गीये- 23.11 (10a–6)
ष्वूक्तमिति । अर्थवर्गीयाणि सूत्राणि यानि क्षुद्रके पठ्यन्ते ' तेषूक्तम् ।

तस्य चेत्कामयानस्य '

इति विस्तरः । तस्य देहिनः कामयानस्य छन्दजातस्य यदि कामा विषया न समृध्यन्ति न संपद्यन्ते शल्यविद्ध इवासौ रूप्यते बाध्यत इत्यर्थः । बाधनार्थपरिच्छिन्नेनानेन रूप्यतेशब्देन रूप्यते रूप्यत इति भिक्षव इत्यत्र सूत्रे रूप्यतेशब्दो बाधनार्थ
एव परिच्छिद्यते । शल्यविद्धः कामयानश्च दुःखवेदयितृत्वाद्बाध्यत इति युक्तम् । रूपं 23.16(10a–10)
तु कथं बाध्यते । अत आह ' विपरिणामोत्पादनेन विक्रियोत्पादनेनेत्यर्थः । तथा चेदर्थे सति शल्यविद्ध इव रूप्यत इत्यत्रापि यदि विक्रियत इत्यर्थो गृह्यते सुतरा-
मर्थो युज्यते ॥ प्रतिघात इति स्वदेशे परस्योत्पत्तिप्रतिबन्धः ॥ परमाणुरूपं तर्हीति 23.17 (10b–1)
द्रव्यपरमाणुरूपं न रूपं प्राप्नोति । कस्मात् । अरूपणात् । निरवयवत्वे सत्यरूपणादित्यभिप्रायः । यतद्वये ऽप्येतच्चोद्यमुपन्यस्तं ' बाधनरूपणे प्रतिघातरूपणे च
द्रव्यपरमाणुर्निरवयवत्वान्न शक्यते रूपयितुमिति । न वै परमाणुरूपमेकं पृथग्भूत- 23.19 (10b–2)
मस्तीति । एकमिति ग्रहणं द्रव्यपरमाणुसंदर्शनार्थम् । पृथग्भूतमसंघातस्थमित्यर्थः । तदीदृग्नास्ति । संघातस्थं नित्यं भवति ।

कामे ऽष्टद्रव्यको ऽशब्दः ।

इत्यादिवचनात् । संघातस्थं तद्रूप्यत एवेत्यर्थादेतदभीष्टं भवति ' तद्द्रव्यपरमा- 23.20 (10b–2)
णुरूपं संघातस्थं रूप्यते ' बाध्यते प्रतिहन्यते च ॥ अतीतानागतं तर्हीति वि- 24.1 (10b–2)
स्तरः । अतीतानागतमदेशत्वान्न रूप्यते ' न बाध्यते न प्रतिहन्यते । तदपीति विस्तरः । 24.2 (10b–2)

24.2 (10b–3) तदपि रूपितमित्यतीतबाधनप्रतिघातनार्थेन । रूपयिष्यमाणमित्युत्पत्तिधर्मकमना-
गतम् । तेनैवार्थद्वयेन । तज्जातीयं चेत्युत्पत्तिधर्मकजातीयमनुत्पत्तिधर्मकमनागतम् ।
इन्धनवत् । यदपीद्धं यदपीन्धिष्यमाणं तज्जातीयं च तदपीन्धनम् । तज्जातीयं पुनरिन्धनं
24.4 (10b–4) यदिन्धनार्थं कल्पितमप्राप्यैवाग्निमन्तरा नंक्ष्यति ॥ अविज्ञप्तिस्तर्हि न रूपं प्राप्नोति ।
कस्मात् । अप्रतिघत्वात् । अप्रतिघत्वेन हि सा न बाध्यते । नापि प्रतिहन्यते । नापि
विज्ञप्तिरूपणादिति विस्तरः । विज्ञप्तिरविज्ञप्तिसमुत्थापिका । तस्याः सप्रतिघाया
रूपणादविज्ञप्तिरपि रूप्यते । यथा छायासमुत्थापकस्य वृक्षस्य प्रचलनाच्छाया
24.7 (10b–5) प्रचलति तद्वत् ॥ न । अविकारादिति । अनेन प्रतिज्ञादोष उद्भाव्यते । परेण ह्येवं
प्रतिज्ञातम् । स्वसमुत्थापकविकारानुविधायिनी अविज्ञप्तिः । समुत्थाप्यत्वाद् । वृक्षच्छा-
यावदिति । सेयं पूर्वाभ्युपगमविरोधिनी प्रतिज्ञा । अभ्युपगतो हि विज्ञप्तेर्विकारे ऽप्य-
विज्ञप्तेरविकारः । यथा ह्यञ्जलिं भङ्क्त्वा कपोतं कुर्वतः कायविज्ञप्तिर्विक्रियत इत्यभ्यु-
24.7 (10b–6) पगम्यते । न त्वविज्ञप्तिः । तस्मादसाधनमेतत् । विज्ञप्तिनिवृत्तौ चाविज्ञप्तिनिवृत्तिः
स्यादित्यनेन धर्मिविशेषविपर्ययो ऽप्यस्याः प्रतिज्ञाया उद्भाव्यते । यदि छाया वृक्षधर्म
इष्यते । वृक्षनिवृत्तौ छायानिवृत्तिर्दृष्टेति तद्वत्स्यात् ॥ अत्र कश्चिद् । न अविकारादिति
न सम्यगेतदुक्तमिति दूषयति । विक्रियत एवाविज्ञप्तिर्विज्ञप्तिविकारे सति । मृदुम-
ध्याधिमात्रत्वे हि विज्ञप्तेर्मृदुमध्याधिमात्रता भवत्यविज्ञप्तेरिति । तदेतदयुक्तम् । कस्मात् ।
उत्पत्तिरेवाविज्ञप्तेरेवं भवति मृदुर्मध्याधिमात्रा वा । न तु विकारः । उत्पन्नस्य हि
24.9 (10b-6) धर्मस्य पुनरन्यथोत्पादनं विकारः । तच्च रूपणमभिप्रेतम् ॥ आश्रयभूतरूपणादित्यपर
इति वृद्धाचार्यवसुबन्धुः । भूतग्रहणमाश्रयभूतप्रदर्शनार्थम् । अतश्चेतरः प्रसञ्जयति । एवं
तर्हि चक्षुर्विज्ञानादीनामपीति विस्तरः । चक्षुराद्याश्रयरूपणात्तद्विज्ञानानामपि
24.12 (10b–8) रूपत्वप्रसङ्गः ॥ विषमो ऽयमुपन्यास इति । वृद्धाचार्यवसुबन्धुदेशीयः कश्चित्परिहरति ।
अविज्ञप्तिर्हीति विस्तरः । छाया वृक्षमुपश्लिष्टाश्रित्य वर्तते । प्रभापि मणिं तथैव ।
उत्पत्तिनिमित्तमात्रं तानि तेषामिति नोपश्लिष्टानीति भावः । तमितरः प्रत्याह ।
24.19(10b–10) इदं तावद्वैभाषिकीयमिति विस्तरः । नैतद्वैभाषिकमतम् । वैभाषिकमतं तु छायावर्णा-

परमाणुः स्वभूतचतुष्कमाश्रित्य वर्तते । न वृत्तम् । तथा प्रभावर्णपरमाणुः स्वभूत-
चतुष्कमाश्रित्य वर्तते । न मणिं । पृथग्द्रव्यत्वादिति । एवमनाश्रयकारणत्वान्मणिवृत्तयो-
र्न महाभूताविज्ञप्तिवद्दुर्गाश्लिष्टे छायाप्रभे इत्यसामान्यं दृष्टान्तदार्ष्टान्तिकयोः । सत्यपि 25.1 (11a–2)
च तदाश्रितत्व इति विस्तरः । यद्यपि पारंपर्येण तदाश्रितत्वमभ्युपगम्यते । छाया
स्वभूताश्रिता तानि तु भूतानि वृत्तमाश्रितानि । प्रभापि स्वभूताश्रिता तानि च
भूतानि मणिमाश्रितानि । तदनुविधायित्वात् । तथाप्यसामान्यं । निरुद्धेष्वप्यविज्ञप्त्या-
श्रयेषु महाभूतेषु तस्या अनिरोधाभ्युपगमादिति ।

नष्टाद्दूर्ध्वमविज्ञप्तिः कामाप्तातीतभूतजा ।

इति सिद्धान्तात् । तस्मान्न भवत्येष परिहार इति । य उक्तोऽभूत् । अविज्ञप्तिर्हि छायेव
वृत्तमिति विस्तरेण । अन्ये पुनरत्र परिहारमाहुरित्ययमेवाचार्यः । तन्मतं समर्थय- 25.5 (11a–4)
त्याह । आश्रयो भेदं गत इति द्विविध इत्यर्थः । कश्चिद्रूप्यते चक्षुरादिः सप्रति-
घत्वात् । कश्चिन्न रूप्यते मनो विपर्ययात् । तस्मादसमानप्रसङ्ग इति । चक्षुर्विज्ञाना-
दीनामप्याश्रयभूतरूपणाद्रूपत्वाप्रसङ्ग इति ॥ रूपणाद्रूपमित्याश्रयरूपणादित्यर्थः । अत्र 25.9 (11a–6)
चोदयन्ति । विज्ञप्तिसंभूताया अविज्ञप्तेरेवंपरिहारेण रूपत्वं भवद्भवेत् । समाधिसंभूतायास्तु
कथं रूपत्वमिति । तज्जातीयत्वात्तदपि रूपम् । किं पुनस्तज्जातीयत्वम् । महाभूतान्युपा-
दायेति भावः । तेषामुपादायरूपजननादिहेतुभूतत्वादिति ॥ १३ ॥

इन्द्रियार्थास्त एवेति । भगवतो विनेयवशात्तिस्रो देशनाः । स्कन्धायतनधातुदेश- 25.15 (11a–7)
नाः । तासु च ये स्कन्धेषु देशिता धर्मास्त एवायतनधातुषु देशिताः । असंस्कृतास्त्वत्र
केवलमतिरिक्ताः । सर्वश्चाभिधर्मः सूत्रव्याख्यानम् । अत इदमुक्तं । इन्द्रियार्थास्त एवेति
विस्तरेण । लाघविकश्चायमाचार्यो । वेदनादिस्कन्धलक्षणमनुक्त्वैव लाघवेन रूपस्कन्धस्व-
भावान्धर्मानायतनधातुषु दर्शयति । इन्द्रियाणि च इन्द्रियार्थाश्च इन्द्रियार्थाः । त एवेति
विशेषणमन्येन्द्रियनिरासार्थमन्यार्थनिरासार्थं च । आयतनव्यवस्थायां तु यथासंख्येन 25.16 (11a–9)
दशायतनानि चक्षुरायतनं रूपायतनं यावत्कायायतनं स्प्रष्टव्यायतनमिति ।
धातुव्यवस्थायां त एव दश धातवः । चक्षुर्धातू रूपधातुर्यावत्कायधातुः स्प्र-

26.3 (11a-10) द्रव्यधातुरिति ॥ उक्तो रूपस्कन्धस्तस्य चायतनधातुव्यवस्थानमिति । न सकलस्य रूपस्कन्धस्यायतनधातुव्यवस्थानमुक्तं ' अविज्ञप्तिरूपस्य वक्ष्यमाणत्वात् । कथमिदमुच्यते ' उक्तमिति । बाहुलिको निर्देशः । बाहुल्येन रूपस्कन्धस्यायतनधातुव्य-
26.5 (11b-4) वस्थानमुक्तमित्यर्थः । कतिपयमुद्गगुलिकासंभवे ऽपि माषराशिव्यपदेशवत् ॥ त्रिविधो ऽनुभव इति । अनुभूतिरनुभव उपभोगः । कस्य । चित्तस्य पुद्गलस्य वा । स च त्रिविधः । सुखो दुःखो ऽदुःखासुखश्च ' वस्तुनो ह्लादपरितापतदुभयविनिर्मुक्तस्वरूपसाक्षात्करणस्वभावः । अनुभूयते वानेन विषय इत्यनुभवः । अनुभवतीति वानुभवः । कायचित्तोपचयापचयतदुभयविनिर्मुक्तावस्थाप्रवृत्तश्चैतसिकविशेषस्पर्शानुभव इत्यपरे । अनुर्लक्षणे
26.9 (11b-6) स्पर्शचिह्नः । स्पर्शनिमित्तो ऽनुभव इत्यर्थः । स वेदनास्कन्धः ॥ निमित्तोद्ग्रहणात्मिकेति । निमित्तं वस्तुनो ऽवस्थाविशेषो नीलत्वादि । तस्योद्ग्रहणं परिच्छेदः । तदात्मिका
26.12 (11b-6) तत्स्वभावा । दुःखादीत्यादिशब्देन लोहितादीनां ग्रहणम् । असौ संज्ञास्कन्धः ॥ यदि परिच्छेदात्मिका संज्ञा ' तत्संप्रयोगे निमित्तमुद्गृह्णातीति पञ्चापि विज्ञानकाया विकल्पकाः स्युः । न स्युः । न हि पञ्चविज्ञानसंप्रयोगिणी संज्ञा पट्वी । मनोविज्ञानकायसंप्रयोगिणी तु पट्वीति तदेव विकल्पकमुक्तम् । षट् संज्ञाकाया वेदनावदिति । यथा चक्षुःसंस्पर्शजा वेदनेति विस्तरेणोक्तं तथा चक्षुःसंस्पर्शजा संज्ञेति विस्तरेण वक्तव्यम् ॥ १४ ॥

27.1 (11b-7) चतुर्भ्यो ऽन्य इति चतुर्भ्यः स्कन्धेभ्यः ' स्कन्धाधिकारात् । रूपस्कन्धादिभ्यस्त्रिभ्य उक्तेभ्यो विज्ञानस्कन्धाच्चोद्दिष्टवक्ष्यमाणकाच्चतुर्भ्यो ऽन्ये संस्काराः संस्कारस्कन्धः ।
27.3 (11b-9) सूत्रे षट् चेतनाकाया इत्युक्तमिति । संस्कारस्कन्धः कतमः ' षट् चेतनाकाया इति । अभिसंस्करणे प्रधाना इति । एवं चैवं च स्यामित्यभिसंस्करणे प्रधानाः ' कर्महेतूपपत्तय इति वचनात् । छन्दप्राप्त्यादयस्तु चेतनानुविधायित्वात्तदाकारहेतुभावानुविधानतः संस्कारस्कन्ध एव वेदितव्याः । तदेवं सति संस्करणे प्रवृत्तो धर्मराशिः संस्कार इत्युक्तं भवति । अपरे पुनराहुः । संस्कृताभिसंस्करणे चेतनायाः प्राधान्यमुक्तं ' अतः सूत्रे चेतनाग्रहणम् । संप्रयुक्तविप्रयुक्तसंस्कृतधर्मसंग्रहेण तु प्राधान्यादयमेव स्कन्धः संस्का-
27.6 (11b-10) रस्कन्ध उक्तः । संस्कारराशिरिति कृत्वा ॥ संस्कृतमभिसंस्करोतीति भाविन्या संज्ञया-

नागतं स्कन्धपञ्चकं संस्कृतमित्युक्तम् ॥ **अन्यथा ह्येति** विस्तरः । यदि यथासूत्रनिर्देशं 27.8 (12a-1) चेतनैव केवला संस्कारस्कन्ध इष्यते नान्ये, शेषाणां छन्दादीनां चैतसिकानां प्राप्त्यादीनां च चित्तविप्रयुक्तानां स्कन्धासंग्रहाद्, रूपादिषु स्कन्धेषु रूपणादिलक्षणाभावेनासंग्रहात्, संस्कारस्कन्धे चैवं सूत्रे यथारुतग्रहणेनासंग्रहादिति स्कन्धेष्वसंग्रहाद्, दुःखसमुदयसत्यत्वं न स्यादिति परिज्ञाप्रहाणे न स्याताम् । परिज्ञा दुःखस्य, प्रहाणं समुदयस्य । अनभिज्ञाय लौकिकेन मार्गेण, अपरिज्ञाय लोकोत्तरेण । अथवानभिज्ञाय दर्शनमार्गेण, अपरिज्ञाय भावनामार्गेण । **एवमप्रहायेत्युक्तमिति** सूत्रान्तरं, नाहमेकध- 27.13 (12a-3) र्ममप्यपरिज्ञायाप्रहाय दुःखस्यान्तक्रियां वदामीति । दुःखनिरोधं वदामीत्यर्थः ॥

ननु चाकाशाप्रतिसंख्यानिरोधौ लोकोत्तरेण मार्गेण न परिज्ञायेते अत्र च दुःखस्यान्तक्रियेष्येते । संक्लेशवस्त्वभिसंधिवचनात्, सौत्रान्तिकदर्शनेन च प्रज्ञप्तिसत्त्वाद्, अदोषः । न हि तौ संक्लेशवस्तु, किमनयोः परिज्ञेयत्वेन । निरोधमार्गसत्ये अपि तर्हि न संक्लेशवस्तु, इति न परिज्ञेये स्याताम् । दुःखसमुदयसत्यसंबन्धसद्भावात्तयोः परिज्ञेयत्वं व्यवस्थाप्यते । तथा हि योगिन एवं विचारयन्ति । अस्य सहेतुकस्य दुःखस्य को निरोधः, केन चोपायेन स निरोधः प्राप्यत इति निरोधमार्गसत्ये अपि परिजानन्ति । न त्वाकाशाप्रतिसंख्यानिरोधयोर्दुःखेन संबन्ध इति न तौ परिजानन्ति । प्रयोगावस्थायां तु लौकिकेन ज्ञानेन तावपि सामान्यरूपेण सर्वधर्मा अनात्मान इति भावयन्ति ॥ **धर्मायतन-** 27.17 (12a-6) **धात्वाख्या इति** । आयतनं च धातुश्चायतनधातुः, धर्मश्चासावायतनधातुश्च धर्मायतनधातुः, तदाख्यैषां, त इमे धर्मायतनधात्वाख्याः । के । **वेदनासंज्ञासंस्कारस्कन्धाः सहाविज्ञप्त्यसंस्कृतैरिति** सहाविज्ञप्त्या सहासंस्कृतैश्चाकाशादिभिर्, आयतनदेशनायां धर्मायतनमिति, धातुदेशनायां च धर्मधातुरिति । **सप्त द्रव्याणीति** । अविज्ञप्तिः, 27.18 (12a-5) वेदनास्कन्धः, संज्ञास्कन्धः, संस्कारस्कन्धः, आकाशं, प्रतिसंख्यानिरोधः, अप्रतिसंख्यानिरोधश्चेति ॥ १५ ॥

विज्ञानं प्रतिविज्ञप्तिरिति । विज्ञानस्कन्धः प्रतिविज्ञप्तिरित्यर्थः, स्कन्धा- 28.5 (12a-8) धिकारात् । प्रतिर्वीप्सार्थः । विषयं विषयं प्रतीत्यर्थः । उपलब्धिर्वस्तुमात्रग्रहणम् ।

28.7 (12b–1) वेदनादयस्तु चैतसिकविशेषग्रहणाद्रूपाः। षट् विज्ञानकाया इति षड् विज्ञानसमू-
28.11 (12b-3) हाः॥ षड् विज्ञानान्यथ मन इति। षड् विज्ञानधातवो यथासंख्येन। यच्चक्षुर्विज्ञानं
स चक्षुर्विज्ञानधातुः। एवं यावद्यन्मनोविज्ञानं स मनोविज्ञानधातुः। समस्तानि त्वेतानि
29.2 (12b–7) षण् मनोधातुरिति वेदितव्यम्॥ १६॥

29.10 (12b–9) षण्णामनन्तरातीतं विज्ञानं यद्धि तन्मन इति। षण्णामिति निर्धारणे षष्ठी।
तेषामेव मध्ये नान्यदित्यर्थः। अनन्तरग्रहणमन्यविज्ञानव्यवहितनिवृत्त्यर्थम्। यद्धि यस्या-
नन्तरमन्यविज्ञानाव्यवहितं तत्तस्याश्रयः। व्यवहितं तु न तस्याश्रयः। अन्यस्यानन्त-
राश्रयो यस्य तदव्यवहितम्। अत एवाचित्तिकावस्थायां चिरातीतमपि समापत्तिप्रवेश-
चित्तं व्युत्थानचित्तस्याश्रयो भवति। विज्ञानान्तराव्यवधानात्। अतीतग्रहणं प्रत्यु-
त्पन्ननिरासार्थम्। मनोविज्ञानं ह्याश्रयि तस्यामवस्थायां प्रत्युत्पन्नम्। अतस्तदतीत-
मिष्यते। तदेव चैतदुच्यते। षष्ठाश्रयप्रसिद्ध्यर्थमिति। विज्ञानग्रहणं वेदनाद्यनन्तरातीत-
निवृत्त्यर्थम्॥ यद्धि तन्मन इति जातिनिर्देशान्न वीप्साप्रयोगः। वृत्तौ तु द्रव्यपदार्थाभि-
29.11(12b–10) धित्सया वीप्साप्रयोगः। यद्यत्समनन्तरनिरुद्धं विज्ञानं तत्तन्मनोधातुरिति। तद्यथा
स एवेति विस्तरः। तद्यथा स एव पुत्रो ऽन्यस्य पितृाख्यां लभते। तदेव फलमन्य-
स्य बीजाख्याम्। तथेहापि स एव चक्षुरादिविज्ञानधातुरन्यस्याश्रय इति मनोधात्वाख्यां
29.15 (13a–2) लभते॥ सप्तदश धातवो भवन्ति द्वादश वेति। य एव षड्विज्ञानधातवः स एव
मनोधातुः। य एव च मनोधातुस्त एव च षट् विज्ञानधातव इतीतरेतरान्तर्भावः। यदि
षड् विज्ञानधातवो गृह्येरन् नार्थो मनोधातुनेति सप्तदश धातवो भवन्ति। यदि मनो-
29.17 (13a–4) धातुर्गृह्येत नार्थः षड्विज्ञानधातुभिरिति द्वादश धातवो भवन्ति। षष्ठाश्रयप्रसि-
द्ध्यर्थमिति। पञ्चानां विज्ञानधातूनामाश्रयप्रसिद्धिर्न क्रियते। चक्षुरादिस्वाश्रयसं-
भवात्। मनोविज्ञानाश्रयो नास्तीति तदाश्रयप्रसिद्ध्यर्थं मनोधातुर्व्यवस्थाप्यते। आश्रया-
दिषट्कव्यवस्थापनेनाष्टादश धातवो भवन्ति। आश्रयषट्कं चक्षुरादिमनोऽन्तकम्। आश्रित-
षट्कं चक्षुर्विज्ञानादिमनोविज्ञानान्तम्। आलम्बनषट्कं रूपादिधर्मान्तमिति। योगाचारदर्श-
नेन तु षड्विज्ञानव्यतिरिक्तो ऽप्यस्ति मनोधातुः। ताम्रपर्णीया अपि हृदयवस्तु मनोवि-

ज्ञानधातोराश्रयं कल्पयन्ति । तच्चारूप्यधातावपि विद्यत इति वर्णयन्ति । आरूप्यधाता-
वपि हि तेषां रूपमभिप्रेतम् । आरूप्य इति च ईषदर्थे आङ् ' आपिङ्गलवदिति ॥
चरमं चित्तमिति निरुपधिशेषनिर्वाणकाले । न मनो भविष्यतीति । न मनोधातुर्भवि- 30.5 (13a–7)
ष्यतीत्यर्थः ॥ न हि तदस्तीति नोत्पद्यत इत्यर्थः ॥ न ' तस्यापि मनोभावेनेति वि-
स्तरः । नैतदेवम् । कस्मात् । तस्यापि चरमचित्तस्य मनोभावेनाश्रयत्वेनावस्थितत्वात् ।
अन्यकारणवैकल्यादिति पौनर्भविककर्मक्लेशकारणवैकल्यात् । नोत्तरविज्ञानसंभू- 30.8 (13a–8)
तिरिति । न पुनर्भवप्रतिसंधिविज्ञानमित्यभिप्रायः ॥ इदमिह विचार्यते । उक्तमेतद् ' आश्र-
याश्रितालम्बनषट्कव्यवस्थानादष्टादश धातवो भवन्तीति । आश्रितषट्कं तावद्व्यवस्था-
प्यते ' चक्षुर्विज्ञानधातुर्यावन्मनोविज्ञानधातुरिति । किमस्याश्रितषट्कस्य यथासंख्यमा-
श्रयषट्कं व्यवस्थाप्यते ' चक्षुर्विज्ञानधातोराश्रयश्चक्षुर्धातुर्यावन्मनोविज्ञानधातोर्मनोधातु-
राश्रय इति । ओमित्याह । यदा तर्हि चक्षुस्तत्सभागं भवति तत्कस्याश्रयः । न कस्य-
चित् । कथं तर्हीदमुक्तं ' चक्षुर्विज्ञानधातोश्चक्षुर्धातुराश्रय इत्यादि । आश्रय एव चक्षुर् '
यस्तु किंचिदनाश्रयस्तत्सभागं चक्षुस्तदपि तज्जातीयत्वाच्चक्षुर्धातुत्वेन व्यवस्थाप्यत एव ।
एवं यावत्कायधातुर्वक्तव्यः ॥ मनोधातुरपि किं मनोविज्ञानधातोरेवाश्रयः । नेत्याह ।
चक्षुर्विज्ञानधात्वादीनामपि हि स आश्रय इष्यते । तथा हि वक्ष्यति ।

चरमस्याश्रयो ऽतीतः पञ्चानां सहजश्च तैः ।

इति । किं तर्हीदमुक्तम् ।

षष्ठाश्रयप्रसिद्ध्यर्थं धातवो ऽष्टादश स्मृताः ।

इति । न ' अन्येषामाश्रयः स इति कृत्वा षष्ठाश्रयप्रसिद्धिर्न भवति । षष्ठस्याप्ययमाश्रयो
भवति संभवतः ॥ आलम्बनषट्कमपि ' चक्षुर्विज्ञानधातोरालम्बनं रूपधातुर्यावन्मनोवि-
ज्ञानधातोर्धर्मधातुरालम्बनमिति । तदिदं विचार्यते । किं यथा चक्षुर्विज्ञानधातोर्यावन्ति
रूपाण्यालम्बनं स रूपधातुर् ' एवं यावत्कायविज्ञानधातोर्यावन्ति स्प्रष्टव्यान्यालम्बनं
स स्प्रष्टव्यधातुर् ' एवं यावन्मनोविज्ञानधातोर्यावन्तो धर्मा आलम्बनं ते सर्वे ऽपि धर्मधा-
तुरिति । अत्र स्थविर आह । सर्वधर्मस्वभावो धर्मधातुः । अष्टादशधातुस्वभाव इत्यर्थः ।

कथमस्याध्यात्मिकबाह्यधातुव्यवस्था सिध्यति । चक्षुरादयो हि द्वादशाध्यात्मिका इष्यन्ते । षड् बाह्या इति । यदि हि ते ऽपि धर्मधातावन्तर्भाव्येरन्सांकर्यं प्राप्नोति । स्थविर आह । पार्यायिकमेषामाध्यात्मिकबाह्यत्वम् । विज्ञानानामाश्रयास्ते चक्षुरादय इत्याध्यात्मिकाः । मनोविज्ञानविषयत्वात्तु बाह्या इति । तदेवं नेच्छन्ति वैभाषिकाः, सूत्रविरोधात् । एवं हि सूत्र उक्तं, धर्मो भिक्षो बाह्यमायतनमेकादशभिरायतनैरसंगृहीतमनिदर्शनमप्रतिघमिति । तस्मात्सप्तद्रव्यको धर्मधातुरेष्टव्यः, अविज्ञप्तिवेदनासंज्ञासंस्कारस्कन्धाकाशप्रतिसंख्यानिरोधाप्रतिसंख्यानिरोधस्वभावत्वात् । अपरिपूर्णस्तर्हि मनोविज्ञानधातोरालम्बननिर्देशः, न च चक्षुर्विज्ञानादीनामपरिपूर्ण आलम्बननिर्देश इष्यते । अस्त्वेतदेवम् । किं तु चक्षुरादीनां षण्णामाश्रयत्वेन निर्देशाच्, चक्षुर्विज्ञानादीनां चाश्रितत्वेन निर्देशाद्, रूपादीनां च पञ्चानां पञ्चविज्ञानकायालम्बनत्वेन निर्देशाद्, न तेषां मनोविज्ञानविषयत्वे ऽपि धर्मधातौ प्रक्षेप इति वर्णयन्ति ॥ १७ ॥

30.17 (13b–1) समासस्तु ज्ञातव्यसर्वसंग्रह इति । आयतनादिभिरपि सर्वसंग्रहो, न तु समासतः, किं तर्हि विस्तरतः । अयं तु देशनात्रयान्निष्कृष्य समासत उक्तः । रूपस्कन्धेन रूपस्कन्धः संगृहीतो, दश चेन्द्रियार्थस्वभावान्यायतनानि धातवश्च, धर्मायतनधात्वेकदेशश्चाविज्ञप्तिः । मनआयतनेन विज्ञानस्कन्धः, तदेव च मनआयतनं, सप्त चित्तधातवश्च संगृहीताः । धर्मधातुना वेदनासंज्ञासंस्कारस्कन्धाः संगृहीता धर्मायतनं धर्मधातुश्च । अविज्ञप्-
31.6 (13b–6) तिरिह द्विः संगृहीता ॥ तद्यथा चक्षुरिन्द्रियमिति । चक्षुरिन्द्रियं वेदनादिस्कन्धश्रोत्राद्यायतनधातुनिरोधसत्यमार्गसत्यस्वभावेन वियुक्तम् । अत एवैतदुक्तं, चक्षुरिन्द्रियं रूपस्कन्धेन चक्षुरायतनधातुभ्यां दुःखसमुदयसत्याभ्यां च संगृहीतं तत्स्वभावत्वाद्, नान्यैः स्कन्धादिभिस्तद्भाववियुक्तत्वादिति । महतात्राल्पकं संगृहीतम् । न तु महदल्पकेन । कथमिति । रूपस्कन्धो महान्सर्वरूपसंग्राहकत्वात्, चक्षुरिन्द्रियमल्पकं रूपस्कन्धैकदेशत्वात् । रूपस्कन्धेन चक्षुरिन्द्रियं संगृहीतं न तु चक्षुरिन्द्रियेण रूपस्कन्धः, चक्षुरिन्द्रियव्यतिरिक्तरूपस्कन्धसद्भावात् । तद्यथा हस्तिपदेन पत्तिपदं संगृहीतं, न तु पत्तिपदेन हस्तिपदं संगृहीतं, तद्वत् । समेन तु सममन्योन्यं संगृहीतम् । तद्यथा चक्षु-

रिन्द्रियं चक्षुरायतनेन , चक्षुरायतनमपि चक्षुरिन्द्रियेणेत्ययमभिधर्मनयो वेदितव्यः । यथा संग्रहवस्तुभिः पार्षदामिति । चत्वारि संग्रहवस्तूनि , दानं प्रियवादितार्थचर्या समानार्थता च । चतस्रः पार्षदः , भिक्षुभिक्षुण्युपासकोपासिकाः । तैस्तासां संग्रहः । स तु कादाचित्कः । कदाचिद्भवः कादाचित्कः । कदाचिदासां दीयते प्रियं चोच्यते , न च संग्रह इति । सांकेतिकः सांव्यवहारिकः । स्वभावसंग्रहस्तु पारमार्थिक इत्युक्तः ॥ १८ ॥ 31.10 (13b–8) 31.12(13b–10)

जातिगोचरविज्ञानसामान्यादेकधातुता । 32.1 (13b–10)

द्वित्वे ऽपि चक्षुरादीनां शोभार्थं तु द्वयोद्भवः ॥

इति । यदेतदुक्तं भवति , जात्यादिभेदाद्यथासंभवं धातुभेदव्यवस्थानं , न त्वधिष्ठानभेदादिति । तत्र चक्षुर्धात्वादीनामन्योन्यं जातिगोचरविज्ञानभेदो भवति । रूपधात्वादीनां जातिविज्ञानभेदः । विज्ञानधातूनां जातिगोचरभेदः । मनोविज्ञानस्यापि हि धर्मधातुरसाधारणो गोचरः । एवं श्रोत्रघ्राणयोरपि योज्यमिति । जातिसामान्यमुभयोः श्रोत्रस्वभावत्वात् । गोचरसामान्यमुभयोः शब्दविषयत्वात् । विज्ञानसामान्यमुभयोरेकश्रोत्रविज्ञानाश्रयत्वात् । तस्मादेक एव श्रोत्रधातुः । एवं घ्राणस्यापि योज्यम् ॥ कार्यान्तराभावात्तर्हि द्वयानुत्पत्तिप्रसङ्गः स्यादित्यत आह , शोभार्थं तु द्वयोद्भव इति । एकचक्षुःश्रोत्राधिष्ठानिकनासिकाबिलसंभवान्महद्वैरूप्यं स्यादित्येकस्य चक्षुःश्रोत्राधिष्ठानस्य एकस्य च नासिकाबिलस्य संभवान्महद्वैरूप्यं स्यात् । ननु चोष्ट्रमार्जारोलूकप्रभृतीनां चक्षुरादिद्वयोद्भवे ऽपि न भवत्याश्रयशोभा । जात्यन्तरापेक्षया न तेषामाश्रयशोभा । स्वजात्यपेक्षया तु यस्य चक्षुरादिद्वयमस्ति तस्य तस्यां स्वजातावाश्रयशोभा । यस्य नास्ति तस्य वैरूप्यमिति , अदूष्यमेतत् ॥ आचार्यसंघभद्रस्त्वस्य सूत्रस्यार्थं विवव्रे , शोभार्थमित्याधिपत्यार्थमित्यर्थः । आधिपत्यसंपन्नो हि लोके शोभत इत्यपदिश्यते । येषां चेन्द्रियाणाममून्यधिष्ठानानि विकलानि तेषां परिशुद्धदर्शनश्रवणघ्राणाख्याधिपत्यं न स्यात् । न हि यथा द्वाभ्यां चक्षुर्भ्यां परिशुद्धं दर्शनं भवति तथैकेन । एवमितरयोरपि योज्यम् । एवं चैषामिन्द्रियत्वं कोपित तदर्थमेतदुक्तं स्यादिति । स्फुटोपलब्ध्यर्थमित्यर्थः । इहापि शक्यमेवं वक्तुं , एकमेव परिस्फुटोपलब्ध्याश्रयभूतं विस्तीर्णं कर्मणोत्पाद्यतां , किमाश्रयविच्छेदेनेति । विभाषायां तु

लिखितमेतत्पदद्वयम् । शोभार्थं द्वयोद्भव इत्येको व्यञ्जनार्थमित्यपर इत्यलं प्रसङ्गेन ॥ ननु
च कर्मवशादिन्द्रियद्वयोत्पत्तिः । किमन्यदेवोच्यते । शोभार्थं व्यञ्जनार्थं चेति । कर्मवशादेवा-
त्रेन्द्रियद्वयोद्भव उक्तः । कथमिति । एवंविभक्तात्मभावाश्रयेणानादिकालाभ्यस्तः शोभाभि-
मानः सत्त्वानां प्रवर्तते । अतस्तदभिलाषपूर्वकेण स्फुटोपलब्ध्यभिलाषपूर्वकेण च कर्मणा
तदिन्द्रियद्वयमभिनिर्वर्त्यमानं शोभार्थं व्यञ्जनार्थं चोद्भवतीत्युच्यते ॥ १९ ॥

32.17 (14b–2) **राश्यायद्वारगोत्रार्थाः स्कन्धायतनधातव** इति । यथाक्रमं राशिरायद्वारं गोत्रं
चार्था एषां त इमे राश्यायद्वारगोत्रार्थाः । के । स्कन्धायतनधातुशब्दाः । अथवा रा-
32.18 (14b–3) श्यायद्वारगोत्रशब्दानामर्थाः के । स्कन्धायतनधातवः । **सूत्रे वचनात्** । सूत्रे राश्यर्थः
स्कन्धार्थ इति राशेर्योऽर्थः स स्कन्धस्यार्थः । तं सूत्रेण दर्शयति । **यत्किंचिद्रूपमती-**
33.6 (14b–6) **तानागतप्रत्युत्पन्नमिति विस्तरः** । **ऐकध्यमि**त्येकधैवैकध्यम् ॥ **अनित्यतानिरुद्ध-**
मित्यनित्यतया संस्कृतलक्षणेन निरुद्धमित्यर्थः । अनित्यताग्रहणमन्यनिरोधनिरा-
सार्थम् । पञ्चविधो हि निरोधः । लक्षणनिरोधः समापत्तिनिरोध उपपत्तिनिरोधः प्रति-
संख्यानिरोधोऽप्रतिसंख्यानिरोधश्च । तद्यद्यतीतं रूपं निरुद्धमित्येवं ब्रूयाद् । अविशे-
षितत्वात्समापत्तिनिरोधादीनामपि प्रसङ्गः स्यात् । न च तैरतीतार्थतेष्यते । समापत्ति-
निरोधो ह्यनागतानामेव चित्तचैत्तानाम् । उपपत्तिनिरोधोऽप्येषामेव । प्रतिसंख्यानिरोधः
सास्रवाणामेव । अप्रतिसंख्यानिरोधो ह्यनुत्पत्तिधर्माणामेवानागतानाम् । तस्माल्लक्षण-
निरोधग्रहणार्थमिदमनित्यताग्रहणम् । **अनागतमनुत्पन्नमि**ति प्रत्युत्पन्नतामसंप्राप्तम् ।
33.7 (14b–7) **प्रत्युत्पन्नमुत्पन्नानिरुद्धमि**त्युत्पन्नग्रहणमनागतविशेषणार्थं । अनिरुद्धग्रहणमतीत-
विशेषणार्थम् । अनागतं यद्यप्यनिरुद्धं न तूत्पन्नम् । अतीतमपि यद्यप्युत्पन्नं न त्वनिरुद्ध-
33.8 (14b–7) मिति ॥ **आध्यात्मिकं स्वासांतानिकमि**ति चक्षुरादिकं रूपादिकं च । **बाह्यमन्य-**
दिति तदेव पारसांतानिकमसत्त्वसंख्यातं च । **आयतनतो वे**ति । आध्यात्मिकं चक्षुरा-
दिपञ्चकं स्वपरसंततिपतितम् । द्वादशाध्यात्मिका इति वचनात् । बाह्यमन्यद् । रूपादिकं
विषयपञ्चकं स्वपरसंततिपतितं । असत्त्वसंख्यातं चाविज्ञप्तिश्च । बाह्यायतनस्वभाव-
33.9 (14b–8) मिति कृत्वा ॥ **औदारिकं सप्रतिघमि**ति । परमाणुसंचयस्वभावम् । **सूक्ष्ममप्रतिघं** ।

अविज्ञप्तिरूपम्। आपेक्षिकं वेति। अपेक्षया वा औदारिकं सूक्ष्मं च भवति। तद्यथा 33.10 (14b-8)
लिक्षामपेक्ष्यौदारिका यूका। यूकामपेक्ष्य सूक्ष्मा लिक्षेति। तदेवं सति सप्रतिघमेवौ-
दारिकं च सूक्ष्मं भवति। अप्रतिघं तु सूक्ष्ममेवासंचितत्वात्। आपेक्षिकत्वादसिद्धमि-
ति। सैव सूक्ष्मा लिक्षा वातायनरजो ऽपेक्ष्यौदारिका। सैव चौदारिका यूकामपेक्ष्य
सूक्ष्मेत्यव्यवस्थितमौदारिकसूक्ष्मत्वं, पारापारवत्। कथं हि नामौदारिकं सूक्ष्मं भवति
सूक्ष्मं चौदारिकमिति। न, अपेक्षाभेदादिति। अपेक्षया भेदो ऽपेक्षाभेदः। तस्मान्नासिद्धम्। 33.11 (14b-9)
यदेवापेक्ष्यौदारिकं न जातु तदपेक्ष्य सूक्ष्मम्। न कदाचित्तदेवापेक्ष्यमित्यर्थः।
पितृपुत्रवदिति। तद्यथा देवदत्तस्य पुत्रो यज्ञदत्तः। यज्ञदत्तस्य पुत्रो विष्णुमित्रः। स 33.13(14b-10)
यज्ञदत्तो विष्णुमित्रमपेक्ष्य पिता देवदत्तमपेक्ष्य पुत्रः। न चापेक्षिकत्वादस्य पितृपुत्रभावो
न सिध्यति। अपेक्षाभेदात्। न हि स यज्ञदत्तस्तमेव विष्णुमित्रमपेक्ष्य पुत्रो नापि तमेव
देवदत्तमपेक्ष्य पितेति। तद्वत्॥ हीनं क्लिष्टं, सद्भिस्त्यक्तमिति कृत्वा। प्रणीतम- 33.14(14b-10)
क्लिष्टं क्लेशादूषितत्वात्। दूरमतीतानागतं संतानप्रच्युतत्वात्, तदसंप्राप्तत्वाच्च।
अन्तिकं प्रत्युत्पन्नं संतानसंनिहितत्वात्॥ एवं यावद्विज्ञानमिति। या काचिद्वेदना 33.16 (15a-1)
अतीतानागतप्रत्युत्पन्ना आध्यात्मिका वा बाह्या वा औदारिका वा सूक्ष्मा वा या वा
दूरे या वा अन्तिके तां सर्वामैकध्यमभिसंक्षिप्य वेदनास्कन्ध इति संख्यां गच्छति। एवं
यावद्विज्ञानं वक्तव्यं, यावत्सर्वमैकध्यमभिसंक्षिप्य विज्ञानस्कन्ध इति संख्यां गच्छती-
ति। अतीतादित्वमेषां वेदनादीनां यथा रूपस्य। अयं तु विशेषो वेदनादीनां, औ- 33.16 (15a-2)
दारिकं पञ्चेन्द्रियाश्रयं वेदनादिचतुष्कम्। अमूर्तत्वात्स्वगतमौदारिकत्वं नास्ति। सूक्ष्मं
मानसम्, आश्रयस्याप्यमूर्तत्वात्। भूमितो वेत्यौदारिकं सूक्ष्मं च वेदनादिकम्। औदा-
रिका कामावचरी वेदना, सूक्ष्मा प्रथमध्यानभूमिका। औदारिका प्रथमध्यानभूमिका,
सूक्ष्मा द्वितीयध्यानभूमिका। एवं यावदौदारिका आकिंचन्यायतनभूमिका, सूक्ष्मा भवाग्र-
भूमिकेति। यथा वेदना एवं यावद्विज्ञानं वक्तव्यम्॥ भदन्त इति स्थविरः कश्चित्सौत्रा- 33.18 (15a-3)
न्तिकः, तन्नामा वा। भगवद्विशेषस्त्वाह। स्थविरधर्मत्रातो ऽसाविति। अत्र वयं ब्रूमः,
यदि धर्मत्रातो ऽतीतानागतास्तित्ववादी स इति न सौत्रान्तिकः, न दार्ष्टान्तिक इत्यर्थः।

तथा हि वक्ष्यति, भावान्यथात्वं भदन्तधर्मत्रातः। स किलाह, धर्मस्याध्वसु प्रवर्तमानस्य
भावान्यथात्वं भवति, न द्रव्यस्यान्यथात्वमिति। सौत्रान्तिकदर्शनावलम्बी चायं भदन्तः।
विभाषायां लिखितः, भदन्त आहेत्येवमादि। भदन्तधर्मत्रातो ऽपि स्वनाम्नैव विभाषायां
लिखितः, भदन्तधर्मत्रात आहेत्येवमादि। तेन लक्ष्यते भदन्तधर्मत्रातादन्यो ऽयं सौत्रान्तिकः
33.19 (15a-3) कश्चित्स्थविरो भिक्षुरिति। पञ्चेन्द्रियग्राह्यमिति रूपादिपञ्चकम्। सूक्ष्ममन्यच्च-
क्षुरादिपञ्चकं, अविज्ञप्तिश्च॥ मनापमिति। मन आप्नोतीति मनआपं मनोज्ञमित्यर्थः।
पुनःसंधिकरणं चात्र द्रष्टव्यम्। पूर्वत्रासिद्धमिति ईषदर्थे नञ्परिग्रहात्किंचित्सिद्धमि-
33.20 (15a-4) त्येकसवर्णदीर्घत्वम्॥ दूरमदृश्यदेशमिति, आधारदेशमाश्रयाधारदेशं चाधिकृत्य। द्रष्टुं
शक्यो दृश्यः। दृश्यो देशो ऽस्येति दृश्यदेशं दृश्याधारदेशं दृश्याश्रयाधारदेशं वा, तद्यथा
कुण्डे बदरम्। चक्षुरादि वा तदन्तिकम्। अदृश्यदेशं तु तद्विपरीतं दूरम्। दूरमदृश्यमिति
नोक्तम्। आसन्नमपि हि किंचिदतिसूक्ष्मत्वान्न दृश्यते। न च तद्दूरमिष्यते दृश्यदेशत्वात्।
किमर्थं पुनरेवं भदन्तेन व्याख्यायते। अतीतादीनां स्वशब्देनाभिहितत्वात्। अन्य-
34.3 (15a-6) था हि पुनरुक्तदोषः स्यात्॥ दूरान्तिकत्वं तु तेषामाश्रयवशादिति। तेषां वेदनादी-
नां, अमूर्तत्वेनादेशस्थत्वात्। तस्मादेवं वक्तव्यं, दूरे ऽदृश्यमानाश्रया वेदनादयः, अन्तिके
दृश्यमानाश्रया इति॥ औदारिकसूक्ष्मत्वं पूर्ववदित्यौदारिकं पञ्चेन्द्रियाश्रयम्। सूक्ष्मं
34.6 (15a-6) मानसमिति॥ चित्तचैत्तानामायमुत्पत्तिं तन्वन्तीत्यायतनानि। द्वयं प्रतीत्य विज्ञा-
34.10 (15a-9) नस्योत्पत्तिरिति सर्वायतनत्वसिद्धिः॥ एकस्मिन्नाश्रये संताने वेति, आश्रये समुदाय-
34.13 (15b-1) लक्षणे शरीरे, संताने वा चित्तादीनां प्रवाहलक्षणे॥ स्वया जातेः किं, आकरा इति
प्रकृतम्। सभागहेतुत्वात्। पूर्वोत्पन्नं चक्षुः पश्चिमस्य सभागहेतुरित्याकरो धातुः।
34.14 (15b-1) यतो हि सुवर्णाद्युत्पत्तिस्तेषामाकरः॥ असंस्कृतं न धातुः स्यात्। न ह्यसंस्कृतमसं-
स्कृतस्यान्यस्य वा सभागहेतुः। चित्तचैत्तानां तर्हीति। किम्। आकरा इति प्रकृतम्।
द्वयं प्रतीत्य विज्ञानस्योत्पत्तिरिति सर्वे धातवो विज्ञानस्य ससंप्रयोगस्य प्रत्ययो ऽवश्य-
34.19 (15b-5) मालम्बनमधिपतिश्चेत्याकराः॥ राशिपुद्गलवदिति। प्रज्ञप्तिसन्तः स्कन्धा राशिशब्द-
वाच्यत्वात्, धान्यराशिवत्, पुद्गलवद्वा। स हि प्रज्ञप्तिसन्पुद्गलः, रूपादिप्रज्ञप्तिकारणा-

निरपेक्षयागृह्यमाणस्वभावत्वाद्, धान्यराशिवत्॥ कार्यभारोद्वहनार्थ इति कार्यमेव भारः 35.3 (15b-6)
कार्यभारः, तदुह्यते तेनेत्युद्वहनं, कार्यभारस्योद्वहनं कार्यभारोद्वहनं, शरीरप्रदेशः, स
लोके स्कन्ध इत्युच्यते। अनेनापि कार्यभार उह्यते, नामरूपप्रत्ययं षडायतनमित्यादिव-
चनात्। तस्मात्स्कन्ध इव स्कन्ध इत्यौपचारिकशब्दः॥ प्रच्छेदार्थो वा। अवध्यर्थो वेत्यर्थः। 35.3 (15b-8)
रूपप्रच्छेदो यावद्विज्ञानप्रच्छेद इति॥ तदेतदुत्सूत्रमिति। तदेतदुभयं कार्यभारोद्वहनार्थः 35.6 (15b-9)
प्रच्छेदार्थश्चेति! उत्क्रान्तं सूत्रादुत्सूत्रम्। सूत्रं हीति विस्तरेण तत्प्रतिपादयति॥
प्रत्येकमिति विस्तरः। कथमित्याह। सर्वमेतदतीतादिरूपमेकश एकैकं रूपस्कन्ध 35.8 (15b-9)
इति। समुदायेन समुदायिद्रव्यमुक्तं, तेषां ह्यतीतादीनां रूपाणां स राशिरित्यभिप्रायः। सूत्रे
ऽप्येवमेवोक्तं, पृथिवीधातुः कतमः, केशा रोमाणीति विस्तरः। एकैकं केशादिद्रव्यं
पृथिवीधातुरिति विज्ञायते। अयं च परिहारः कार्यभारोद्वहनार्थप्रच्छेदार्थपक्षयोरपि
शक्यते वक्तुम्। न शक्यमेवमिति विस्तरः। ऐकध्यमभिसंक्षिप्येति वचनातिरेका- 35.10 (16a-2)
देकैकं रूपस्कन्ध इति न शक्यते विज्ञातुम्। यदि ह्ययमर्थो ऽभविष्यत्तत्सर्वं रूपस्कन्ध
इत्येवावक्ष्यत्। नार्थ ऐकध्यमभिसंक्षिप्येति वचनेन। तस्माद्राशिवदेव स्कन्धाः प्रज्ञ- 35.12 (16a-3)
प्तिसन्त इति स्थापनापक्ष आचार्यस्य। द्रव्यसद्रूपप्रतिपत्तिस्तु स्कन्धनिर्देशे तत्समुदा-
यित्वादित्यवगन्तव्यम्॥ रूपाण्यपीति विस्तरः। रूपिग्रहणमरूपिविशेषणार्थम्। अरू- 35.13 (16a-3)
पि हि मनआयतनमसंस्कृतमपि कारणभावं बिभर्ति। रूपाण्यपि चक्षुरादीन्यायतनानि
समुदितान्येव चित्तचैत्तायद्वारतां गच्छन्ति, नासमुदितानीति समुदायलक्षणत्वात्स्कन्धव-
त्प्रज्ञप्तिसन्ति स्युः। संचिताश्रयालम्बना हि पञ्च विज्ञानकाया इति॥ न, एकशः 35.15 (16a-4)
समग्राणां कारणभावादिति। नैतदेवम्। कस्मात्। एकशः प्रत्येकं समग्राणां समुदि-
तानां कारणत्वात्। यस्माद्बहूनामेषां चक्षुरादिपरमाणूनां परस्परमपेक्षमाणानामेकैकशः
कारणत्वं, न त्वसंहतानाम्। तद्यथा दार्वाकर्षणे बहूनामाकष्टॄणां प्रत्येकमसामर्थ्यं,
समुदितानां परस्परमपेक्षमाणानां सामर्थ्यम्। यथा वा केशाः पृथक्पृथगवस्थिता न
समर्थास्तैमिरिकचक्षुर्विज्ञानकरणे, समुदितास्त्वसंपृक्ता अपि समर्थाः, तद्वच्चक्षुरादीन्द्रि-
यपरमाणवो रूपादिविषयपरमाणवश्च चक्षुरादिविज्ञानोत्पादने प्रत्येकमसमर्थाः, समुदि-

35.16 (16a–5) तास्तु समर्थाः। शक्तिर्हि भावानां तादृश्यवगन्तव्या॥ विषयसहकारित्वादिति। यदि बहूनामायद्वारभाव इति समुदायायतनत्वं स्याद्' न द्रव्यायतनत्वं' इन्द्रियविषयपरमाणूनां समुदितानामायद्वारभाव इति तत्समुदायायतनत्वं स्याद्' न पृथगायतनत्वं स्यात्। इष्यते च पृथगायतनत्वं' द्वादशायतनानीति सूत्रात्। साधनं चात्रोपतिष्ठते। ये सहकारिणो न तैः सह समुदायात्मकायतनभूताश्चक्षुरायतनसमुदायद्रव्यपरमाणवः' चक्षुर्विज्ञानकारणत्वात्' चक्षुरायतनरूपायतनसमुदायद्रव्यपरमाणुवत्। यथा चक्षुरायतनसमुदायद्रव्यपरमाणव एवं

35.17 (16a–6) यावत्कायायतनसमुदायद्रव्यपरमाणवो योज्याः॥ विभाषायां तूच्यत इति। अनेनापि प्रज्ञप्तिसत्तः स्कन्धा इति व्याचष्टे। अयं तु विशेषः' अद्रव्यसन्तो ऽपि ते तत्रोपचारेण प्रदर्श्यन्त इति विशेषार्थस्तुशब्दः। स्कन्धप्रज्ञप्तिमपेक्षत इति। स्कन्ध इति प्रज्ञप्तिमपे-

35.19 (16a–7) क्षते। राशिरिति प्रज्ञप्तिमपेक्षत इत्यर्थः। परमाणुरेकस्य धातोरिति दशानां चक्षुरादीनां रूपिणां धातूनामन्यतमस्य प्रदेशः। एवमायतनानामेषामेवान्यतमस्य' रूपस्कन्धस्य च प्रदेशः। कस्मात्। न हि प्रज्ञप्त्यनपेक्षितायां प्रदेशिप्रवृत्तः शब्दः प्रदेशे व्यवस्थाप्यते।

35.20 (16a–8) अथ नापेक्षते। किं। स्कन्धप्रज्ञप्तिमित्यधिकृतम्। न तर्हि परमाणुरेको धातुरि-

36.2 (16a–8) ति विस्तरः। स एक एव तेषामायतनधातूनां यो ऽन्यतम उक्तो रूपस्कन्धश्च। भवति हि प्रदेशे ऽपि प्रदेशिवदुपचार इति। प्रदेशे ऽपि परमाणावन्यतमरूपायतनधातुत्व-

36.3 (16a–9) रूपस्कन्धत्वोपचारः। तत्र तस्य वेति वर्तिः। यथा पटैकदेशे दग्धे पटो दग्ध इति। यथा पटशब्दः समुदाये प्रवृत्तः प्रदेशे ऽप्युपचर्यते पटैकदेशे' तद्वत्स्कन्धशब्दो ऽतीतादिरूपसमुदायप्रवृत्तः प्रदेशे ऽपि परमाणावुपचर्यत इति। स्कन्धा एव प्रज्ञप्तिसन्तो नायतनधातव इति। रूपादीनां स्कन्धा इति कृत्वा। यदा तु रूपाण्येव स्कन्धा इति समासस्तदा द्रव्यसन्तः स्कन्धा इत्यभिप्रायः॥ इदमिह विचार्यते। किमत्र कारणं यदिन्द्रियपरमाणूनां विषयपरमाणूनां च विज्ञानोत्पत्तये तुल्ये ऽप्यन्योन्यसापेक्षत्वे न द्वयानामेषां केवलेन्द्रियपरमाणुवदेकायतनत्वं व्यवस्थाप्यते। यस्माच्चक्षुरिन्द्रियादिपरमाणवः सर्वे स्वविज्ञानोत्पत्तौ साधारणानि कारणानि भवन्ति' न तु तथा विषयपरमाणवः। तथा हि चक्षुरिन्द्रियपरमाणवो नीलविषयविज्ञानोत्पत्तावपि कारणं भवन्ति' पीतादिवि-

ज्ञानोत्पत्तावपि साधारणानि कारणानि भवन्ति । नीलविषयपरमाणवस्तु स्वविज्ञानोत्पत्तावेव कारणं भवन्ति, न पीतादिविज्ञानोत्पत्ताविति । अतश्चक्षुरिन्द्रियपरमाणुभिस्तद्विषयपरमाणूनामतुल्यवर्तित्वात्, पृथक्स्थानावस्थितत्वाद्, न चक्षूरूपपरमाणूनामेकायतनत्वव्यवस्थानत्वं युज्यते । एवं यावत्कायेन्द्रियस्प्रष्टव्यपरमाणूनामेकायतनत्वव्यवस्थानं न युज्यत इति वक्तव्यम् ॥ **मोहेन्द्रियरुचित्रैधादिति** संमोहप्रज्ञाधिमोक्षत्रैधा- 36.6 (16b–1)
दित्यर्थः । त्रयः **प्रकारास्त्रैधमिति** । त्रिधैव त्रैधमिति स्वार्थे ऽण्प्रत्यय इत्येके । त्रिधाभावस्त्रैधमिति भावे ऽण्प्रत्यय इत्यपरे । मोहेन्द्रियरुचीनां त्रैधम् । तस्मादिति ।
पिण्डात्मग्रहणात इति । केचिच्चैत्तान्पिण्डतो गृहीत्वा तानेवात्मना गृह्णन्ति, पिण्ड- 36.9 (16b–3)
ग्राहे सत्यात्मग्राहप्रवृत्तेः । तेषां स्कन्धदेशना । तस्यां हि वेदनासंज्ञासंस्कारभेदेन त्रिधा चैत्ता देशिताः । नायमेकः पिण्डः, चैत्तविशेषा इहेत्यात्मग्राहः प्रतिपक्षितो भवति । अथवा पिण्डरूपो ऽयमात्मभावः, स चात्मा वेदयिता संज्ञाता चेतयितेति केचित्संमूढाः । तेषां स्कन्धदेशना । नायमात्मरूपः पिण्डः, चैत्ता इमे वेदनासंज्ञासंस्काराः प्रवर्तन्त इत्यात्मग्राहः प्रतिपक्षितो भवति । **केचिद्रूप एवेति**, पिण्डात्मग्रहणतः संमूढा 36.10 (16b–3)
इत्यधिकृतम् । तेषामायतनदेशना । तस्यां हि रूपं चक्षुरादिभेदेन बहुधा विभक्तं, चैत्तास्त्वेकधैव धर्मायतनत्वेन, चित्तं च मनआयतनत्वेनेति । **केचिद्रूपचित्तयोरिति**, संमूढाः पिण्डात्मग्रहणत इत्यधिकृतमेव । तेषां धातुदेशना । तस्यां हि रूपं चक्षुरादिभेदेन बहुधा विभक्तं, चित्तं चक्षुर्विज्ञानादिधातुभेदेन । न तु चैत्ताः, धर्मधातुत्वेनैव देशितत्वादिति । तथा रूपचित्तपिण्डग्राहसंमोहः प्रतिपक्षितो भवति ॥ **इन्द्रियाण्यपी-** 36.11 (16b–4)
ति विस्तरः । त्रिविधः पुद्गलः, तीक्ष्णमध्यमृद्विन्द्रियत्वात् । अथवा त्रिविधः पुद्गलः, उद्घटितज्ञो ऽविपञ्चितज्ञः पदपरम इति । तत्र तीक्ष्णेन्द्रियाणां स्कन्धदेशना । ते हि तीक्ष्णेन्द्रियत्वात्स्कन्धभेदेनैवायतनधातुभेदं प्रतिपत्तुं शक्नुवन्ति । यथोक्तम् । यद्भिक्षो न त्वं स ते धर्मः प्रहातव्य इति, आज्ञातं भगवन्नित्याह । यथा च, कथमस्य भिक्षो संक्षिप्तेनोक्तार्थमाजानासि, रूपं भदन्त नाहं, स मे धर्मः प्रहातव्य इति विस्तरः । मध्येन्द्रियाणामायतनदेशना । ते हि मध्येन्द्रियत्वान्मध्येनैव नातिविस्तीर्णेनायतनप्रभेदेन धा-

तुप्रभेदं प्रतिपत्तुं शक्नुवन्ति, न तु संक्षिप्तेन स्कन्धप्रभेदेन। मृद्विन्द्रियाणां धातुदेशना।
36.12 (16b–4) ते हि मृद्विन्द्रियत्वान्नातिविभक्तं स्वबुद्धिसामर्थ्येन प्रतिपत्तुं शक्नुवन्ति ॥ रुचिरपि त्रि-
विधेति। पूर्वाभ्यासयोगाद्धेतोस्त्रैविध्यम्। अथवा शमथचरितानां संक्षिप्ता रुचिः। शम-
थविपश्यनाचरितानां मध्या रुचिः। विपश्यनाचरितानां विस्तीर्णा रुचिरिति ॥ २० ॥
36.16 (16b–5) किं पुनः कारणमिति विस्तरः। ननु च कारणमुक्तम्। पिण्डात्मग्रहणतश्चैत्त-
संमूढानां स्कन्धदेशनेति। सत्यमुक्तं, चैत्तास्तेषां विभक्ता इति। वेदनासंज्ञे एव तु संस्का-
37.7 (16b–9) रस्कन्धात्पृथक्स्कन्धीकृते, न पुनरन्य इति किमत्र कारणम्॥ कामाध्यवसानामिति
विस्तरः। कामेषु च दृष्टिषु चाभिष्वङ्गः। तयोर्विवादमूलयोरध्यवसानयोर्वेदनासंज्ञे
यथाक्रमं प्रधानहेतुरिति। प्रधानग्रहणादविद्यादयोऽप्रधानहेतव इत्यर्थत उक्तं भव-
37.9 (16b–10) ति। वेदनास्वादवशाद्धि कामानभिष्वजन्ते गृहिणः। विपरीतसंज्ञावशाच्च दृष्टीः,
किं, अभिष्वजन्त इत्यधिकृतम्। अधर्मे धर्मसंज्ञिनो धर्मे चाधर्मसंज्ञिनोऽनात्मादिषु
चात्मसंज्ञिनस्तास्ता दृष्टीः शीलव्रतपरामर्शादीरभिष्वजन्ते। के ते। प्रायेण प्रव्रजिताः।
37.12 (17a–2) वेदनागृद्धो हीति विस्तरः। वेदनासक्तश्चतुर्भिर्विपर्यासैर्विपर्यस्तः संसारे जन्मपरंपरां
37.14 (17a–2) करोति॥ क्रमकारणादिति। चत्वारि कारणानि स्कन्धानुक्रमे वक्ष्यन्ते।

यथौदारिकसंक्लेशभाजनाद्यर्थधातुतः।

इति। रूपं हि सप्रतिघत्वात्सर्वौदारिकं, अरूपिणां वेदना, प्रचारौदारिकतया। तथा हि व्यपदिशन्ति, हस्ते मे वेदना, पादे मे वेदनेति। द्वाभ्यामौदारिकतरा संज्ञा, विज्ञानात्संस्कार इति। अतो यथौदारिकं तत्पूर्वमुक्तमिति प्रथमं कारणम्। अथवानादिमति संसारे स्त्रीपुरुषा अन्योन्यं रूपाभिरामाः। ते च वेदनास्वादगर्धात्। तद्गर्धः संज्ञाविपर्यासात्। तद्विपर्यासः क्लेशैः। चित्तं च तत्संक्लिष्टमिति यथासंक्लेशं क्रम इति द्वितीयम्। भाजनाद्यर्थेन वा। भाजनभोजनव्यञ्जनपक्तृभोक्तृभूता हि रूपादयः स्कन्धा इति तृतीयम्। धातुतो वा। कामगुणरूपप्रभावितो हि कामधातुः। वेदनाप्रभावितानि ध्यानानि। संज्ञाप्रभावितास्त्रय आरूप्याः। संस्कारमात्रप्रभावितं भवाग्रम्। एता विज्ञानस्थितयः, तासु च प्रतिष्ठितं विज्ञानमिति क्षेत्रबीजसंदर्शनार्थः स्कन्धानुक्रम इति

चतुर्थं कारणम् । अत एव च क्रमकारणाद् वेदनासंज्ञे पृथक्स्कन्धीकृते यत एते
औदारिकतरे संक्लेशानुक्रमहेतू भोजनव्यञ्जनभूते, तत्प्रभावितं च धातुद्वयमिति ॥ २१ ॥

न तावदेष्वेवान्तर्णेतुं शक्यते, अर्थायोगादिति । रूपणादेरर्थस्यायोगादसंभ- 38.7 (17a–6)
वात् । रूपस्वभावं यावद्विज्ञानस्वभावमिति वा न शक्यमेष्वेव पञ्चस्कन्धेष्वन्तर्णेतुं, अतत्स्वा-
भाव्यात् । न चापि षष्ठस्कन्धो वक्तुं शक्यते । कुतः, अर्थायोगात् । अतीताद्यर्था- 38.8 (17a–7)
योगादित्यर्थः । ननु च वक्तुत्वादसंस्कृतानामसंस्कृतस्कन्धो ऽन्यो योद्यते, किमतीता-
द्यर्थेनेति । एतच्चायुक्तं, असंस्कृतानां देशसंनिकर्षाभावेनाभिसंक्षेपायोगात् ॥ संक्लेशव- 38.13(17a–10)
स्तुज्ञापनार्थमिति विस्तरः । न संक्लेशवस्तु, अनास्रवत्वात् । न व्यवदानवस्तु,
असंस्कृतत्वात् । व्यवदानहेतुर्हि व्यवदानवस्त्वित्यभिप्रायः । अथवा रूपस्कन्ध इत्युक्ते
यावद्विज्ञानस्कन्ध इत्युक्ते, संक्लेशवस्तु व्यवदानवस्तु च रूपस्कन्धो यावद्विज्ञानस्कन्ध
इति विज्ञायते । न त्वसंस्कृतस्कन्ध इत्युक्ते संक्लेशव्यवदानवस्तु विज्ञायते, इति न
संभवति असंस्कृतं स्कन्ध इति ॥ तेषां धात्वायतनेष्वप्ययं प्रसङ्ग इति । तेषामेवंवा- 39.1 (17b–2)
दिनाम् । यथा घटोपरमो न घटः, एवं धातूपरमो न धातुः, आयतनोपरमो नायतनमिति
धर्मधात्वायतनयोरप्यसंस्कृतं न व्यवस्थापितं स्यात् । सर्वधर्मसंग्रहश्च धात्वायतनेष्वभिप्रेत
इत्यप्युक्तमेतत् ॥ उक्तः स्कन्धानामन्यः प्रकारः, क्रमः पुनरित्यन्यप्रकारवचनापेक्षः 39.3 (17b–2)
पुनःशब्दोपन्यास इति दर्शयति । सर्वौदारिकमिति । सर्वेभ्यो वेदनादिभ्य औदारिकं
रूपं, सनिदर्शनसप्रतिघत्वादियोगात् । अरूपिणां वेदनादीनां, निर्धारणे षष्ठी,
वेदना औदारिकी, प्रचारौदारिकतया समुदाचारौदारिकतयेत्यर्थः । द्वाभ्यां संस्का-
रविज्ञानाभ्यामौदारिकी संज्ञा, निमित्तपरिच्छेदेन सुज्ञानत्वात् । विज्ञानात्संस्कार
औदारिकः, सुखी स्यां न दुःखी स्यामित्यभिसंस्कारलक्षणत्वात् । विज्ञानं तु सर्वसूक्ष्मं,
उपलब्धिमात्रलक्षणत्वात् । यथौदारिकं च विनेयानामर्थप्रतिपादनं न्याय्यमित्येवं स्क-
न्धानुक्रमः ॥ ते च वेदनास्वादगर्धात्, ते च स्त्रीपुरुषा वेदनास्वादासक्तेरन्योन्यं 39.11 (17b–8)
रूपाभिरामा भवन्ति । तद्गर्ध इति वेदनागर्धः । संज्ञाविपर्यासादिति नित्यादिकनिमि-
त्तोद्ग्रहणात् । सुखापि वेदना संस्कारविपरिणामदुःखतया दुःखा ॥ भाजनभोजनमिति 39.15 (18a–1)

विस्तरः । रूपं भाजनभूतं वेदनाश्रयत्वात् । वेदना भोजनभूता आस्वाद्यत्वात् । संज्ञा व्य-
ञ्जनभूता । वेदनां तन्निमित्तोद्ग्रहणेन व्यञ्जयतीति कृत्वा । संज्ञावशेन वा वेदना रोचत
इति कृत्वा व्यञ्जनभूता संज्ञा । चेतना पक्तृभूता विपाकवेदनामभिसंस्कृत्योपनयनात् ।
39.17 (18a–3) विज्ञानं भोक्तृभूतं तदनुग्रहकादिति भाजनाद्यर्थेन वानुक्रमः ॥ धातुतो वेति विस्तरः ।
कामगुणा इव रूपाणि । तैः प्रभावितः प्रकर्षितः कामधातुः । वेदनाप्रभाविता-
नि ध्यानानि । सौमनस्यसुखेन्द्रियप्रभावितं प्रथमं ध्यानम् । सौमनस्येन्द्रियप्रभावितं
द्वितीयम् । सुखेन्द्रियप्रभावितं तृतीयम् । उपेक्षेन्द्रियपरिशुद्धिप्रभावितं चतुर्थं ध्यानम् ।
संज्ञाप्रभाविताश्चत्वार आरूप्याः । आकाशसंज्ञाप्रभावितमाकाशानन्त्यायतनम् । विज्ञा-
नसंज्ञाप्रभावितं विज्ञानानन्त्यायतनम् । आकिंचन्यसंज्ञाप्रभावितमाकिंचन्यायतनम् ।
39.20 (18a–5) संस्कारमात्रप्रभावितं भवाग्रम् । तत्र हि चेतना अशीतिं कल्पसहस्राण्यायुराक्षिप-
40.1 (18a–6) ति ॥ विज्ञानं कस्मात्सर्वेषां पश्चादुक्तमित्यत आह । एता विज्ञानस्थितय इति वि-
स्तरः । चतस्रो विज्ञानस्थितयः । रूपोपगा विज्ञानस्थितिः कामधातुः । वेदनोपगा चत्वारि
ध्यानानि । संज्ञोपगा त्रय आरूप्याः । संस्कारोपगा भवाग्रम् । तासु चतसृषु विज्ञान-
40.2 (18a–7) स्थितिषु प्रतिष्ठितं विज्ञानं । तदाश्रितत्वात् । सर्वेषां पश्चादुक्तम् । इत्येवं क्षेत्रबी-
40.3 (18a–8) जसंदर्शनार्थः स्कन्धानुक्रम उक्तो भवति । अत एव च पञ्च स्कन्धा नाल्पी-
यांसो न भूयांस इति । यथौदारिकादिभिः कारणैर्नाल्पीयांसो न भूयांस इत्यर्थः ॥ २२ ॥

40.16 (18b–1) पञ्च वर्तमानविषयत्वात्पूर्वमुक्तानीति । यानि वर्तमानविषयाणि तानि परि-
स्फुटविषयाणि । परिस्फुटविषयाणि च सुगमानीति पूर्वमुक्तानि । वर्तमानविषयाणि च
पूर्ववृत्तीनि भवन्त्येवं च पूर्वमुक्तानि । मनस्त्वनियतविषयमित्याकुलविषयत्वादसुगमं
पश्चाद्वृत्ति च प्रायेण । कथमित्याह । किंचिद्वर्तमानविषयं किंचिद्यावत्त्र्यध्वानध्व-
विषयमिति । यावच्छब्देन किंचिदतीतविषयं किंचिदनागतविषयं किंचित्त्र्यध्वविषयम् ।
सर्वधर्मा अनात्मान इति यथा । किंचिदनध्वविषयमसंस्कृतविषयमित्यर्थः । एवमनिय-
तविषयं मनः । तथा च न तत्सुगममिति पश्चादुक्तम् । सुगमं हि लोके पूर्वमुपदिश्य-
41.1 (18b–5) मानं दृश्यते ॥ भौतिकार्थाश्चतुष्टयमिति । चक्षुरादिचतुष्टयमुपादायरूपविषयम् ।

तस्मात्तत्कायात्पूर्वमुक्तम् । कायस्य त्वनियतो विषयः । कदाचिद् भूतानि ' कदा-
चिद् भौतिकं ' यदि व्यवच्छेदग्रहणं ' कदाचिदुभयं ' यद्यव्यवच्छेदग्रहणम् ॥ शेषं 41.6 (18b—6)
पुनरितरस्माद्यथायोगं दूराशुतरवृत्त्या पूर्वमुक्तमिति । शेषं चक्षुरादि । तदितर-
स्मात्संभवतो दूराशुतरवृत्त्या ' दूरवृत्त्या दूरतरवृत्त्या आशुतरवृत्त्येति विभज्य ' द्वयं
द्वयाद् ' एकं चैकस्मात् ' पुनरेकं चैकस्मादिति योज्यमित्यर्थः । कथमित्याह । चक्षुः-
श्रोत्रं हि दूरविषयं ' तत्पूर्वमुक्तं द्वयाद् घ्राणजिह्वातः । तयोरपि चक्षुःश्रोत्रयोः
चक्षुषो दूरतरे वृत्तिः । पश्यतो ऽपि दूरान्नदीं तच्छब्दाश्रवणात् । अतस्त- 41.9 (18b—9)
त्पूर्वमुक्तमिति वर्तते ' तच्चक्षुः श्रोत्रात्पूर्वमुक्तम् । तयोराशुतरवृत्तित्वादिति । तयो-
र्घ्राणजिह्वयोर्घ्राणं पूर्वमुक्तं जिह्वायाः । कथमित्याह । अप्राप्तस्यैव जिह्वां भोज्यस्य 41.12 (19b—1)
गन्धग्रहणादिति ॥ इदमिह विचार्यते । घ्राणजिह्वे प्राप्तविषयग्राहिण्यौ । कथं ' भो-
ज्यस्थो गन्धस्तेन घ्राणेन गृह्यते ' न तेनाभोज्यस्थो गृह्यते । वायोस्तु गन्धान्तरमुद्भवति ।
भोज्यावयवेन वा सूक्ष्मेण तदागतो गन्धो गृह्यते ' निरुच्छ्वासस्य गन्धाग्रहणात् । न
तर्हीदं वक्तव्यं ' अप्राप्तस्यैव जिह्वां भोज्यस्य गन्धग्रहणादिति चेत् । यत्पिण्डरूपं भोज्यं
तज्जिह्वामप्राप्तमित्यभिसंधायवचनाददोषः । एवं ह्याशुतरवृत्ति घ्राणं यद्भोज्यावयवसदा-
गतमपि गन्धं जिघ्रति । जिह्वा तु भोज्यावयवसदागतं रसं नास्वादयति ' पिण्डभोज्यस-
दागतमेव तु रसमास्वादयतीति न साशुतरवृत्तिरित्यवगन्तव्यम् ॥ २३ ॥

कथं विशेषणार्थमिति । प्रतिपादयन्नाह ' यथा गम्येत प्रत्येकमिति विस्तरः । 42.7 (19a—8)
यथा विज्ञायेत ' एकैकश एषां दशानामायतनत्वं ' चक्षुरादीनां पञ्चानां विषयित्वेन रूपा-
दीनां च पञ्चानां विषयत्वेन व्यवस्थानात् । न समस्तानामायतनत्वं ' रूपायतनमित्ये-
कमेवेति । तथा च परस्परतो विशेषणं न स्यात् ॥ यदि विशेषणार्थं नामान्तराण्युच्यन्ते
नवानां ' चक्षुरायतनस्य यावत्कायायतनस्य शब्दायतनस्य यावत्स्प्रष्टव्यायतनस्येति '
रूपायतनस्यापि कस्मान्नामान्तरं नोच्यते । अत आह । चक्षुरादिभिश्च विशेषितैर्यन्न 42.10(19a—9)
चक्षुरादिसंज्ञकं रूपं च तद्रूपायतनं ज्ञास्यत इत्यस्य नामान्तरं नोच्यते ।
तद्यथा सर्वासु गोष्वङ्कितासु या गौर्नाङ्किता तस्या अनङ्कनमेवाङ्कनं भवति ' तद्वत् ॥

42.13 (19b–1) **प्राधान्यादिति** त्रिभिः कारणै रूपायतनस्य प्राधान्यम् । रूपणापाण्यादिसंस्पर्शे बाध-
नालक्षणाद्रूपणात् । इदमिहामुत्रेति देशनिदर्शनरूपणाच्च । इदमेव रूपमिति लो-
42.17 (19b–4) कप्रतीतत्वाच्च ॥ **विशेषणार्थमेवैकं धर्मायतनमुक्तमिति** । कथं विशेषणार्थम् । यथा
गम्येत प्रत्येकमेषां द्वादशानामायतनत्वं ' विषयिविषयत्वेन व्यवस्थानाद् ' न समस्ता-
नामिति । चक्षुरादिभिश्च विशेषितैर्यन्न चक्षुरादिसंज्ञकं धर्मश्च तद्धर्मायतनं ज्ञास्यत इति
43.1 (19b–4) तस्य नामान्तरं नोच्यते ॥ **वेदनादीनामित्यादिशब्देन** संज्ञासंस्काराविज्ञप्त्यसंस्कृतानां
43.4 (19b-6) ग्रहणम् ॥ **त्रिंशतिप्रकारत्वेनेति** । रूपं द्विधा विंशतिधेति वचनात् । चक्षुस्त्रयगो-
चरत्वाच्च । मांसचक्षुरस्मदादीनाम् । दिव्यं चक्षुर्देवानाम् । आर्यप्रज्ञाचक्षुरार्याणां ' अना-
स्रवं ज्ञानं सत्यचतुष्टयालम्बनम् । अतो रूपमेव चक्षुस्त्रयगोचरं न चक्षुरादयः । तस्मात्तदेव
रूपायतनमुक्तं नान्यानि ॥ २४ ॥

43.17 (20a–3) **येषां वाक्स्वभावं बुद्धवचनमिति** । येषां सौत्रान्तिकानां वाग्विज्ञप्तिस्वभावं
44.1 (20a–4) तेषां तानि रूपस्कन्धसंगृहीतानि ' शब्दायतनरूपस्कन्धसंगृहीतत्वात् । **येषां नामस्व-
भावमिति** । येषां निकायान्तरीयाणां चित्तविप्रयुक्तं नामास्ति तेषां संस्कारस्कन्धेन
संगृहीतानि ' संस्कारस्कन्धसंगृहीतत्वान्नाम्नः । आभिधार्मिकाणां तूभयस्वभावं बुद्धवच-
नमिष्टम् । तथा हि ज्ञानप्रस्थान उक्तम् । कतमद्बुद्धवचनम् । तथागतस्य या वाग् वचनं
व्यवहारो गीर्निरुक्तिर्वाक्पथो वाग्घोषो वाक्कर्म वाग्विज्ञप्तिः । बुद्धवचनं कुशलं
वक्तव्यं ' अव्याकृतं वक्तव्यम् । स्यात्कुशलं ' स्यादव्याकृतम् । कतरत्कुशलम् । कुश-
लचित्तस्य तथागतस्य वाचं भाषमाणस्य या वाग्यावद्वाग्विज्ञप्तिः । कतरदव्याकृतम् ।
अव्याकृतचित्तस्य तथागतस्येति पूर्ववत् । पुनस्तत्रैवानन्तरमुक्तम् । बुद्धवचनं नाम क एष
धर्मः । नामकायपदकायव्यञ्जनकायानां या अनुपूर्वरचना अनुपूर्वस्थापना अनुपूर्वसमायोग
इति । तेषामाभिधार्मिकाणां रूपस्कन्धेन संस्कारस्कन्धेन च तान्यशीतिर्धर्मस्कन्धसह-
स्राणि संगृहीतानि । नातिरेकाणि मे ऽशीतिर्धर्मस्कन्धसहस्राणि भगवतो ऽन्तिकात्सं-
मुखमुद्गृहीतानीति सूत्रवचनम् । चतुरशीतिर्धर्मस्कन्धसहस्राणीति निकायान्तरे सूत्र-
पाठः ॥ २५ ॥

शास्त्रप्रमाण इत्येक इति । शास्त्रस्य प्रमाणं शास्त्रप्रमाणं । शास्त्रप्रमाणं 44.8 (20a-6)
प्रमाणमस्य सो ऽयं धर्मस्कन्धः शास्त्रप्रमाण इत्येके तावदाहुः । तच्च षट्सहस्राणी-
ति । तच्च शास्त्रं धर्मस्कन्धसंज्ञकं ग्रन्थप्रामाण्येन षट्सहस्राणीति । तानि त्वशीतिर्धर्म-
स्कन्धसहस्राण्यन्तर्हितानि । एकं त्वेतदवशिष्यत इति कथयन्ति । स्कन्धादीनां कथै- 44.10 (20a-10)
कश इत्यपर आहुरिति वाक्याध्याहारः । स्कन्धादीनामेकैका कथा धर्मस्कन्धः । ते
च धर्मस्कन्धा अशीतिसहस्रसंख्या व्याख्यायन्ते । प्रतीत्यसमुत्पादादीनि चेह व्याख्या-
स्यन्ते ॥ प्रणिधिज्ञानारणादीनामिति । आदिग्रहणेन संग्रहवस्तुकर्मपथाशुभानापान- 44.16 (20b-1)
स्मृत्यादीनि गृह्यन्ते ॥

चरितप्रतिपक्षस्तु धर्मस्कन्धो ऽनुवर्णितः । 44.18 (20b-2)

इति । तुशब्दः पूर्वोक्तपक्षनिराकरणार्थो ऽवधारणार्थो वा । रागद्वेषमोहमानादिच- 45.2 (20b-2)
रितभेदेनेति । आदिशब्देन दृष्टिविचिकित्सादीनां ग्रहणम् । केचित्सत्त्वा रागचरिताः
केचिद्द्वेषचरिताः । केचिन्मोहचरिताः । केचिन्मानचरिताः । केचिद्दृष्टिचरिताः । केचि-
द्विचिकित्साचरिताः । केचिद्रागद्वेषचरिताः । केचिद्रागद्वेषमोहचरिताः । केचिद्रागाशया
द्वेषप्रयोगाः । केचिद्द्वेषाशया रागप्रयोगाः । केचित्कृत्रिमरागा निगूढद्वेषाः । केचित्कृ-
त्रिमद्वेषा निगूढरागा इति । तेषां प्रतिपक्षेण भगवता तान्युक्तानीति ॥ २६ ॥

ये ऽप्यन्ये स्कन्धायतनधातव इति विस्तरः । ये ऽपि स्कन्धायतनधातवस्ते 45.11 (20b-8)
ऽप्येष्वेव स्कन्धायतनधातुषु प्रतिपाद्याः प्रवेशयितव्याः । स्वं स्वं स्वभावमेषां यथा
व्यवस्थापितमस्मिञ्शास्त्रे विमृश्य । स्कन्धाः स्कन्धेषु प्रतिपादयितव्याः । आयतनान्या-
यतनेषु । धातवो धातुषु ॥ शीलस्कन्धो रूपस्कन्धसंगृहीत इति कायवाग्विरतिरूप- 46.1 (20b-10)
स्वभावत्वाच्छीलस्कन्धस्य । शेषाः संस्कारस्कन्धेनेति । समाध्यादीनां चैतसिकत्वात् ।
विमुक्तिरिहाधिमोक्षो ऽभिप्रेतः । विमुक्तिज्ञानदर्शनं च प्रज्ञाविशेष एवेति ॥ अष्टावलो- 46.3 (21a-1)
भस्वभावत्वाद्धर्मायतनेनेति । कतमान्यष्टौ । पृथिव्यप्तेजोवायुनीलपीतलोहितावदातकृ-
त्स्नायतनानि । तानि चालोभस्वभावान्यपदेक्ष्यन्ते । अलोभो ऽष्टाविति । अलोभश्च धर्मा-
यतने ऽन्तर्भवति । तेन तत्संग्रहः । सपरिवाराणि तु पञ्चस्कन्धस्वभावत्वान्मनआ- 46.4 (21a-2)

नायतनाभ्याम्। किम्। संगृहीतानि। तस्यालोभस्य परिवारो ऽनुपरिवर्ति रूपं रूपस्क-
न्धः। वेदनासंज्ञे वेदनासंज्ञास्कन्धौ। वेदनादयः संप्रयुक्ता जात्यादयश्च विप्रयुक्ताः संस्का-
रस्कन्धः। विज्ञानं चात्रकलापे विज्ञानस्कन्ध इति पञ्चस्कन्धस्वभावानि तानि भव-
46.5 (21a-3) न्ति। नवमदशमे त्वाकाशानन्त्यायतनविज्ञानानन्त्यायतनकृत्स्ने पश्चाद्वक्ष्येते। तथाभि-
भ्वायतनानीति। तान्यलोभस्वभावत्वाद्धर्मायतनेन। सपरिवाराणि तु पञ्चस्कन्धस्व-
भावत्वान्मनोधर्मायतनाभ्यां पूर्ववद्व्याख्यातव्यानि। आकाशविज्ञानानन्त्यायतनकृत्स्ने
चत्वारि चाकाशानन्त्यायतनादीनि। आकाशविज्ञानानन्त्यायतनाकिंचन्यायतननैव-
संज्ञानासंज्ञायतनानि। चतुःस्कन्धस्वभावत्वान्मनोधर्मायतनाभ्यां संगृहीतानि।
46.9 (21a-4) न हि तत्र रूपस्कन्धो ऽस्ति॥ पञ्च विमुक्त्यायतनानीति विस्तरः। सूत्र
उक्तम्। पञ्चेमानि विमुक्त्यायतनानि। कतमानि पञ्च। इह भिक्षुशास्ता धर्मं देशयति
अन्यतरान्यतरो वा विज्ञो गुरुस्थानीयः सब्रह्मचारी। यथा यथास्य शास्ता अन्यतरा-
न्यतरो वा विज्ञो गुरुस्थानीयः सब्रह्मचारी धर्मं देशयति तथा तथा तेषु धर्मेष्वर्थ-
प्रतिसंवेदी भवति धर्मप्रतिसंवेदी च। तस्यार्थप्रतिसंवेदिनो धर्मप्रतिसंवेदिनश्चोत्पद्यते
प्रामोद्यम्। प्रमुदितस्य प्रीतिर्जायते। प्रीतमनसः कायः प्रश्रभ्यते। प्रश्रब्धकायः सुखं
वेदयते। सुखितस्य चित्तं समाधीयते। समाहितचित्तो यथाभूतं प्रजानाति यथाभूतं पश्य-
ति। यथाभूतं प्रजानन्यथाभूतं पश्यन्निर्विद्यते। निर्विण्णो विरज्यते। विरक्तो विमुच्यते।
इदं प्रथमं विमुक्त्यायतनम्। यत्र स्थितस्य भिक्षोर्वा भिक्षुण्या वा अनुपस्थिता स्मृति-
रुपतिष्ठते। असमाहितं चित्तं समाधीयते। अपरिक्षीणाश्चास्रवाः परिक्षीयन्ते। अननुप्राप्तं
चानुत्तरं योगक्षेमं निर्वाणमनुप्राप्नोति। पुनरपरम्। नैवेह भिक्षुशास्ता धर्मं देशयति अन्य-
तरान्यतरो वा विज्ञो गुरुस्थानीयः सब्रह्मचारी। अपि तु यथाश्रुतान्धर्मान्यथोपदिष्टान्य-
थापर्यवाप्तान्विस्तरेण स्वरेण स्वाध्यायं करोति। यथा यथा तान्यथाश्रुतान्यथोपदिष्टान्य-
थापर्यवाप्तान्विस्तरेण स्वरेण स्वाध्यायं करोति। तथा तथा तेषु धर्मेषु अर्थप्रतिसंवेदी
भवति पूर्ववत्। इदं द्वितीयं विमुक्त्यायतनम्। यत्र स्थितस्येति पूर्ववत्। पुनरपरम्। नैवेह
भिक्षुशास्ता धर्मं देशयति अन्यतरान्यतरो वा विज्ञो गुरुस्थानीयः सब्रह्मचारी। नापि

यथाश्रुतान्धर्मान्यथोपदिष्टान्यथापर्यवाप्तान्विस्तरेण स्वाध्यायं करोति ' अपि तु यथाश्रु-
तान्धर्मान्यथोपदिष्टान्यथापर्यवाप्तान्विस्तरेण परेभ्यः संप्रकाशयति । यथा यथा यथाश्रुता-
न्धर्मान्यथोपदिष्टान्यथापर्यवाप्तान्विस्तरेण परेभ्यः संप्रकाशयति ' तथा तथा तेषु धर्मेष्व-
र्थप्रतिसंवेदी भवतीति पूर्ववत् । इदं तृतीयं विमुक्त्यायतनम् । यत्र स्थितस्येति पूर्ववत् ।
पुनरपरम् । नहैव भिक्षुशास्ता पूर्ववत् । नापि स्वाध्यायं ' नापि परेभ्यः संप्रकाशयति '
अपि तु यथाश्रुतान्यावद्यथापर्यवाप्तांश्चिन्तयति तुलयति उपपरीक्षते । यथा यथा यथाश्रुता-
न्यावद्यथापर्यवाप्तांश्चिन्तयति यावदुपपरीक्षते ' तथा तथा तेषु धर्मेष्वर्थप्रतिसंवेदी भवती-
ति पूर्ववत् । इदं चतुर्थं विमुक्त्यायतनम् । यत्र स्थितस्येति पूर्ववत् । पुनरपरम् । नहैव भिक्षु-
शास्तेति पूर्ववत् । नापि स्वाध्यायं करोति नापि परेभ्यः संप्रकाशयति नापि चिन्तयति '
अपि त्वनेनान्यतमान्यतमं भद्रकं समाधिनिमित्तं साधु च सुष्ठु च सुगृहीतं भवति सुमनसि-
कृतं सुभावितं सुजुष्टं सुप्रतिविद्धं ' तद्यथा विनीलकं वा विपूयकं वा व्याध्मातकं वा वि-
पडुमकं वा विलोहितकं वा विखादितकं वा विक्षिप्तकं वा अस्थि वा अस्थिसंकलिको
वा । यथा यथा खल्वनेनान्यतमान्यतमं भद्रकं समाधिनिमित्तं पूर्ववद्यावत्सुप्रति-
विद्धं ' तथा तथा तेषु धर्मेष्वर्थप्रतिसंवेदी भवति पूर्ववत् । इदं पञ्चमं विमुक्त्यायतनम् ।
यत्र स्थितस्येति पूर्ववत् । विमुक्तेरायद्वारं प्रज्ञाविशेषः । प्रज्ञा च धर्मायतनेन संगृ-
हीता ॥ सपरिवाराणि शब्दमनोधर्मायतनैः । देशनास्वाध्यायपरसंप्रकाशनेषु शब्द- 46.11 (21a–5)
ग्रहणाच्छब्दायतनमस्ति । मनोधर्मायतने तु प्रज्ञापरिवारभूते सर्वत्रस्थे इति त्रिभिः
संग्रहः ॥ द्वयोरायतनयोरिति । सूत्र उक्तं ' रूपिणः सन्ति सत्त्वा असंज्ञिनो ऽप्रतिसंज्ञिनः । 46.12 (21a–6)
तद्यथा देवा असंज्ञिसत्त्वाः । इदं प्रथममायतनम् । अरूपिणः सन्ति सत्त्वाः ' सर्वश आकिंचन्या-
यतनं समतिक्रम्य नैवसंज्ञानासंज्ञायतनमुपसंपद्य विहरन्ति । तद्यथा देवा नैवसंज्ञानासं-
ज्ञायतनोपगाः । इदं द्वितीयमायतनं ' इत्यनयोर्द्वयोरायतनयोर् असंज्ञिसत्त्वा दशभिरायतनैः
संगृहीताः ' गन्धरसायतनयोरेव तत्राभावात् । भवति हि च्युत्युपपत्तिकालयो-
स्तेषां मनआयतनमिति । नैवसंज्ञानासंज्ञायतनोपगा मनोधर्मायतनाभ्यां संगृही- 46.15 (21a–6)
ता इत्यधिकृतं ' तेषामरूपित्वात् ॥ बहुधातुके ऽपि द्वाषष्टिर्धातव इति । सूत्र 46.16 (21a–8)

उक्तम्। आयुष्मानानन्दो भगवन्तमेतदवोचत्। कियता भदन्त पण्डितो धातुकुशलो भवति। भगवानाह। पण्डित आनन्द अष्टादश धातूञ्जानाति पश्यति यथाभूतम्। चक्षुर्धातुं रूपधातुं चक्षुर्विज्ञानधातुं, एवं यावन्मनोधातुं धर्मधातुं मनोविज्ञानधातुमिति। यदीमानानन्द अष्टादश धातूञ्जानाति पश्यति यथाभूतं, षडपि धातूञ्जानाति पश्यति यथाभूतं, पृथिवीधातुमब्धातुं तेजोधातुं वायुधातुमाकाशधातुं विज्ञानधातुमिति। अपरानपि षड् धातूञ्जानाति पश्यति यथाभूतम्। कामधातुं व्यापादधातुं विहिंसाधातुं नैष्क्रम्यधातुमव्यापादधातुमविहिंसाधातुमिति। अपरानपि षड् धातूञ्जानाति पश्यति यथाभूतम्। सुखधातुं दुःखधातुं सौमनस्यधातुं दौर्मनस्यधातुमुपेक्षाधातुमविद्याधातुमिति। चतुरो ऽपि धातूञ्जानाति पश्यति यथाभूतम्। वेदनाधातुं संज्ञाधातुं संस्कारधातुं विज्ञानधातुमिति। त्रीनपि धातूञ्जानाति पश्यति यथाभूतम्। कामधातुं रूपधातुमारूप्यधातुमिति। अपरानपि त्रीन्धातूञ्जानाति पश्यति यथाभूतम्। रूपधातुमारूप्यधातुं निरोधधातुमिति। अपरानपि त्रीन्धातूञ्जानाति पश्यति यथाभूतम्। अतीतं धातुं अनागतं धातुं प्रत्युत्पन्नं धातुम्। अपरानपि त्रीन्धातूञ्जानाति पश्यति यथाभूतम्। हीनधातुं मध्यमधातुं प्रणीतधातुमिति। अपरानपि त्रीन्धातूञ्जानाति पश्यति यथाभूतम्। कुशलं धातुमकुशलं धातुमव्याकृतं धातुमिति। अपरानपि त्रीन्धातूञ्जानाति पश्यति यथाभूतम्। शैक्षं धातुमशैक्षं धातुं नैवशैक्षनाशैक्षं धातुमिति। द्वावपि धातू जानाति पश्यति यथाभूतम्। सास्रवं धातुमनास्रवं धातुमिति। अपरावपि द्वौ धातू जानाति पश्यति यथाभूतम्। संस्कृतं धातुमसंस्कृतं धातुमितीमौ द्वौ धातू जानाति पश्यति यथाभूतम्। इयता चानन्द पण्डितो धातुकुशलो भवतीतीमान्यत्र हि निर्भेदीनि वाक्यानि प्रत्येकं मध्ये ऽपि पठितव्यानि, विस्तरभयात्तु मया न लिखिता-
46.17 (21a–8) नीति बोद्धव्यम्॥ **यथायोगं संग्रहो वेदितव्य इति।** अष्टादश तावद्धातवः, त एवेत्येभिस्ते संगृहीता एव। तथा हि ये पृथिवीधात्वादयः षडुक्तास्तेषामाद्यानां चतुर्णां स्प्रष्टव्यधातौ संग्रहः। आकाशधातो रूपधातौ, आलोकतमःस्वभावत्वात्। विज्ञानधातोः सप्तसु चित्तधातुषु संग्रहः। कामधात्वादीनां तु षण्णां, कामधातुः कामराग इत्यभिप्रेतः,

स च चैतसिकः, व्यापादधात्वादयो ऽपि चैतसिका इत्येति तेषां धर्मधातौ संग्रहः। सुखधात्वादीनामपि षण्णां तस्मिन्नेव संग्रहः। वेदनाधात्वादीनां चतुर्णां, त्रयाणां धर्मधातौ, विज्ञानधातोः सप्तसु विज्ञानधातुषु। कामधात्वादीनां त्रयाणां कामधातोरष्टादशसु धातुषु, रूपधातोश्चतुर्दशसु विना गन्धरसघ्राणजिह्वाविज्ञानधातुभिः, आरूप्यधातोर्मनोधर्ममनोविज्ञानधातुषु। रूपधात्वादीनां तु त्रयाणां द्वयोरुक्तः संग्रहः, निरोधधातोर्धर्मधातौ। अतीतधात्वादीनां त्रयाणां प्रत्येकमष्टादशसु धातुषु संग्रहः। हीनादयस्त्रयो धातवः कामधात्वादय इत्येत्येषामुक्तः संग्रहः। कुशलादीनां त्रयाणां कुशलाकुशलधात्वो रूपशब्दधर्मधातुषु सप्तसु च चित्तधातुषु, अव्याकृतधातोरष्टादशधातुषु संग्रहः। शैक्षाशैक्षधात्वादीनां त्रयाणां द्वयोर्मनोधर्ममनोविज्ञानधातुषु, तृतीयस्याष्टादशसु धातुषु। सास्रवानास्रवधात्वोराद्यस्याष्टादशसु धातुषु, द्वितीयस्य मनोधर्ममनोविज्ञानधातुषु। संस्कृतासंस्कृतधात्वोराद्यस्याष्टादशसु धातुषु, द्वितीयस्य धर्मधातौ संग्रहः। त एते द्वाषष्टिर्धातवः॥ २७॥

ये इमे तत्रेति बहुधातुके। **एतेषां द्वयोर्लक्षणमनुक्तमिति।** पृथिवीधात्वादी- 46.18(21a–10)
नामुक्तं लक्षणं, खरो, धृत्यादिकर्मसंसिद्धाः खरस्नेहोष्णतेरणाः, इति। ननु चाकाशधातु-
रप्युक्तलक्षणः, तत्राकाशमनावृतिः, इति। ननु च विज्ञानधातुरप्युक्तलक्षणः, विज्ञानं
प्रतिविज्ञप्तिः, इति वचनात्। सत्यं, उक्तं सर्वेषां विज्ञानानां लक्षणम्। विज्ञानधा-
तुस्तु किमिह किंचिदेव विज्ञानमित्यभिप्रेत उताहो सर्वमिति न विवेचितम्। असंस्कृतं
चाकाशमुक्तलक्षणं, नत्वाकाशधातुः। अन्यश्चायमन्यदाकाशात्। तथा हि षड्धातुरयं
भिन्नो पुरुष इति सूत्र इतरदुक्तम्। इत्यनया बुद्ध्याभिहितं द्वयोर्लक्षणमनुक्तमिति। अत
एवमाह। **तत्किमाकाशमेवाकाशधातुर्वेदितव्यः, सर्वं च विज्ञानं विज्ञानधातु-** 47.1 (21a–10)
रिति॥ मुखनासिकादिष्विति। आदिशब्देन श्रोत्रादीनां ग्रहणम्। **आलोकतमसी** 47.8 (21b–4)
किलेति। किलशब्दः परमतद्योतनार्थः। स्वमतं तु सप्रतिघद्रव्याभावमात्रमाकाशमित्य-
भिप्रायो लक्ष्यते॥ **रात्रिंदिवस्वभाव इति** रात्रिवर्तिनस्तमसो भास्करातपलक्षणस्य 47.12 (21b–6)
चालोकस्याभिप्रेतत्वात्। बाह्लिकश्चायं निर्देशः। **आद्यं किल चितस्थं रूपमिति** 47.15 (21b–7)

चितस्थं संघातस्थम्। प्रत्यर्थं हन्ति हन्यते वेत्याद्यम्। नैरुक्तेन विधिना प्रत्यर्थशब्दस्य
47.15 (21b–8) आकारादेशः कृतो हन्तेश्च घादेशः। तस्य तत्सामन्तकमिति। तस्याद्यस्य कुड्यादि-
कस्य सामन्तकं समीपस्थम्। तदपेक्ष्य व्यवस्थापितमित्यर्थः। अत्रापि व्याख्याने किल-
47.16 (21b–9) शब्दो वैभाषिकव्याख्यानप्रदर्शनार्थः। स्वमतं तु यत्तत्पश्चादुच्यते। तदाह। अयं चैतद्-
न्यस्य रूपस्य तत्राप्रतिघातात्। न प्रतिहन्यते ऽन्यद्रूपमस्मिन्निति कृत्वा। सामन्तकं
चान्यस्य रूपस्येति चितस्थस्य। अस्मिन्पक्षे कर्मधारयः समासः। अयं च तत्सामन्तकं
47.18 (21a–10) च तदित्यघसामन्तकम्॥ विज्ञानं सास्रवमिति जन्मनो हेतोर्विज्ञानस्याभिप्रेतत्वात्।
48.1 (22a–1) कुत इति चेत्। अत आह। यस्मादिमे षड् धातव इष्टा जन्मनिश्रयाः। षड्धातुरयं
भिक्षो पुरुष इति। षट् खलु धातून्प्रतीत्य मातुः कुक्षौ गर्भस्यावक्रान्तिरिति वचनात्।
48.2 (22a–1) एते हि जन्मन इति विस्तरः। एते हि जन्मनो जनकपोषकसंवर्धकत्वादाधारभूताः।
जनको ह्यत्र विज्ञानधातुः प्रतिसंधिबीजत्वात्। पोषकाणि भूतानि तत्संनिश्रयभूतत्वात्।
संवर्धकमाकाशधातुरवकाशदानात्। अत एवैषां धातुत्ववचनम्। प्रतिसंधिं दधत इति
48.4 (22a–2) धातवः। अनास्रवास्तु धर्मा नैवमिति। न जन्मनिश्रयाः जन्मनिरोधित्वात्॥ २८॥
48.14 (1a–7) सनिदर्शन एको ऽत्र रूपमिति। किमिदं निदर्शनं नाम। येन विशेषेण यो-
गात्तद्वस्तु तथा निदर्शयितुं शक्यते स विशेषो निदर्शनमित्युच्यते। वचनेन परस्य चक्षु-
र्विज्ञानमुत्पन्नं वा निदर्शनं तेन सह वर्तते सनिदर्शन एको रूपधातुः। अत्राष्टादशसु
48.15 (1a–10) धातुषु रूपधातुरेवैकः सनिदर्शन इत्यवधारणादुक्तं भवति अनिदर्शनाः शेषा इति।
अनेन चास्य सनिदर्शनत्वेन प्राधान्यमुक्तमिति न पुनरुक्तदोषप्रसङ्ग इति तत्सिद्धेः।
एते च सनिदर्शनत्वादयः प्रभेदाः प्रायेण सूत्रोक्ता एव प्रदर्श्यन्ते। तथा हि सूत्र उक्तम्।
चक्षुर्भिक्षो आध्यात्मिकमायतनं चत्वारि महाभूतान्युपादायरूपप्रसादो रूपि अनिदर्शनं
सप्रतिघं यावत्कायो भिक्षो आध्यात्मिकमायतनं पूर्ववत्। मनो भिक्षो आध्यात्मिक-
मायतनं अरूपि अनिदर्शनं अप्रतिघम्। रूपाणि भिक्षो बाह्यमायतनं चत्वारि महाभूतान्यु-
पादायरूपि सनिदर्शनं सप्रतिघम्। शब्दा हि भिक्षो बाह्यमायतनं चत्वारि महाभूता-
न्युपादायरूपि अनिदर्शनं सप्रतिघम्। यावत्स्प्रष्टव्यानि भिक्षो बाह्यमायतनं चत्वारि

महाभूतानि चत्वारि च महाभूतान्युपादायरूपि अनिदर्शनं सप्रतिघम्। धर्मा भिन्ना बाह्य-
नायतनं एकादशभिरायतनैरसंगृहीतं अरूपि अनिदर्शनं अप्रतिघमिति। एते च प्रभेदा धा-
तूनामेव अत्र प्रथमकोशस्थानपरिसमाप्तेः कथ्यन्ते, रूपविज्ञानविभागत्वात्॥ सप्रतिघा 48.17 (1b-2)
दश रूपिण इति रूपिग्रहणमरूपिनिरासार्थम्। रूपणं रूपं तदेषामस्तीति रूपिणः।
दशेति चक्षुर्धात्वादयः पञ्च, तद्विषयधातवश्च पञ्चेति। धर्मधातोर्निरासः कथं कृतः।
न चापि हि रूपीति शक्यते वक्तुम्। तत्राविज्ञप्तिरूपसद्भावात्। रूपिण एवेत्यवधार-
णात्तन्निरासः कृतो भवति। ये हि धातवो रूपिस्वभावा एव ते ग्रहीतव्याः। धर्मधा-
तुस्तु रूप्यरूपिस्वभाव इति॥ स्वदेशे परस्योत्पत्तिप्रतिबन्ध इति विस्तरः। यत्रैकं 49.3 (1b-2)
सप्रतिघं वस्तु तत्र द्वितीयस्योत्पत्तिर्न भवति। यथा हस्तो हस्तेनाहतः प्रतिह-
न्यत उपलो वा। हस्तो हस्तस्थान उपलस्थाने वा नोत्पद्यते। उपलो ऽपि।
तयोर्हस्तोपलयोः स्थान उपलो ऽपि नोत्पद्यते॥ जले प्रतिहन्यत इति जले स्वविषये 49.7 (1b-4)
प्रवर्तत इत्यर्थः। प्रायेण मनुष्याणामिति। प्रायोग्रहणं कैवर्तादिनिवृत्त्यर्थम्। अन्ति 49.11 (1b-6)
नोभयत्रेति गर्भे नियतमृत्यूनाम्। एतानाकारानित्येतान्प्रकारानित्यर्थः। तित्तिला
पड्डलयः। मार्जारादीनामिति। आदिग्रहणेन चौरमुनष्यादीनां व्याघ्रादीनां च ग्रहणम्॥
यस्मिन्यस्य कारित्रं स तस्य विषय इति। कारित्रं पुरुषकारः। चक्षुःश्रोत्रादीनां 49.20 (2a-1)
रूपशब्दादिषु आलोचनश्रवणादि कारित्रम्। तच्च स्वचित्तचैत्तान्प्रत्याश्रयभावशक्तिवि-
शेषलक्षणं वेदितव्यम्। यच्चित्तचैत्तैर्गृह्यते दण्डावस्तम्भनयोगेन तदालम्बनं रूपादि। 50.1 (2a-2)
तदेवं सति चित्तचैत्तानामेवालम्बनम्। विषयः पुनश्चक्षुरादीनामपि, न केवलं चित्तचै-
त्तानाम्॥ तस्मात्परेणाप्रवृत्तेरिति। यो हि लोके यतः परेण न प्रवर्तते स तत्र 50.3 (2a-3)
प्रतिहन्यते, काष्ठे कुड्ये वा। तथा चक्षुरादि विषयात्परेण न कारित्रं करोति, विषय
एव तु करोति, तस्मात्तत्र प्रतिहन्यते॥ निपातो वात्र प्रतिघात इति विस्तरः। 50.4 (2a-3)
अत्र विषये निपतनं निपातः। या स्वविषये प्रवृत्तिः कारित्रमित्यर्थः॥ तदिहा- 50.5 (2a-6)
वरणप्रतिघातेनेति विस्तरः। सप्रतिघा दशेत्यत्रावरणप्रतिघातेन ते दश धातवः
सप्रतिघा अभिप्रेताः। तत्र विषयालम्बनप्रतिघाताभ्यां चित्तचैत्तानामपि सप्रतिघत्वप्र

50.8 (2a–8) सद्भावाच्चातुष्कोटिकः प्रश्नः। चतुष्कोटिः चतुःप्रकार इत्यर्थः॥ पश्चात्पादक इति। यदि
50.13 (2b–1) प्रश्नस्य पश्चाद्भागं गृहीत्वा विसर्जनायोत्तिष्ठते स पश्चात्पादकः। यदि पूर्वं भागं गृहीत्वा
50.15 (2b–1) स पूर्वपादकः॥ विषयप्रतिघातेनापि त इति चित्तचैत्ताः। ते हि विषयप्रतिघातेना-
लम्बनप्रतिघातेन च सप्रतिघाः। पञ्चेन्द्रियाणि नालम्बनप्रतिघातेन सप्रतिघानि।
50.17 (2b–4) अनालम्बनत्वात्॥ यत्रोत्पित्सोर्मनस इति विस्तरः। यत्राश्रये आलम्बने वा उत्प-
त्तुकामस्य मनसः प्रतिघातो ऽनुत्पत्तिः शक्यते ऽन्यैः कर्तुमन्तरायकरणेन तदेव साप्र-
तिघं। तेनान्तरायकरणलक्षणेन प्रतिघेन सप्रतिघत्वात्। स्वदेशे परस्योत्पत्तिप्रतिबन्ध-
लक्षणेन प्रतिघातेन सप्रतिघत्वादित्यपरे। किं पुनस्तत्। पञ्चेन्द्रियपञ्चविषयधातुस्व-
50.19 (2b–5) भावम्। विपर्ययादप्रतिघमिष्टं। यत्रोत्पित्सोर्मनसः प्रतिघातो न शक्यते परैः
कर्तुम्। यथा मनोधातोर्धर्मधातोश्च मनोविज्ञानोत्पत्तावन्तरायकरणं न शक्यते परैः कर्तुम्।
51.2 (2b–7) अतः सप्तचित्तधातुधर्मधातुस्वभावमप्रतिघमिति सिद्धम्॥ अव्याकृता अष्टाविति।
अव्याकृता एवाष्टावित्यवधारणम्। कुशलाकुशलभावेनाव्याकरणादव्याकृताः। ये कुश-
लाकुशलव्यतिरिक्तास्त एवाव्याकृता इत्यभिप्रेताः। न तु कुशला अकुशलाव्याकृता-
व्याकरणाद्। नाप्यकुशलाः कुशलाव्याकृताव्याकरणात्। कुशलाकुशलानां कुशलाकु-
51.8 (2b–9) शलभावेन व्याकृतत्वात्। संकेतवृत्त्यपेक्षा हि शब्दप्रवृत्तिः॥ त्रिधान्य इति धातव
51.10 (2b–10) इत्यधिकृतम्। त्रेधैवान्ये नैकधा न द्विधेत्यवधारणम्। अलोभादिसंप्रयुक्ताः कुशला
इति विस्तरः। अलोभाद्वेषामोहह्र्यपत्रपासंप्रयुक्ताः सप्त चित्तधातवः कुशलाः।
लोभद्वेषमोहाह्र्यनपत्रपासंप्रयुक्ता अकुशलाः। कुत्सितात्स्खलिता दुर्गतेरपक्रान्ता इति
कुशलाः। प्रज्ञा वा कुश इव तीक्ष्णेति कुशः। तं लान्ति आददत इति कुशलाः। अन्ये
51.13 (2b–10) त्वलोभादिलोभाद्यसंप्रयुक्ता अव्याकृताः॥ धर्मधातुरिति विस्तरः। अलोभादिस्वभावो
51.14 (3a–1) यो ऽयमुक्तः। अलोभादिसंप्रयुक्तो वेदनादि। अलोभादिसमुत्थो विप्रयुक्तः प्राप्तिज्ञा-
त्यादि अविज्ञप्तिश्च। प्रतिसंख्यानिरोधश्चापर इति चतुर्विधः कुशलो धर्मधातुः।
51.15 (3a–2) लोभादिस्वभावसंप्रयुक्तसमुत्थो ऽकुशलः। अन्यो ऽव्याकृत इति यो नालोभादि-
स्वभावसंप्रयुक्तसमुत्थः। नापि लोभादिस्वभावसंप्रयुक्तसमुत्थः। आकाशं। अप्रतिसंख्या-

निरोधः । तेषां च यथासंभवं प्राप्तिजात्यादयः । एषो ऽव्याकृतो धर्मधातुः । तदन्याव- 51.20 (3a–2)
व्याकृताविति ताभ्यां कुशलाकुशलचित्तसमुत्थाभ्यां रूपशब्दधातुभ्यामन्यौ रूप-
शब्दधातू अव्याकृतचित्तसमुत्थौ कायवाग्विज्ञप्तिसंगृहीतौ विज्ञप्त्यसंगृहीतौ चाव्या-
कृतौ ॥ २९ ॥

कामधात्वाप्ताः सर्व इति । कामधात्वाप्ताः सर्व एवेत्यवधार्यते । अष्टादशधातु- 52.8 (3a–5)
त्वमात्रसंग्रहात् । न तु प्रत्येकं । साकल्यतः । तत आह । रूपे चतुर्दशेति ॥ तयोः 52.12 (3a–8)
कवलीकाराहारत्वादिति तयोर्गन्धरसयोः । गन्धो ऽपि हि कवलीकाराहारः
सूक्ष्मः ॥ तत्राभावप्रसङ्ग इति तत्र रूपधातौ स्प्रष्टव्यधातोरभावप्रसङ्गः । कवली- 52.15 (3a–10)
काराहारत्वात् ।

कवलीकार आहारः कामे त्र्यायतनात्मकः ।

इति सिद्धान्तात् ॥ गन्धरसयोरप्येष प्रसङ्ग इति । यौ नाहारस्वभावौ तौ तत्र स्याता- 52.17 (3b–1)
मित्यर्थः । परिविशिष्टिस्तु स्प्रष्टव्यस्येति किम् । परिभोगः । इन्द्रियाश्रयभावेन 52.18 (3b–2)
आधारभावेन प्रावरणभावेन च ॥ अन्ये पुनराहुरिति भदन्तश्रीलाभः । प्रश्रब्धि- 53.4 (3b–3)
सहगतेनेति प्रश्रब्धिसहोत्पन्नेन कायकर्मण्यतासहगतेनेत्यर्थः । अत्राचार्यो भदन्तश्री-
लाभमतमनादृत्य वैभाषिकमतं सावकाशं दृष्ट्वा विनिश्चयमारभते । एवं तर्हीति 53.8 (3b–5)
विस्तरः । वैभाषिकैरर्थत एतत्प्रतिज्ञातम् । न स्तो रूपधातौ गन्धरसौ । निःप्रयोजन-
त्वात् । पुरुषेन्द्रियविषयवदिति । तं पक्षमाचार्यो दूषयति । दुष्टो ऽयं पक्षः । धर्मिवि-
शेषविपर्ययापन्नत्वात् । रूपधातौ गन्धरसाख्यो हि धर्मी विद्यमानस्वग्राहको ऽभि-
प्रेतः । तस्याविद्यमानस्वग्राहकत्वं प्राप्नोति । यथा हि स्त्रीपुरुषेन्द्रियविषयो निःप्रयो-
जनत्वेन अविद्यमानस्वग्राहको भवति तथा गन्धरसाख्यो ऽपि विषयः प्राप्नोति । स्फु-
टमप्यनुमानयन्ति येनैष धर्मिविशेषविपर्ययो व्यज्यते । न स्तो रूपधातौ घ्राणजिह्वेन्द्रिये
निःप्रयोजनविषयत्वात् स्त्रीपुरुषेन्द्रियविषयवदिति । वैभाषिकदेशीयः कश्चित्प्रतिविधत्ते ।
अस्ति प्रयोजनमिति विस्तरः । ताभ्यां घ्राणजिह्वेन्द्रियाभ्यां विना शरीरशोभैव 53.10 (3b–6)
न स्याद् । वाग्विज्ञप्तिश्च । अनेन दृष्टबाधया प्रसङ्गं निवर्तयति । अनुमानं त्वत्र दृष्टं

बाधते । किं तदित्युच्यते । स्तो रूपधातौ घ्राणजिह्वेन्द्रिये सप्रयोजनत्वात् ' चक्षुरिन्द्रियवदिति । आचार्य आह । यदेतत्प्रयोजनमिति विस्तरः । अधिष्ठानेनैवाश्रयशोभावचनं च भवति नेन्द्रियेणेति सप्रयोजनत्वस्य हेतोरसिद्धतां दर्शयति । वैभाषिकदेशीय
53.13 (3b-7) आह । नानिन्द्रियमधिष्ठानमिति विस्तरः । न रूपधातौ संभवत्यनिन्द्रियं घ्राणजिह्वेन्द्रियाधिष्ठानं ' इन्द्रियाधिष्ठानत्वात् ' पुरुषेन्द्रियाधिष्ठानवदिति । एतेन सप्रयो-
53.14 (3b-8) जनत्वस्य सिद्धतां स्थापयति । आचार्य आह । युक्तस्तदसंभव इति विस्तरः । युक्तस्तत्र पुरुषेन्द्रियाधिष्ठानस्यासंभवो निःप्रयोजनत्वात् । घ्राणजिह्वेन्द्रियाधिष्ठानं त्वाश्रयशो-
53.16 (3b-9) भाभिव्याहारप्रयोजनत्वात्सप्रयोजनम् । अतो ऽस्य विनापीन्द्रियेण युक्तः संभवः । साधनं तत्रोच्यते । संभवति रूपधातावनिन्द्रियं घ्राणजिह्वेन्द्रियाधिष्ठानं ' सप्रयोजनत्वात् ' चक्षुरिन्द्रियाधिष्ठानवदिति । अनेन तामेव सप्रयोजनत्वस्यासिद्धतां व्यवस्थापयति । एवमत्र सप्रयोजनत्ववादिनि वैभाषिकदेशीये कस्मिंश्चिन्निषिद्धे यदेतदादावुक्तं ' एवं तर्हि घ्राणजिह्वेन्द्रिययोरप्यभावप्रसङ्गो निःप्रयोजनत्वादिति तद्दूषणाभासतां
53.17 (3b-9) दर्शयन्तो वैभाषिका आहुः ' निःप्रयोजनापीति विस्तरः । यथा गर्भनियतमृत्यूनां निःप्रयोजनाभिनिर्वृत्तिः ' न हि तेषां रूपदर्शनादि भवति ' एवं रूपधातौ घ्राणजिह्वेन्द्रियाभिनिर्वृत्तिर्निःप्रयोजनापि भविष्यतीति । तेन न स्तो रूपधातौ घ्राणजिह्वेन्द्रिये निःप्रयोजनत्वात् पुरुषेन्द्रियवदिति निःप्रयोजनत्वमनैकान्तिकं प्रदर्श्यते । आचार्य आह ।
53.18 (3b-10) स्यान्नाम निःप्रयोजनेति विस्तरः । भवेन्निःप्रयोजनेन्द्रियाभिनिर्वृत्तिः । न तु निर्हेतुका ' संस्कृतानां सहेतुकत्वात् ॥ यश्च विषयादितृष्णाः स नियतमिन्द्रियादपीत्यनेन हेत्वभावः प्रदर्श्यते । ततश्चैवं साधनमुच्यते । न स्तो रूपधातौ घ्राणजिह्वेन्द्रिये निर्हेतु-
54.3 (4a-2) कत्वाद् ' निर्हेतुकाङ्कुरवत् ' पुरुषेन्द्रियवद्वा ॥ पुरुषेन्द्रियमपि वा किं न निर्वर्तत इत्याचार्य एव विकल्पं वाहयति । को ऽभिप्रायः । यदि निःप्रयोजना हेतुमन्तरेणापि वा घ्राणजिह्वेन्द्रिययोरुत्पत्तिः पुरुषेन्द्रियमपि वा किं न निर्वर्तते । वैभाषिकाणां त्वयं पक्षः ' सघ्राणजिह्वेन्द्रियो रूपधातुसत्त्वसंतानः ' रूपिप्राणित्वात् ' कामावचरसत्त्वसंतानवदिति । आचार्यस्तु पुरुषेन्द्रियमपि किं न निर्वर्तत इति । अनेन तस्य पक्षस्य धर्मिविशेषविपर्ययं

दर्शयति । अविद्यमानपुरुषेन्द्रियो रूपधातुसत्त्वसंतानो धर्मी ' तस्य विपर्ययो विद्यमान-
पुरुषेन्द्रियत्वमिति । वैभाषिकाः परिहरन्ति ' **अशोभाकरत्वादि**ति । कथमिति । न
रूपधातौ पुरुषेन्द्रियमस्ति ' अशोभाकरत्वात् ' काणकुण्ठत्ववत् । तदनुमानव्याघातान्न
विपर्येत्यस्माकमेषा प्रतिज्ञा ' यदि दृष्टं न बाधत इति नैयायिकसिद्धान्तादित्यभि-
प्रायः । आचार्य आह । **कोशगतवस्तिगुह्यानां किं न शोभते** । वस्तौ गुह्यं वस्ति- 54.5 (4a–3)
गुह्यम् । वस्तिर्येन तत्पुरुषेन्द्रियं वेष्टितम् । गुह्यं पुरुषेन्द्रियम् । कोशो यत्र तद्वस्तिगुह्यं
तिष्ठति । कोशगतं वस्तिगुह्यं येषां त इमे कोशगतवस्तिगुह्याः । तेषां किं न शोभते ।
शोभत एवेत्यर्थः । अनेनाशोभाकरत्वमसिद्धं दर्शयति ॥ **न च प्रयोजनवशादुत्पत्तिरि**- 54.6 (4a–4)
ति विस्तरः । वैभाषिकैरशोभाकरत्वादिति ब्रुवद्भिरर्थापत्त्यैतत्प्रतिज्ञातं भवति ' प्रयो-
जनवशोत्पाद्यं पुरुषेन्द्रियमिति । स च पक्षोऽनुमानबाधितः ' धर्मिस्वरूपविपर्यया-
पक्षत्वात् । कथमित्युच्यते । न प्रयोजनवशोत्पाद्यं पुरुषेन्द्रियं ' स्वकारणोत्पाद्य-
त्वात् ' काणकुण्ठत्ववत् । वैभाषिका आहुः । **सूत्रं तर्हि विरुध्यत इति विस्तरः** । यो 54.8 (4a–6)
ऽयमविद्यमानघ्राणजिह्वेन्द्रियो रूपधातुसत्त्वसंतान इति पक्षः स सापक्षालः ' प्राक्पक्षवि-
रोधात् । तथा हि भगवता रूपावचराः सत्त्वा **अविकलाहीनेन्द्रिया** इति उक्ताः । अवि- 54.9 (4a–6)
कलेन्द्रियाः काणकुण्ठत्वाभावात् । अहीनेन्द्रियाश्चक्षुरादिभिरहीनत्वात् । आचार्य आह ।
यानि तत्रेति विस्तरः । यानि तत्र रूपधातौ घ्राणेन्द्रियादिरहितानि चक्षुरादीनि 54.10 (4a–6)
तैरहीनेन्द्रिया इति सूत्रार्थपरिग्रहादविरोधः । एवं तु वर्णयन्ति वैभाषिकाः ' **सन्त** 54.14 (4a–8)
एवेति विस्तरः । भवत एव तत्र रूपधातौ घ्राणजिह्वेन्द्रिये न तु गन्धरसौ ।
आत्मभावमुखेन हि स्वसंतानमुखेन षडायतने चक्षुरादिके तृष्णासमुदाचारः
प्राणिनां प्रवर्तते ' तदभिष्यन्दितं च कर्मेति सहेतुके रूपधातौ घ्राणजिह्वेन्द्रिये । ततश्च
सहेतुकत्वात् सन्त एव ते रूपधातौ ' सहेतुकाङ्कुरादिवदिति । अनेन च ' न स्तो रूपधातौ
घ्राणजिह्वेन्द्रिये निर्हेतुकत्वादिति यत्साधनमुक्तं तदसिद्धमिति प्रतिपादयन्ति । पुरुषे- 54.15 (4a–9)
न्द्रिये तु मैथुनस्पर्शमुखेन ' किं ' तृष्णासमुदाचार इति प्रकृतम् । मैथुनस्पर्शवीत-
रागाश्च रूपावचराः सत्त्वाः ' तस्मात्तत्र न तृष्णापूर्वकं कर्म भवति । तस्मादहेतुकत्वात्तत्र

पुरुषेन्द्रियं नास्ति । निर्हेतुकाङ्कुरादिवदिति । सिद्धं रूपधातौ चतुर्दशैव धातव इति ॥ ३० ॥

55.3 (4b–1) आरूप्याप्ता इति विस्तरः । मनोधर्ममनोविज्ञानधातव एवारूप्याप्ता इत्यवधार-
णादन्ये धातवो न सन्तीत्युक्तं भवति । यस्माद्रूपवीतरागाणां तत्रोपपत्तिरतो दश रूपस्वभावा धातवः । चक्षुरादयः पञ्च रूपादयश्चापि पञ्च न सन्ति । तदाश्रयालम्बनाश्च पञ्च विज्ञानधातवो न सन्तीति । ते चक्षुरादयो रूपादयश्च यथाक्रममाश्रया आलम्बनानि च येषां त इमे तदाश्रयालम्बनाः । आश्रयाणां चक्षुरादीनामालम्ब-
55.6 (4b–5) नानां च रूपादीनामभावात् ते ऽपि चक्षुर्विज्ञानादिधातवस्तत्र न सन्ति ॥ सास्रवा-
55.11 (4b–7) नास्रवा एते त्रय इति । त एव त्रयः सास्रवानास्रवा इत्यवधारणम् ॥ शेषास्तु सा-
स्रवा इति । किमर्थमिदमुच्यते । नन्वेत एव त्रयः सास्रवानास्रवा इत्यवधारणाच्छेषाः सास्रवा इति सिद्धम् । न सिद्धम् । कथम् । शेषाः सास्रवा एवानास्रवा एव वा स्युरित्याशङ्का । तन्निवृत्त्यर्थमिदमुच्यते । शेषाः सास्रवा एवेति ॥ ३१ ॥

56.3 (4b–10) सवितर्कविचारा हि पञ्च विज्ञानधातव इति । सवितर्कसविचारा एवेति ।
56.6 (5a–3) न विनिश्चयधातव इति हिशब्दो ऽवधारणे ॥ अन्त्यास्त्रयस्त्रिप्रकारा इति ।
56.10 (5a–4) अन्त्या एव त्रिप्रकाराः इत्यवधारणम् ॥ अन्यत्र वितर्कविचाराभ्यामिति । वितर्क-
विचारौ संप्रयुक्तकधर्मधातुस्वभावौ । तयोरत्र प्रकरणप्रसङ्ग इति परिवर्ज्येते । वितर्को हि द्वितीयप्रकारे ऽन्तर्भविष्यति । विचारो ऽपि ध्यानान्तरस्तृतीये प्रकारे ऽन्तर्भवति । तदन्यस्तु त्रिष्वपि प्रकारेषु नान्तर्भवतीति वक्ष्यति ॥ त एते मनोधात्वादयः संप्रयुक्तध-
56.11 (5a–4) र्मधातुपर्यन्ताः कामधातौ प्रथमे च ध्याने ससामन्तके मौले सवितर्काः सविचाराः ।
56.12 (5a–5) वितर्कविचारसंप्रयोगात् । अत एव ध्यानान्तरे ऽवितर्काः । वितर्काभावाद् । विचा-
रमात्राः । विचारसंप्रयोगात् । अत एव द्वितीयात्प्रभृति यावद्भवाग्रं तयोरभावाद्
56.14 (5a–6) अवितर्का अविचाराः ॥ सर्वश्चासंप्रयुक्तो धर्मधातुरिति यथासंभवं त्रैधातुकरूपचित्त-
56.15 (5a–6) विप्रयुक्ता असंस्कृताश्च । ध्यानान्तरे च विचारो ऽवितर्कः । वितर्काभावाद् । अवि-
56.19 (5a–7) चारः । द्वितीयविचाराभावात् ॥ विचार एषु त्रिषु प्रकारेषु नान्तर्भवतीति ।

कामधातुप्रथमध्यानभूमिको विचारः प्रथमे तावत्प्रकारे नान्तर्भवति ' सवितर्कः सविचार
इति । स हि सवितर्कः संभवति ' न तु सविचारः ' विचारासंप्रयोगात् । द्वितीये ऽपि
नान्तर्भवति ' अवितर्को विचारमात्र इति ' वितर्कसंप्रयोगाद् द्वितीयविचाराभावाच्च ।
तृतीये ऽपि नान्तर्भवति ' अवितर्को ऽविचार इति । स हि यद्यप्यविचारो द्वितीयवि-
चाराभावाद् ' न त्ववितर्को वितर्कसंप्रयोगात् । स कथं वक्तव्य इत्यत आह ' अवि- 57.1 (5a–7)
चारो वितर्कमात्र इति । द्वितीयविचाराभावाद् अविचारः ' वितर्कसंप्रयोगाद्
वितर्कमात्रः । अत एवेति ' यस्मात्सवितर्कसविचाराणां भूमौ विचार एवंचतुर्थप्रकारो
भवति ' अविचारो वितर्कमात्र इति ॥ शेषा उभयवर्जिता इति शेषा दश रूपिणो 57.9 (5b–2)
धातवो ऽनुक्ताः । ते ऽवितर्का विचारमात्रा वा अवितर्का अविचाराः स्युरित्याशङ्का-
यामवधार्य तदुभयवर्जिता एव ' शेषा अवितर्का अविचारा एवेत्यर्थः ॥ ३२ ॥

कथमविकल्पका इत्युच्यन्त इति ' चक्षुर्विज्ञानसमङ्गी नीलं विजानाति नो तु 57.14 (5b–3)
नीलमिति वचनात् । त्रिविधः किल विकल्प इति । किलशब्दः परमतद्योतनार्थः । 58.2 (5b–7)
स्वाभिप्रायस्तु ' चेतनाप्रज्ञाविशेष एव वितर्क इति ' न स्वभावविकल्पो ऽन्यो धर्मो
ऽस्तीति । तथा ह्यनेन पञ्चस्कन्ध उक्तम् । वितर्कः कतमः । पर्येषको मनोजल्पः चेत-
नाप्रज्ञाविशेषः ' या चित्तस्यौदारिकता । विचारः कतमः । प्रत्यवेक्षको मनोजल्पः ' तथैव
या चित्तस्य सूक्ष्मता । अनत्यूहावस्थायां चेतना ' अत्यूहावस्थायां प्रज्ञेति व्यवस्थाप्यते ।
तदेषां स्वभावविकल्पो ऽस्तीति । तदिति वाक्योपन्यासे निपातः ' तस्मादर्थो वा । 58.3 (5b–7)
स्वभावेनैव विकल्प औदारिकलक्षणत्वात्स्वभावविकल्पो वितर्कः । स एषां पञ्चानां
विज्ञानकायानां संप्रयोगतो ऽस्ति । तस्मात्सविकल्पका उक्ताः । नेतरावभिनिरूपणानु- 58.4 (5b–8)
स्मरणविकल्पावेषां स्तः । तस्मादविकल्पका उच्यन्ते । यथैकपादको ऽश्वो
ऽपादक इति । पादत्रये छिन्न एकस्मिन्नपि पादे सत्यपादक इत्युच्यते ' तद्वदेकविकल्पा
अविकल्पका इति ॥ सा व्याभिनिरूपणाविकल्प इति । सा मानस्यसमाहिता प्रज्ञा 58.11 (6a–1)
श्रुतचिन्तामय्युपपत्तिप्रतिलम्भिका च । सा हि मनसि भवा मानसी । व्यग्रा ' विविधाग्रा
व्यग्रा विविधालम्बनेत्यर्थः । विगतप्रधाना वा ' मुहुर्मुहुरालम्बनान्तराश्रयणाद् व्यग्रा ।

कस्मादभिनिरूपणाविकल्प इत्युच्यते । तत्र तत्रालम्बने नामापेक्षयाभिप्रवृत्तेः ' रूपं वेदना
अनित्यं दुःखमित्याद्यभिनिरूपणाच्च । समाहिता तु भावनामयी नामानपेक्षयालम्बने प्रव-
58.12 (6a–2) र्तत इति नैषाभिनिरूपणाविकल्प इत्युच्यते ॥ मानस्येव सर्वा स्मृतिरिति समाहिता
चासमाहिता च । सा किल नामानपेक्षानुभूतार्थमात्रालम्बना प्रवर्तते ' स्मृतिः कतमा '
चेतसो ऽभिलाप इति लक्षणात् । पञ्चविज्ञानकायसंप्रयुक्ता तु नानुभूतार्थाभिलापप्रवृत्ते-
ति नानुस्मरणाविकल्प इत्युच्यते ॥ ३३ ॥

59.3 (6a–5) सप्त सालम्बना इत्युभयावधारणम् । सप्तैव सालम्बनाः सालम्बना एव च सप्तेति ।
अर्धं च धर्मतः सालम्बनमित्युक्तव्यतिरेकेणेदमुच्यते । अत्राप्युभयावधारणम् । धर्मा-
र्धमेव सालम्बनं सालम्बनमेव च धर्मार्धमिति । यस्माच्च सप्तैव सालम्बना धर्मार्धं चैव
59.8 (6a–8) सालम्बनमित्यवधारणमस्ति तस्माच्छेषा दश रूपिणो धातवो धर्मधातुप्रदेशश्चा-
संप्रयुक्तो ऽनालम्बना इति सिद्धमित्युक्तम् । तथा ह्यनवधारणे ह्ययमर्थो न सिध्येत् ॥
59.10 (6a–9) नवानुपात्ता इति नवानुपात्ता एवेत्यवधारणम् ॥ ते चाष्टाविति ते सप्त चित्तधातवो
59.11 (6a–10) धर्मधातुश्च यस्यार्धं सालम्बनमुक्तं ' अष्टमस्यार्धेन सार्धमिति ' सहेति यावत् । अष्ट-
ग्रहणं सकलधर्मधातुग्रहणार्थं ' मा धर्मधात्वर्धग्रहणं विज्ञायीति । ते चाष्टौ शब्दश्चापर
59.14 (6a–10) इति नवानुपात्ता इति उक्ताः । अन्ये नव द्विधेति चक्षुरादयः पञ्च शब्दवर्ज्याश्च रूपा-
दयश्चत्वार इति नव ते द्विधैव ' उपात्तानुपात्ता इत्यर्थः । न तूपात्ता एवेत्येतदर्थं च '
60.5 (6b–1) अन्ये नव द्विधा ' इति पुनः सूत्रितम् ॥ अनुग्रहोपघाताभ्यामन्योन्यानुविधानादि-
ति । चक्षुर्धात्वादीनामनुग्रहोपघाताभ्यामञ्जनादिपाणिघातादिलक्षणाभ्यां चित्तचैत्तानाम-
नुग्रहोपघातौ भवतः । चित्तचैत्तानां चानुग्रहोपघाताभ्यां सौमनस्यदौर्मनस्यलक्षणाभ्यां
60.6 (6b–7) चक्षुर्धात्वादीनामनुग्रहोपघातौ भवतः । अतस्ते चित्तचैत्तैरधिष्ठानभावेनोपगृहीता
उच्यन्ते । स्वीकृता इत्यर्थः ॥ यल्लोके सचेतनमिति सजीवमित्यर्थः ॥ ३४ ॥

60.15 (7a–1) स्प्रष्टव्यं द्विविधमित्युभयावधारणम् । स्प्रष्टव्यमेव द्विविधं ' द्विविधमेव स्प्रष्ट-
60.18 (7a–6) व्यमिति । शेषा रूपिणो नव ' भौतिका इत्यत्राप्युभयावधारणम् । धर्मधात्वेकदेशश्च
भौतिक इत्यत्राप्युभयावधारणम् । यस्माच्चैत उभयावधारितास्तस्माच्छेषाः सप्त चित्त-

धातवो धर्मधातुश्चाविज्ञप्तिवर्ज्यो नोभयथेति सिद्धम् ॥ भूतानां चतुष्कं ' 61.7 (7a–8)
खक्खटादिलक्षणावधारणादिति । चतुष्कावधारणात्पृथिव्यप्तेजोवायुधातवः स्प्रष्ट-
व्यधातौ चत्वारि भूतानि । श्लक्ष्णत्वादयस्तत्र चक्षुरादयश्च न भूतानि । खक्खटादिलक्ष-
णावधारणाच्च पृथिव्यप्तेजोवायुधातुष्वन्ये धर्माश्चक्षुरादयो नान्तर्भावं गच्छन्ति । कथम् ।
चत्वारि महाभूतानि ' पृथिवीधातुरब्धातुस्तेजोधातुर्वायुधातुः । पृथिवीधातुः कतमः ।
खक्खटत्वमिति विस्तरः । तेषां च स्प्रष्टव्यत्वादिति तेषां च खक्खटत्वादीनां स्प्र- 61.8 (7a–8)
ष्टव्यत्वात् ' यस्मात्तानि स्प्रष्टव्यानि ' वर्णादयस्तु द्रष्टव्याः श्रोतव्या घ्रातव्याः स्वाद-
यितव्याः । कथं गम्यते स्प्रष्टव्यानि तानीत्यत आह ' न हि काठिन्यादीनि 61.9 (7a–9)
चक्षुरादिभिर्गृह्यन्ते । किं तर्हि कायेन्द्रियेणैव ' इत्यतोऽवगम्यते ' स्प्रष्टव्यानि
तानीति । स्यान्मतं तेऽपि वर्णादयः स्प्रष्टव्या इत्यत आह ' नापि वर्णादयः 61.10 (7a–9)
कायेन्द्रियेण ' किं ' गृह्यन्त इति प्रकृतम् । उक्तं च सूत्र इति विस्तरः । अपर- 61.11 (7a–10)
स्मिन्नपि सूत्रे स्पष्टमादर्शितम् । कथमिति । विस्तरेण यावदिदमुक्तं ' स्प्रष्टव्यानि 61.18 (7a–10)
भिक्षो बाह्यमायतनं ' चत्वारि महाभूतानि चत्वारि च महाभूतान्युपादाय-
रूप्यनिदर्शनं सप्रतिघमिति । शेषं चक्षुराद्यायतनं न भूतानीति स्पष्टमादर्शि- 62.2 (7b–5)
तम् ॥ यत्तर्हि सूत्र उक्तमिति विस्तरः । यच्चक्षुषि मांसपिण्डे खक्खटं 62.3 (7b–6)
खरगतं खरप्रकार इत्यर्थः । चक्षुरिन्द्रियं खक्खटस्वभावमिति मत्वा चोदयति ।
तेनाविनिर्भागवर्तिनो मांसपिण्डस्यैष उपदेश इति । तेन चक्षुरिन्द्रियेणाविनिर्भा-
गवर्तिनोऽधिष्ठानस्यैतद्वचनम् । भवति हि चक्षुरधिष्ठानेऽपि चक्षुरुपचारः । अत एव
मांसपिण्ड इति ग्रहणम् । अन्यथा चक्षुषीत्येवावक्ष्यत यदीन्द्रियमेवेष्यते ॥ षड्धातुर- 62.6 (7b–8)
पि भिक्षो पुरुष इति विस्तरः । गर्भावक्रान्तिसूत्रे कललाद्यवस्थायामिति भूतमात्रो-
पदेशनान्न भौतिकमस्तीति चोद्यमाशंक्याह ' मूलसत्त्वद्रव्यदर्शनार्थमिति । मूलसत्त्वस्य 62.7 (7b–9)
द्रव्यसंदर्शनार्थमेव । पृथिवीधात्वादयः चत्वारो मूलसत्त्वं ' पञ्चानां चक्षुरादीनां स्पर्शायत-
नानां तत उत्पत्तेः । मनोधातुरपि मूलसत्त्वं ' मनःस्पर्शायतनस्य तत उत्पत्तेः । अथवा
चतुर्णां पृथिवीधात्वादीनामुपादायरूपाश्रयत्वात् ' विज्ञानधातोश्च चैतसिकानामाश्रयत्वात् ।

त एव मूलसत्त्वम् । कथं गम्यते । **पुनः षट्स्पर्शायतनवचनात्** । तत्रैव सूत्रे पश्चादुक्तं , षट् स्पर्शायतनानीति , चक्षुःस्पर्शायतनं यावन्मनःस्पर्शायतनमिति , अतो विज्ञायते मूलसत्त्वद्रव्यसंदर्शनार्थत्वात् षड्धातुरयं भिन्नो पुरुष इति वचनं , न तु भूतमात्रत्वादिति । ननु च यथा विज्ञानधातोरव्यतिरिक्तमपि मनःस्पर्शायतनं पुनरुच्यते , एवं चक्षुरादीन्यपि चतुर्धात्वव्यतिरिक्तानि पुनरुच्येरन्निति । अतो न पुनःषट्स्पर्शायतनवचनेन तद्व्यतिरिक्तभौतिकास्तित्वसिद्धिः । नैतदेवम् । यदि हि पृथिवीधात्वादय एव स्पर्शायतनान्यभविष्यन्भूतान्येव स्पर्शायतनानीत्येवावक्ष्यत । न त्वेवं , किं तर्हि , चक्षुःस्पर्शायतनं यावन्मनःस्पर्शायतनमिति , अतो ऽवगम्यते , पृथिवीधात्वादिव्यतिरिक्तानि चक्षुरादीनि , विज्ञानधातुस्तु चक्षुरादिस्पर्शायतनवचनानुषङ्गेन पुनरुच्यते । स्पर्शायतनमिति
62.8 (7b–9) को ऽर्थः । स्पर्शस्य चैतसिकस्याश्रय इत्यर्थः ॥ **चैत्ताभावप्रसङ्गाच्चेति** । यदि षड्धातुरयं भिन्नो पुरुष इति यथारुतमेव द्रव्याणि गृह्येरन्नान्यानि तदाश्रितानि द्रव्याणि तेनैतत्प्राप्तं , विज्ञानधातुमात्रग्रहणादत्र चैतसिकानां तदाश्रितानामग्रहणप्रसङ्गः । इष्टत्वाददोष इति चेत् । न । सापक्षालत्वादस्य पक्षस्य । सापक्षालो ह्ययं पक्षः , चित्तविशेषा
62.9 (7b–10) एव चैतसिका इति , स्वसिद्धान्तविरोधात् । तेनाह , **न च युक्तं चित्तमेव चैत्ता इति प्रतिपत्तुम्** । कस्मात् । **संज्ञा च चेतना च चैतसिक एष धर्मः चित्तनिश्रित इति सूत्रवचनात्** । साधनं चात्रोपतिष्ठते । चित्तादर्थान्तरभूते संज्ञावेदने , स्कन्धदेशनायां पृथग्देशितत्वाद् , रूपस्कन्धवदिति । अथवा स्वाश्रयादर्थान्तरभूते संज्ञावेदने , तदाश्रितत्वात् । यत्स्वाश्रयाश्रितं तत्स्वाश्रयादर्थान्तरभूतं , तद्यथा कुड्याश्रितं चित्रम् ॥
62.12 (8a–1) **सरागादिचित्तवचनाच्चेति** । सरागं चित्तं सरागं चित्तमिति यथाभूतं प्रजानाति । विगतरागं चित्तं विगतरागं चित्तमिति यथाभूतं प्रजानाति । सद्वेषं चित्तं सद्वेषं चित्तमिति यथाभूतं प्रजानातीति विस्तरः । अत्र साधनम् । सरागं चित्तमिति चित्तरागयोः परस्परतो ऽर्थान्तरत्वं , सहयोगनिर्दिष्टत्वात् । सपुत्रश्चैत्र इति सहयोगनिर्दिष्टचैत्रपुत्रवदिति ॥
62.15 (8a–8) **संचिता दशेति** परमाणुसंचयस्वभावा दशैवेत्यर्थः । अन्ये तु धातवो ऽस्मादवधारणान्न संचिता इति सिद्धम् ॥ ३५ ॥

तुलयतीति कस्य धातोरेतद्रूपम्। तथा हि तुल उन्मान इत्यस्य धातोस्तो- 63.5 (8a–7)
लयतीति रूपं भवति। नैष दोषः। तुलां करोति तुलयतीति प्रातिपदिकधातोरेतद्रूप-
मिष्यते। कर्मणि च तुल्य इति रूपं भवति॥ बाह्यं धातुचतुष्टयमिति रूपादिकं 63.5 (8a–7)
शब्दवर्ज्यम्। परशुदार्वादिसंज्ञकमिति। परश्वादिसंज्ञकं छिनत्ति दार्वादिसंज्ञकं छि-
द्यते। संभवं प्रत्येवमुच्यते। कदाचित्परश्वादिसंज्ञकं छिद्यते। दार्वादिसंज्ञकमपि छिन-
त्ति॥ संबन्धोत्पादिन इति विस्तरः। संबन्धेनाविभागेनोत्पत्तुं शीलमस्येति संबन्धो- 63.7 (8a–10)
त्पादि संघातस्रोतः। रूपादिसंघातसंतान इत्यर्थः। तस्य विभक्तोत्पादनं विभक्त-
जननं यत्स छेदः। क्षणिकानां हि भावानां विनापि परश्वादिना छेदो भवत्येव। संता-
ननिरोधस्तु परश्वादिनेति परश्वादिकं छिनत्तीत्युच्यते। कारणसामग्रीविशेषवशाद्धि
कार्यविशेषोत्पत्तिर्भवति। तत्र धातुचतुष्टयमेव छिनत्ति छिद्यते चेत्यवधार्यते। तदा-
वधारणाच्चान्ये धातवो नोभयथेति सिद्धम्। अत एव चाह। न कायेन्द्रियादीनि 63.8 (8b–1)
छिद्यन्त इति विस्तरः। तत्र न चक्षुरिन्द्रियादीनीति वक्तव्ये कस्मात्कायेन्द्रियादी-
नीति वचनम्। यस्मात्कायेन्द्रिये परिस्फुटश्छेदो भवति यदि भवेदित्यतः कायेन्द्रिय-
पुरःसराणीन्द्रियाणि कथ्यन्ते। निरवशेषाङ्गच्छेदे सर्वाङ्गप्रत्यङ्गच्छेदे तद्द्वैधीकरणात्। 63.9 (8b–1)
तेषां कायेन्द्रियादीनामद्वैधीकरणात्। कथं पुनर्गम्यते। तदद्वैधीकरणमित्यतः पुनराह।
न हीन्द्रियाणि द्विधा भवन्ति। छिन्नस्याङ्गस्य कायादपगतस्य निरिन्द्रियत्वात्। 63.10 (8b–2)
इदमपि कथं गम्यते। निरिन्द्रियं तदङ्गं यच्छिन्नं कायादपगतमिति। यस्मात्तत्प्रतीत्य
स्प्रष्टव्यादिकं च कायादिविज्ञानानुत्पत्तिः। कथं तर्हि छिन्नेन पुनर्लग्नेन नासिकाग्रेण
कायविज्ञानोत्पत्तिः। नासिकामूलसंबन्धेन पुनः कायेन्द्रियोत्पत्तेरदोषः। कथमिह गृहगो-
धिकादीनां पुच्छानि छिन्नानि स्पन्दन्ते यदि तत्र कायेन्द्रियं नास्ति। वायुधातोरेष
विकारो नैतत्कायेन्द्रियस्य कर्मेत्यवगन्तव्यम्॥ न चापि छिन्दन्ति मणिप्रभावद- 63.12 (8b–3)
च्छत्वात्। यथा मणिप्रभा न छिनत्ति। अच्छत्वात्। तद्वदिन्द्रियाणि॥ दह्यते तुल- 63.14 (8b–4)
यत्येवमिति। एवंशब्देन तदेव बाह्यं धातुचतुष्टयं तथात्वेन प्रदर्श्यते। काष्ठादीनाम-
ग्निकृतो विकारो दाहः। स चेन्द्रियाणां न भवति मणिप्रभावदच्छत्वात्। न हि तानि

काष्ठादिवच्चर्मादिवद्वा विक्रियन्ते। किं तर्हि तत्संबन्धात्प्रवाहच्छेदो भवति। तुलादिभूतं
च तदेव धातुचतुष्टयं तुलयति, नेन्द्रियाणि, तथैवाच्छत्वात्। अमूर्तानां तु धातूनाममू-
63.17 (8b-6) र्तत्वादेव छेदाद्यसंभव इति तेषां छेदादि न चिन्त्यते॥ न शब्द उच्छेदित्वादिति।
किम्। छिनत्ति छिद्यते च, दह्यते तुलयति वा, अप्रवाहवर्तित्वात्॥ विवादो
दग्धृतुल्ययोरित्युत्तरत्रापीदमनुवर्तते, न शब्द उच्छेदित्वादिति। तदेव धातुचतुष्टयं
दाहकं तुल्यं चेति। अग्नितारादि दाहकं, समस्तस्यात्र धातुचतुष्टयस्य भस्मादिवि-
कारहेतुत्वात्। लवणादि तुल्यम्। तत्रापि समस्तस्य तुलावनतिहेतुत्वात्। इत्येकेषा-
64.2 (8b-7) मभिप्रायः। तेजोधातुरेव दग्धा गुरुत्वमेव च तुल्यमिति। तेजोधातुरेवाग्निज्वाला-
दिगत उद्भूतवृत्तिर्दहति, पृथिवीधात्वादीनामुद्भूतस्ववृत्तित्वेऽप्यदाहकत्वदर्शनात्। गुरु-
त्वमेव चोपादायरूपमुद्भूतवृत्ति तुल्यते। आतपादिषु लघुद्रव्येषु रूपादीनामुद्भूतवृत्तित्वे
ऽप्यतुल्यत्वदर्शनात्॥ ३६॥

64.17 (8b-10) पञ्चाध्यात्ममिति पञ्चग्रहणं मनोनिवृत्त्यर्थम्। अध्यात्मग्रहणं रूपादिनिवृत्त्य-
र्थम्। विपाकजौपचयिका एव पञ्चाध्यात्मिका न नैष्यन्दिका इत्यवधारणम्।
65.2 (9a-2) कस्मात्। तद्व्यतिरिक्तनिष्यन्दाभावात्। विपाकजौपचयिकाश्च यद्यपि नैष्यन्दिका
भवन्ति, निष्यन्दो हेतुसदृश इति कृत्वा, ते तु विपाकजौपचयिकत्वेन संगृहीतत्वान्न
नैष्यन्दिका इति गृह्यन्ते। ये तु स्वहेतुसदृशा न च विपाकजा न चौपचयिकास्त इह
नैष्यन्दिका अभिप्रेताः। न चैवंविधाश्चक्षुरादयो भवन्ति। किं तर्हि विपाकजाश्चौपच-
यिकाश्च भवन्तीत्यत एवमुच्यते, तद्व्यतिरिक्तनिष्यन्दाभावादिति। कथं पुनर्ज्ञायते,
नैष्यन्दिकास्ते न सन्तीति। मृतस्याननुवृत्तेः। न हि रूपादिवन्मृतस्य चक्षुर्धात्वादयो
65.3 (9a-3) ऽनुवर्तन्ते॥ विपाकहेतोर्जाता इति। विपाकस्य फलस्य हेतुर्विपाकहेतुः, विपाक-
हेतोर्जाता विपाकजाः। मध्यपदलोपाद् धेतुशब्दलोपात्। गोरथवद्, यथा गो-
भिर्युक्तो रथो गोरथ इति। फलकालप्राप्तं वा कर्मेति विपाकफलोत्पत्त्यनन्तरक्षणा-
वस्थमित्यर्थः। विपच्यत इति विपाकः। कर्मकर्तरि घञ्। विपाकाज्जाता विपा-
कजाः। फलं तु विपक्तिरेवेति विपाक इति भावे घञ्। भवति च हेतौ

फलोपचार इति विस्तरः। अविपाकस्वभावो ऽपि कर्मलक्षणो हेतुर्विपाक इत्युच्यते, 65.9 (9a-7)
तदुत्पादकत्वात्। यथा फले हेतूपचार इति विस्तरः। षडिमानि स्पर्शायतनानि
चक्षुरादीनि पौराणं कर्म। पुराणे जन्मनि भवं, पुराणमेव वा पौराणं कर्म। तानि
स्पर्शायतनान्यपौराणकर्मस्वभावान्यपि पौराणं कर्मेत्युच्यन्ते, तज्जातत्वात्। एवमिहापि
विपर्ययोपचारो द्रष्टव्यः॥ आहारसंस्कारस्वप्नसमाधिविशेषैरुपचिता औपचयिका 65.11 (9a-8)
इति। विशेषशब्दः प्रत्येकमभिसंबध्यते। तत्राहारस्वप्नौ लोके प्रतीतौ। संस्कारो ऽभ्य-
ङ्गस्नानानुवासनादिस्वभावः। समाधिश्चित्तैकाग्रतालक्षणः। समीपे चय उपचयः। उपचये
भवा औपचयिकाः, नैमिकवत्। उपचया एव वा औपचयिकाः, वैनयिकवत्, स्वार्थे
तद्धितविधानात्। ब्रह्मचर्येण चेत्येक इति। ब्रह्मचारिणामुपशान्तेन्द्रियाणां शरीरोप- 65.13 (9a-9)
चयदर्शनात्। अनुपघातमात्रं तु तेन स्यादित्यब्रह्मचर्येण शरीरापचयः, ब्रह्मचर्येण
तु शरीरापचयो न भवति। तस्मादाह, अनुपघातमात्रं तु तेन ब्रह्मचर्येण स्याद्, नोप-
चयः। उपचयस्त्वाहारादिभिरेव। कस्मात्तर्हि प्रव्रजितानां ब्रह्मचारिणां केषांचिच्छरी-
रापचयो भवति। कामपरिदाहादियोगादसौ भवेत्॥ प्रतिप्राकार इवावारेणेति, उपच- 65.16 (9a-10)
यसंतानो विपाकसंतानस्य परिवार्यावस्थानेनारक्षा॥ शब्द औपचयिक इति, अनुप- 65.16 (9a-10)
चितकायस्य शब्दसौष्ठवादर्शनात्। इच्छातः प्रवृत्तेरिति। शब्दो मे स्यादितीच्छया शब्दः
प्रवर्तते, अनिच्छया न प्रवर्तते। विपाकजश्च धर्मो ऽनिच्छतो ऽपि प्रवर्तते। तस्मान्न
विपाकजः शब्दः। साधनं चात्रोच्यते। न विपाकजः शब्दः, इच्छातः प्रवृत्तेः, योनिशो-
मनसिकारचैतसिकवत्। यत्तु विपाकजं न तस्येच्छया प्रवृत्तिः। तद्यथा चक्षुरिन्द्रियस्ये-
ति॥ यत्तर्हीति विस्तरः। अनेन स्वसिद्धान्तविरुद्धतां प्रतिज्ञाया उद्भावयति। ततो- 65.18 (9b-2)
ऽसौ परंपरेत्येक इति विस्तरः। भूतानि पारुष्याविरतेः कर्मपथस्य कण्ठ विपाकस्व- 66.2 (9b-3)
भावानि निर्वर्तन्ते, तेभ्यः शब्दः। द्वितीये ऽपि पक्षे, कर्मभ्यो विपाकजानि भूता- 66.3 (9b-4)
नि, तेभ्य औपचयिकानि, आहारोपचयतः समाध्युपचयतो वा भूतान्तराणि,
तेभ्यो नैष्यन्दिकानि, पूर्वभूतव्यतिरिक्तान्यागन्तुकानि भूतानि, तेभ्यः शब्द
इति। अतो न विपाकजः शब्द इति। परंपराभिनिर्वर्तनं त्वभिसंधाय पारुष्याविरतेर्व्र-

खस्वरता निर्वर्तत इत्युक्तम्। अनेन स्वसिद्धान्तविरुद्धता तस्याः प्रतिज्ञायाः परि-
66.8 (9b–7) ह्रियते। यदि शब्दवद्युक्तिविरोधः स्यादिति। शब्द इच्छातः प्रवर्तत इति विपा-
कयुक्तिविरोधान्न विपाकज उक्तः। तद्यदि तद्वच्छारीरिकापि वेदना, इच्छातः
प्रवर्तते, न विपाकजा स्यात्। न त्विच्छातः सा प्रवर्तते। किं तर्हि। अनिच्छयापि
सा प्रवर्तते चक्षुरादिवत्। तस्माद्विपाकजेति युज्यत इत्यभिप्रायः। कीदृशी पुनः सा। या
66.12 (9b–8) सुखदुःखप्रत्ययोपसंहारमन्तरेणापि प्रवर्तते॥ नैष्यन्दिकाः सभागसर्वत्रगहेतुजनि-
66.13 (9b–9) ता इति। सभागसर्वत्रगहेतुभिरेव जनिता न विपाकहेतुनेत्यवधारणम्। विपाकजा
विपाकहेतुजनिता इति। विपाकहेतुना जनिता एव, न तु विपाकहेतुनैव जनिता
इत्यवधारणम्। सभागहेतुनापि जनिता विपाकजा भवन्ति। तत्र चाष्टावप्रतिघा नैष्य-
66.14 (9b–10) न्दिका विपाकजा एवेत्यवधार्यते। न हि त औपचयिकाः संचयाभावात्। अपर-
माणुसंचयस्वभावत्वादित्यर्थः॥ ३७॥

66.16 (10a–1) त्रिधान्य इति। त्रिधान्य एवेत्यवधार्यते। तत्र विपाकजा इन्द्रियाविनिर्भागिण
एव, विपाको ऽव्याकृतो धर्मः, सत्त्वाख्य इति वचनात्। नैष्यन्दिकौपचयिकास्त्वि-
न्द्रियविनिर्भागिणो ऽपि। कथं पुनर्गम्यते, इन्द्रियविनिर्भागिणो ऽपि नैष्यन्दिकाः
सन्तीति। मृतस्यापि तदनुवृत्तिदर्शनात्। न त्वसत्त्वसंख्याता विपाकजा इष्यन्ते॥
66.19 (10a–3) द्रव्यवानेक इति। एक एव द्रव्यवानित्यवधारणम्। सारत्वाद्द्रव्यमित्यविनाशात्॥
67.5 (10a–5) क्षणिकमनैष्यन्दिका भवन्तीति क्षणिकमसभागहेतुनिर्वर्तिताः। पूर्वक्षणानामत्र-
भावाभावात्क्षणिकाः, न तु क्षणान्तरविनाशिन इत्ययमर्थो ऽभिप्रेतः। अन्यथा हि पा-
श्चिमा एव धातवः क्षणिका इत्यवधारणात्तदितरेषां धातूनामक्षणिकत्वप्रसङ्गः॥ कथं
पुनर्दुःखधर्मज्ञानक्षान्तिकलापे मनोधातुर्मनोविज्ञानधातुश्च युगपद्भवतः। न हि विज्ञानद्व-
यसमवधानमिष्यते। नोच्यते युगपत्तौ भवत इति। किं तर्हि, एकमत्र विज्ञानं धातुद्वयत्वेन
67.7 (10a–6) व्यवस्थाप्यते। नामद्वयेन कथ्यत इत्यर्थः। तेन व्याचष्टे, दुःखे धर्मज्ञानक्षान्तिसंप्रयुक्तं
67.9 (10a–6) चित्तं मनोधातुर्मनोविज्ञानधातुश्चेति। शेषास्तत्सहभुवो धर्मधातुरिति। तत्र
क्षान्तिकलापे, चित्तादन्ये धर्माः शेषाः, तत्सहभुवस्तया क्षान्त्या सहभुवः। तद्यथा,

अनास्रवसंवरो रूपं ' वेदनासंज्ञाचेतनादयः संप्रयुक्ताः ' तेषां च प्राप्तिजात्यादयो धर्मधा-
तुरिति ॥ समन्वागमं प्रतिलभत इति प्राप्तिमलब्धपूर्वां लभत इत्यर्थः । चक्षुर्वि- 67.11 (10a–7)
ज्ञानधातुनापि स इति किम् । समन्वागमं प्रतिलभत इत्यधिकृतम् । पृथग्लाभ 67.14(10a–10)
इत्यनेन प्रथमद्वितीये कोट्यौ दर्शिते । सहापि चेत्यनेन तृतीया कोटिर्दर्शिता । चतुर्थी
तूक्तनिर्मुक्तेति सुगमत्वान्न दर्शिता । चशब्देन वा साप्युक्ता ' अपृथगसह चेति ॥ काम- 67.16 (10b–2)
धातौ क्रमेण चक्षुरिन्द्रियं प्रतिलभमान इति । कामधातौ स्थितः पुद्गलः क्रमेण '
कललादिक्रमेण मृत्युक्रमेण वा ' चक्षुरिन्द्रियं लभते । किंप्रतिसंयुक्तं ' किं कामधाता-
वेव । नेत्युच्यते । अविशेषेण । कामप्रतिसंयुक्तं वा रूपप्रतिसंयुक्तं वा प्रतिलभमानः ।
कललाद्यवस्थायां तथा क्रमेण मरणस्याचक्षुष्मन्मरणस्य च काले चक्षुर्धातुना ऽसमन्वा-
गतः ' कललाद्यवस्थायां तथा मरणावस्थायां वा तदभावात् ' षडायतनोत्पत्त्यवस्थायां
भवस्यान्तराले वा तेनेदानीं समन्वागमं प्रतिलभते । न तु चक्षुर्विज्ञानधातुना ऽसमन्वा-
गतः समन्वागमं प्रतिलभते ' यस्मादसौ कुशलक्लिष्टेन तेनातीतानागतेन पूर्वमन्तराभव-
प्रतिसंधिकाले समन्वागत एव । विप्रकृतावस्था ह्येषाधिक्रियते ' न प्रतिलब्धवत्प्र-
तिलप्स्यमानावस्था ॥ चक्षुर्विज्ञानधातुनेति विस्तरः । द्वितीयादिध्यानोपपन्नः ' तत्र 67.18 (10b–2)
तस्य चक्षुर्विज्ञानधातोरभावात् तेन पूर्वमसमन्वागत इदानीं चक्षुर्विज्ञानं प्रथमध्या-
नभूमिकमनिवृताव्याकृतस्वभावं संमुखीकुर्वाणस्तेन चक्षुर्विज्ञानधातुना समन्वागमं
प्रतिलभते । न तु चक्षुर्धातुना ऽसमन्वागतः समन्वागमं प्रतिलभते ' प्रतिलब्धवत्सम-
न्वागतत्वात् । ततश्च्युतश्चाधस्तादुपपद्यमान इति द्वितीयादिध्यानप्रच्युतो ऽधस्ता- 68.1 (10b–4)
त्प्रथमे ध्याने कामधातौ वोपपद्यमानश्चक्षुर्विज्ञानधातुना ऽसमन्वागतः समन्वागमं
प्रतिलभते ऽन्तराभवप्रतिसंधाने कुशलक्लिष्टेन अतीतानागतेन । न तु चक्षुर्धातुना ऽसम-
न्वागतः समन्वागमं प्रतिलभते ' प्रतिलब्धवत्समन्वागतत्वात् ॥ स्यादुभयेनेति वि- 68.2 (10b–5)
स्तरः । आरूप्यधातुच्युत उभाभ्यां चक्षुर्धातुचक्षुर्विज्ञानधातुभ्यां पूर्वमसमन्वागत अन्त-
राभवप्रतिसंध्यवस्थायामेव चक्षुर्धातुनोत्पादाभिमुखेन चक्षुर्विज्ञानधातुना च कुशलक्लि-
ष्टेनातीतानागतेन समन्वागमं प्रतिलभते । अविकलेन्द्रिया ह्यन्तराभविकाः ॥ नोभयेन ' 68.4 (10b–6)

एतानाकारान्स्थापयित्वेति कोटित्रयोक्तान्धर्मप्रकारान् त्यक्त्वेत्यर्थः। आरूप्यधातुच्युतस्तत्रैवोत्पद्यमानो नोभाभ्यामसमन्वागतः समन्वागमं प्रतिलभते। असमन्वागतत्वं तत्रास्ति। न तु समन्वागमप्रतिलम्भः। द्वितीयादिध्यानोपपन्नश्च चक्षुर्विज्ञानमसंमुखीकुर्वाणो नोभाभ्यामसमन्वागतः समन्वागमं प्रतिलभते। कथम्। चक्षुर्धातुना यद्यपि समन्वागमं प्रतिलभते न तु चक्षुर्धातुनासावसमन्वागतः। चक्षुर्विज्ञानधातुना यद्यप्यसावसमन्वागतो न तु समन्वागमं प्रतिलभते। तमसंमुखीकुर्वाणत्वात्। चक्षुष्मान्कामधातुस्थः सकृन्मरणाद् अन्तराभवप्रतिसंधौ नोभाभ्यामसमन्वागतः समन्वागमं प्रतिलभते। ताभ्यां समन्वागतत्वात्॥

68.5 (10b–6) यश्च चक्षुर्धातुना समन्वागतश्चक्षुर्विज्ञानधातुनापि स इति। पृथग्लाभः सहापि चेत्यनेनैव सूत्रेणेदमपि चतुःकोटिकं वर्तयति। लाभो हि प्रतिलम्भः प्राप्तिमात्रे ऽपि विवक्षया कदाचिद्भवति। प्रथमे चतुःकोटिके प्रतिलम्भो ऽधिकृतो द्वितीये तु प्राप्तिमा-
68.6 (10b–7) त्रम्। प्रथमा कोटिरिति विस्तरः। द्वितीयादिध्यानोपपन्नो ऽवश्यं चक्षुर्धातुना समन्वागतः। इन्द्रियैरविकलत्वात्। चक्षुर्विज्ञानधातुनात्रासमन्वागतः। तत्राभावात्।
68.7 (10b–8) प्रथमध्यानभूमिकस्य चक्षुर्विज्ञानस्यासंमुखीक्रियमाणत्वात्॥ कामधातावलब्धविहीनचक्षुरिति। अलब्धं विहीनं वा चक्षुरस्यालब्धविहीनचक्षुः। अलब्धचक्षुः कललाद्यवस्थः। विहीनचक्षुर्विनष्टचक्षुः। स कामधातौ चक्षुर्विज्ञानधातुनान्तराभवप्रतिसंधौ
68.9 (10b–9) प्रतिलब्धेन कुशलक्लिष्टेन समन्वागतः। न चक्षुर्धातुना। तस्याभावात्॥ लब्धाविहीनचक्षुरिति। लब्धमविहीनं चक्षुरस्य लब्धाविहीनचक्षुः। स कामधातौ चक्षुर्धातुना चक्षुर्विज्ञानधातुना च। तथा पूर्वं प्रतिलब्धेनेदानीं त्वनेन चाव्याकृतेन। समन्वागतः।
68.9 (10b–9) प्रथमध्यानोपपन्नश्च तेनोभयेन समन्वागतः। स्वभूमिकस्य तस्यावश्यमस्तित्वात्।
68.10 (10b–9) परभूमिकस्य चक्षुषः संभवात्। द्वितीयादिध्यानोपपन्नश्च पश्यन्। प्रथमध्यानभूमिकं चक्षुर्विज्ञानं संमुखीकुर्वाण इत्यर्थः। स चाप्यवश्यमनेनोभयेन समन्वागतः॥ चतुर्थ्येता-
68.11 (11a–1) नाकारान्स्थापयित्वेत्यारूप्योत्पन्नः॥ यथायोगमभ्यूहितव्याविति। यश्चक्षुर्धातुना ऽसमन्वागतः समन्वागमं प्रतिलभते रूपधातुनापि सः। यो वा रूपधातुना चक्षुर्धातुनापि सः। चक्षुर्धातुरूपधात्वोः स्यात्पृथग्लाभः सहापि च। पृथक्तावत्। स्याच्चक्षुर्धातुना सम-

न्वागतो न रूपधातुना। कामधातौ क्रमेण चक्षुरिन्द्रियं प्रतिलभमानः। स्याद्रूपधातुना न चक्षुर्धातुनेति। इयं कोटिर्नास्ति। सर्वापि स्यात्। उभयेनासमन्वागतः समन्वागमं प्रतिलभते। आरूप्यधातोश्च्युतो रूपधातौ कामधातौ चोपपद्यमानः। नोभयेन। एतानाकारान्स्थापयित्वा॥ यश्चक्षुर्धातुना समन्वागतो रूपधातुनापि स इति। पूर्वपादकः। यस्तावच्चक्षुर्धातुना समन्वागतो रूपधातुनापि सः। स्याद्रूपधातुना न चक्षुर्धातुना। कललाद्यवस्थास्वलब्धचक्षुर्लब्धविहीनचक्षुश्च॥ यश्चक्षुर्विज्ञानधातुना ऽसमन्वागतः समन्वागमं प्रतिलभते रूपधातुनापि सः। यो वा रूपधातुना ऽसमन्वागतः समन्वागमं प्रतिलभते चक्षुर्विज्ञानधातुनापि सः। तथैव च तयोः स्यात्पृथग्लाभः सर्वापि च। पृथग्लाभात्। स्याच्चक्षुर्विज्ञानधातुना न रूपधातुना। द्वितीयादिध्यानोपपन्नश्चक्षुर्विज्ञानं संमुखीकुर्वाणः। स्याद्रूपधातुना न चक्षुर्विज्ञानधातुना। आरूप्यधातोश्च्युतो द्वितीयादिषु ध्यानेषूपपद्यमानः। सर्वापि स्यात्। उभयेनासमन्वागतः समन्वागमं प्रतिलभते। आरूप्यधातोश्च्युतः कामधातौ ब्रह्मलोके चोत्पद्यमानः। नोभयेन। एतानाकारान्स्थापयित्वा॥ यश्चक्षुर्विज्ञानधातुना समन्वागतो रूपधातुनापि सः। यो वा रूपधातुना चक्षुर्विज्ञानधातुनापि सः। पूर्वपादकः। यस्तावच्चक्षुर्विज्ञानधातुना समन्वागतो रूपधातुनापि सः। स्याद्रूपधातुना न चक्षुर्विज्ञानधातुनापि। द्वितीयादिध्यानोपपन्नश्चक्षुर्विज्ञानमसंमुखीकुर्वाणः॥ यथा चेयं चक्षुर्विज्ञानरूपधातूनां प्रतिलम्भसमन्वागमचिन्ता तथा श्रोत्रविज्ञानशब्दधात्वादीनामपि प्रतिलम्भसमन्वागमचिन्ता कर्तव्या। श्रोत्रविज्ञानशब्दधात्वोः स्यात्पृथग्लाभः सर्वापि चेत्यादि॥ ३८॥

द्वादशाध्यात्मिका इति। उभयावधारणम्। अवधारणादेव चान्ये रूपादयो 69.3 (11a-4)
बाह्या इति सिद्धम्। आत्मनि अधि अध्यात्मम्। अधि आत्मानमिति वा अध्यात्मम्।
अध्यात्ममेव आध्यात्मिकाः। अध्यात्मं वा भवा आध्यात्मिकाः॥ **अहंकारसंनिश्रयत्वा-** 69.7 (11a-6)
च्चित्तमात्मेत्युपचर्यत इति। अहंकारसंनिश्रय आत्मेत्यात्मवादिनः संकल्पयन्ति। चित्तं चाहंकारसंनिश्रय इत्यात्माप्युपचर्यते। कथमित्याह।

आत्मना हि सुदान्तेन स्वर्गं प्राप्नोति पण्डितः। 69.9 (11a-8)

इत्युक्तं गाथायाम्। कथं पुनर्गम्यते। चित्तमात्मशब्देनोच्यत इति। तत आह। चित्तस्य चान्यत्र दमनमुक्तं भगवतेति। अन्यत्र गाथायामुक्तम्।

69.12(11a–10) चित्तस्य दमनं साधु चित्तं दान्तं सुखावहम् ।

इति । तेनायमर्थः । आत्मनि चित्तीकार्ये ' आत्मानं वा चित्तमधिकृत्य ये धर्माः प्रत्यासन्नभावादाश्रयभावेन वर्तन्ते त आध्यात्मिकाः । ये तु विषयभावेन वर्तन्ते ते बाह्या इति । कः पुनः प्रत्यासन्नभावः । येन विज्ञानं तद्विकारमनुविधत्ते । चक्षुरादिष्वेव हि विज्ञानं लक्ष्यते न रूपादिष्विति । तथा हि चित्तमिन्द्रियसंबद्धे शरी-
69.17 (11b-2) रदेशे परिच्छिद्यते न विषयदेश इति ॥ एवं तर्हि षड् विज्ञानधातव इति विस्तरः । इह पञ्च तावद्विज्ञानधातवो वर्तमाना एव गृह्यन्ते ' इन्द्रियविषयसमानकालत्वात् । वर्तमानविषया हि पञ्च विज्ञानकायाः । मनोविज्ञानधातुरपि वर्तमान एवेह व्यवस्थाप्यते । यस्मान्मनोधातुरप्याश्रयो ऽनन्तरातीतो व्यवस्थाप्यते ' कालभेदादेव हि मनोधातुमनो-
69.18 (11b-2) विज्ञानधात्वोः पृथग्व्यवस्थानं ' तस्मात्त आध्यात्मिका न प्राप्नुवन्ति । न ह्येते मनोधातुत्वमप्राप्ता अतीतत्वमप्राप्ताः चित्तस्याश्रयीभवन्ति । यदा भवन्ति तदा त एव ते भवन्तीति लक्षणं नातिवर्तन्त इति । किमनेन वाक्येन साधितम् । इदमनेन साधितं ' वर्तमानानामप्येषामाश्रयभावो भविष्यतीति भविष्यदाश्रयभावेना-
70.4 (11b-4) ध्यात्मिकत्वं भवतीति ॥ यदि वानागतप्रत्युत्पन्नस्येति विस्तरः । अतीते ऽध्वनि
70.7 (11b-6) यन्मनोधातुलक्षणं तदनागतप्रत्युत्पन्नयोरप्यध्वनोरस्त्येवेत्यभिप्रायः । न हि लक्षणा-
70.9 (11b-10) स्याध्वसु व्यभिचारो ऽस्ति । न हि स्वभावपरित्यागो ऽस्तीत्यर्थः ॥ धर्मसंज्ञकः सभाग इति । धर्मसंज्ञकः सभाग एवेत्यवधार्यते । यो हि विषयो यस्य विज्ञानस्य नियत इति ' तद्यथा चक्षुर्विज्ञानस्य रूपं नियतो विषयो यावन्मनोविज्ञानस्य धर्माः ' यदि तत्र तच्चक्षुर्विज्ञानमुत्पन्नमुत्पत्तिधर्मि वा ' यावद्यदि तत्र मनोविज्ञानमु-
70.16 (12a-3) त्पन्नमुत्पत्तिधर्मि वा ' स विषयः सभाग इत्युच्यते ॥ तस्य च स्वभावसहभूनिर्मुक्ता इति । स्वभावेन सहभूभिश्च निर्मुक्ताः स्वभावसहभूनिर्मुक्ताः । सर्वधर्मास्तस्य विज्ञानस्यालम्बनं ' न स्वभावः ' स्वात्मनि वृत्तिविरोधात् । न हि तदेवाङ्गुल्यग्रं तेनैवाङ्गुल्यग्रेण स्पृश्यते ' सैवासिधारा तयैवासिधारया छिद्यते । न सहभुवः संप्रयुक्ता
70.17 (12a-4) विप्रयुक्ता वा ' अतिसंनिकृष्टत्वात् । न ह्यक्षिस्थमञ्जनं तेन गृह्यते ॥ स पुनश्चित्तक्ष-

णो ऽन्यस्य चित्तक्षणस्यालम्बनमिति । ये पूर्वस्मिन्क्षणे स्वभावसहभुवो धर्मा ना-
लम्बिता अभूवंस्ते ऽप्यालम्बिता इति द्वयोः क्षणयोः सर्वधर्मा आलम्बनं भवन्ति ।
तस्माद्धर्मधातुर्नित्यं सभागः । धर्मधातुर्हि नियतो मनस एव ॥ **तत्सभागाश्च शेषाः ।** 70.20 (12a–5)
चशब्देन सभागाश्चेति शेषा एव सभागतत्सभागा इत्यवधार्यते । ननु च धर्मधातुरेव सभाग
एवेत्यवधारणे शेषा न सभागा इति सभागतत्सभागाः सेत्स्यन्ति । न सेत्स्यन्ति । यद्यपि
न सभागा एव हि भवेयुः, तत्सभागा एवेति तु संभवेयुः । तन्निवृत्त्यर्थमिदमारभ्यते,
सभागतत्सभागा एव शेषाः, न तु सभागा एव नापि तत्सभागा एवेति ॥ **यो न स्व-** 71.2 (12a–7)
कर्मकृत्, स तत्सभाग इति संबन्धनीयं, तत्सभागाश्चेत्यनन्तरोक्तत्वात् । **उक्तं भवति** 71.3 (12a–7)
यः स्वकर्मकृत्सभाग इति । अस्वकर्मकृदेव तत्सभागस्तत्सभाग एव चास्वकर्मकृदि-
त्यवधारणे ऽर्थापत्त्या स्वकर्मकृत्सभाग इति ॥ **रूपाण्यपश्यदिति ।** अद्राक्षीदिति 71.4 (12a–8)
वक्तव्यम् । एवं ह्यद्यतनातीतं ह्यस्तनातीतं च परिगृहीतं भवति । अन्यथा ह्यव्यापि
लक्षणं स्यात् । अथवैवमेव पाठः, उदाहरणमात्रं तद्द्रष्टव्यम् । अद्यतनातीतमपि वक्तव्यम् ।
एवं यावन्मनः स्वेन विषयकारित्रेण वक्तव्यमिति स्वेन विषयपुरुषकारेण वक्त- 71.6 (12a–9)
व्यम् । कथमिति । येन श्रोत्रेण शब्दानशृणोच् शृणोति श्रोष्यति वा तदुच्यते सभागं
श्रोत्रमिति सर्वत्र योजनीयम् ॥ **विज्ञानसंप्रयुक्तमसंप्रयुक्तं चेति** विज्ञानसंबद्धमसंबद्धं 71.11 (12b–2)
चेत्यर्थः ॥ **यदेकस्य चक्षुः सभागं तत्सर्वेषाम् ।** किम् । सभागमिति वर्तते । **एवं तत्स-** 71.19 (12b–6)
भागमपीति । यदेकस्य चक्षुस्तत्सभागं तत्सर्वेषां तत्सभागमित्यर्थः ॥ **प्राप्तग्रहणादिति ।** 72.14 (13a–3)
गन्धादयो ये देवदत्तेन घ्राणादीन्द्रियप्राप्ता गृह्यन्ते न ते यज्ञदत्तेन गृह्यन्ते, स्वघ्राणादिकप्र-
विष्टत्वात् । इत्यसाधारणत्वादेषां चक्षुरादिवदतिदेशो न्याय्यः । य एकस्य गन्धः सभागः 72.15 (13a–3)
स सर्वेषां, एवं तत्सभागो ऽपीति वक्तव्यम् । न तु वक्तव्यं, यथा रूपमेवं गन्धादय इति ।
अस्ति ह्येष संभवः, य एव गन्धादय एकस्य घ्राणादिविज्ञानमुत्पादयेयुस्त 72.18 (13a–4)
एवान्येषामपीति । यदि ते देवदत्तघ्राणादीन्द्रियप्राप्ता भवेयुर्देवदत्तस्य विज्ञानमुत्पा-
दयेयुः, अथ यज्ञदत्तघ्राणादीन्द्रियप्राप्ता यज्ञदत्तस्य विज्ञानमुत्पादयेयुरित्यर्थः । अथवा त
एवान्येषामपीति तत्रान्तर्गतसूक्ष्मक्रिमिप्रभृतीनामपि विज्ञानमुत्पादयेयुः, न तस्यैव देवद-

73.4 (13a–7) तस्य यस्य घ्राणादीन्द्रियप्राप्तास्ते गन्धादय इति ॥ इन्द्रियविषयविज्ञानानामन्यो-
न्यभजनमिति । आश्रयविषयाश्रयिभावेनान्योन्याभिमुख्येन प्रवृत्तिः । तथा हीन्द्रिय-
धातवो विज्ञानधातूनामाश्रयभावेन यथायोगं भजन्ते । सेवन्त इत्यर्थः । विषयधातूनां च
विषयिभावेन । तथा हि विषयधातवः स्वेन्द्रियधातूनां विषयभावेन भजन्ते । विज्ञान-
धातूनां तु विषयभावेन आलम्बनभावेन वा भजन्ते । तथा विज्ञानधातवः स्वेन्द्रियधातू-
नामाश्रयिभावेन भजन्ते । विषयधातूनां च विषयिभावेन आलम्बकभावेन वा भजन्ते ।
73.5 (13a–8) इत्यन्योन्यभजनं भागः । भावे घञ् ॥ कारित्रभजनं वा भागः । कारित्रं चक्षुरादीनां
दर्शनादि । विज्ञानधातूनां विज्ञातृत्वम् । विषयधातूनां तद्विषयालम्बनभावः । तस्य का-
रित्रस्य भजनं कारित्रभजनम् । स एषामस्तीत्यर्थः । प्रदर्शनमात्रमेतत् । विग्रहस्त्वेवं
कर्तव्यः । सह भागेन वर्तन्त सभागा इति । समानो वा भाग एषामिमे सभागाः । समा-
73.2 (13a–8) नार्थस्य सहशब्दस्य सभाव आदिष्टः ॥ स्पर्शसमानकार्यत्वाद्वा । किम् । सभागा इति
प्रकृतम् । अत्र कर्मणि घञ् । भज्यत इति भागः । विग्रहस्तु पूर्ववत् । स्पर्शश्चैतसिक
एषामिन्द्रियविषयविज्ञानानां समानं कार्यम् । चक्षुः प्रतीत्य रूपाणि च उत्पद्यते चक्षु-
73.7 (13a–9) र्विज्ञानम् । त्रयाणां संनिपातः स्पर्श इत्यादिवचनात् । ये पुनरसभागा इति विस्तरः ।
ये पुनरन्ये चक्षुरादय इत्यसभागास्तेषां सभागानामुक्तलक्षणानां सभागाः सदृशास्ते तत्स-
भागाः । तेषां तैर्वा सभागास्ते तत्सभागाः । तुल्यार्थो ह्यत्र सभागशब्दो गृह्यते ॥ ३९ ॥
73.10 (13b–2) दर्शनहेया इति । दर्शनं प्रथमतः सत्यदर्शनं । अनास्रवपञ्चदशचित्तक्षणसंगृही-
73.17 (13b–4) तम् । भावना तदेव पुनः पुनर्दर्शनम् । लौकिकं वा समाहितं ज्ञानं भावना ॥ दश भाव-
नाहेयाः । पञ्च चेति । रूपिणो धातवो दश पञ्च च तद्विज्ञानधातव इति । कथं
73.18 (13b–6) पुनरेतद्गम्यते । एत एव त इति । अन्त्यास्त्रयस्त्रिधेति वचनात् । अन्त्यत्रयादन्ये पञ्चदश
धातव एव उच्यन्त इति । ते भावनाहेया एवेत्यवधार्यन्ते । त्रिप्रकारा इति । दर्शनहे-
74.2 (13b–6) या भावनाहेया अहेयाश्चेत्यर्थः । एत एव त्रिधा । अष्टाशीत्यनुशयास्तत्सहभुव
इति धातुप्रकाराकारभिन्नाः सत्कायदृष्ट्यादयो ऽनुशयाः । तत्सहभुवो विज्ञानवेदनादयः
74.3 (13b–7) संप्रयुक्ताः । असंप्रयुक्तानि च तल्लक्षणानुलक्षणानि । तत्प्राप्तयश्च सानुचरा इति ।

तच्छब्देनानुशयादयः संबध्यन्ते, तेषामनुशयानां तत्सहभुवां च प्राप्तयः । तत्प्राप्तयो
यद्यप्यनुशयसहभुवो भवन्ति न तु सर्वाः । काश्चिद्धि प्राप्तयो ऽनुशयादिसहभुवो भवन्ति,
याः सहजाः । काश्चित्तु पूर्वं पश्चाच्च तेभ्यो भवन्ति । अतः पृथक्प्राप्तिग्रहणम् । सानुचरा
इति ग्रहणेनानुप्राप्तयस्तल्लक्षणानि च संगृह्यन्ते । शेषाः सास्रवा भावनाहेया 74.5 (13b–7)
इति । एते त्रयो ऽन्त्या धातवो ये शेषा दर्शनहेयेभ्यो ऽन्ये सास्रवास्ते भावनाहेयाः । के
पुनस्ते । दशानुशयास्तत्सहभुवस्तत्प्राप्तयश्च सानुचराः कुशलसास्रवाः, अनिवृताव्या-
कृताश्च संस्काराः, अविज्ञप्तिरूपं च सास्रवं सानुचरम् । अनास्रवा अहेया इति, 74.6 (13b–7)
मार्गसत्यासंस्कृतस्वभावाः । ननु चान्यदपीति विस्तरः । पृथग्जनत्वमनिवृताव्याकृ- 74.7-9 (13b–8)
तसंस्कारस्वभावत्वाद्भावनाहेयमध्यगतम् । अपायसंवर्तनीयं च कायवाक्कर्म रूपस्व-
भावत्वाद् भावनाहेयमुक्तमिति । अतश्चोदयन्ति वात्सीपुत्रीयाः, आर्यमार्गविरोधिवादि- 74.8 (13b–9)
ति । पृथग्जनत्वमार्यमार्गोत्पादे न भवति । नियते चापायिके कर्मणि सत्यार्यमार्गो नोत्पद्यते ।
आर्यमार्गोत्पादे च सत्यापायिकं कर्म नोत्पद्यते । तस्मात्सत्कायदृष्ट्यादिवत्तदुभयं दर्श-
नहेयमिति वर्णयन्ति । तत्प्रतिषेधार्थमुक्तमप्येतद् अभिसंक्षेपेण सुखप्रतिपत्त्यर्थं पुन- 74.10 (13b–10)
रुच्यते,

न दृष्टिहेयमक्लिष्टं न रूपं नाप्यषष्ठजम् ।

दृष्टिर्दर्शनम् । अक्लिष्टमनिवृताव्याकृतं कुशलसास्रवं च न दर्शनहेयम् । रूपं तु
क्लिष्टमपि न दर्शनहेयम् । अषष्ठजं पञ्चेन्द्रियजं पञ्चविज्ञानं, तद्रूपं क्लिष्टमपि सन्न
दर्शनहेयम् । अतो ऽन्यत्तु दर्शनहेयं संभवति यथोक्तम् । अक्लिष्टाव्याकृतं च पृथग्ज- 74.13 (14a–1)
नत्वं, समुच्छिन्नकुशलमूलवीतरागाणामपि तत्समन्वागमादिति । समुच्छि-
न्नकुशलमूलाः कुशलैर्धर्मैरसमन्वागता इष्टाः, पृथग्जनत्वेन तु समन्वागताः । यस्मात्ते
पृथग्जना इष्यन्ते तस्मान्न कुशलं पृथग्जनत्वम् । क्लिष्टमपि तन्न भवति, वीतरागाणा-
मपि तेन समन्वागमात् । क्लिष्टस्य हि वस्तुनः स्वभावप्रहाणमिष्यते । प्राप्तिच्छेदप्र-
हाणमित्यर्थः । तद्यदि पृथग्जनत्वं क्लिष्टं स्याल् लौकिकवीतरागाणां तस्य प्राप्ति-
च्छेद इति तेनासमन्वागमः स्यात् । इष्यते च तेषां तेन समन्वागमः । तथा हि ते

लौकिकवीतरागाः पृथग्जना एवेष्यन्ते । अक्लिष्टाव्याकृतत्वैकत्वे ऽदोषः । छन्दरागप्रहाणं ह्यक्लिष्टस्येष्यते ' तदालम्बनक्लेशप्राप्तिच्छेद इत्यर्थः । न तु तदात्मीयप्राप्तिच्छेद इष्यते । तथा ह्युक्तं भगवता । यो भिक्षवो रूपे छन्दरागस्तं प्रजहीत ' एवं छन्दरागप्रहाणे वस्तद्रूपं प्रहीणं भवतीति विस्तरः । तस्मादक्लिष्टाव्याकृतं पृथग्जनत्वं तेषां प्रहीणानामपि चक्षुरादिवत्समुदाचरति ' अतस्तेन समन्वागमो भवति । किं पुनः कारणं ' अक्लिष्टाव्याकृतत्वात्पृथग्जनत्वं न दर्शनप्रहातव्यं ' रूपत्वाच्च कायवाक्कर्म ' इत्याह '
74.17 (14a–2) सत्येष्वविप्रतिपत्तेः । अक्लेशदुष्टत्वादनालम्बकत्वाच्च पृथग्जनत्वं न दुःखादिषु सत्येषु विप्रतिपद्यते । न विपरीतरूपेण प्रवर्तत इत्यर्थः । कायवाक्कर्माप्यनालम्बकत्वादेव न विप्रतिपद्यते । तस्मात्तदुभयं न दर्शनहेयम् । अयं सत्येष्वविप्रतिपत्तेरिति
74.18 (14a–2) हेतुरषष्ठत्वे ऽप्यनुवर्तयितव्यः । दुःखे धर्मज्ञानक्षान्तौ पृथग्जनत्वप्रसङ्गाच्चेति ' अयमुपचयहेतुः ' पृथग्जनत्वस्यैव दर्शनहेयत्वनिवृत्त्यर्थमुच्यते ' कायवाक्कर्मणो ऽनभिसंबन्धात् । दुःखे धर्मज्ञानक्षान्तौ पृथग्जनत्वप्राप्तिश्छिद्यते ' न तु छिन्ना ' तत्प्रहेयक्लेशप्राप्तिवत् ।

निरुध्यमानो मार्गस्तु प्रजहाति तदावृतिम् ।

इति वचनात् । दुःखे धर्मज्ञाने तु तत्प्राप्तिश्छिन्ना । तेन तत्प्राप्तिसद्भावाद् दुःखे धर्मज्ञानक्षान्त्यवस्थायां स पुद्गलः पृथग्जनः स्यात् । न चासौ तस्यामवस्थायां पृथग्जन इति शक्यते व्यवस्थापयितुं ' अधिगतार्यमार्गत्वात् । तथा हि पृथग्जनत्वं कतमत् । आर्यधर्माणामलाभ इति पृथग्जनत्वलक्षणम् । स चार्यधर्माणां लाभेन मार्गलाभो व्यावर्त्यते । तस्मादार्य एवासाविति । इदं तावद्भवन्तो वैभाषिकाः प्रष्टव्याः ' तत्पृथग्जनत्वं किं भावनामार्गप्रतिलम्भादेव प्रहीयते । नेत्युच्यते । तत्पृथग्जनत्वं नवभौमिकं ' कामावचरं यावद्भवाग्रिकम् । तच्चाक्लिष्टम् । तेन प्रतिभूमिनवमक्लेशप्रकारप्रहाणावस्थायां प्रहीयते । सर्वं ह्यक्लिष्टं सास्रवं नवम एव विमुक्तिमार्गे प्रहीयते । यद्येवमवीतरागावस्थायामार्यः पृथग्जनः स्यात् । न ' पृथग्जनत्वस्य विहीनत्वात् । दुःखे धर्मज्ञानक्षान्तेः प्रभृति तद्विहीनमेव ' न तु प्रहीणम् । कः पुनर्विहानप्रहाणयोर्विशेष इति । विहानं प्राप्ति-

छेदे व्यवस्थापितं, फलानां तु प्रतिपन्नलाभे व्यवस्थापितम्। तस्मात्प्राप्तिच्छेदात्तेन
पृथग्जनत्वेनासमन्वागमात्तस्यामवस्थायामार्य एव भवति, न पृथग्जन इत्यदोष
एषः ॥ ४० ॥

चक्षुश्च धर्मधातोश्च प्रदेशो दृष्टिरिति। चक्षुरेव धर्मधातुप्रदेश एव च दृष्टि- 75.9 (14a–7)
रित्यवधार्यते। सत्कायदृष्ट्यादिकेति सत्कायदृष्टिरन्तग्राहदृष्टिर्मिथ्यादृष्टिर्दृष्टिपरा- 75.10 (14b–1)
मर्शः शीलव्रतपरामर्शश्चेति॥ शैक्षस्यानास्रवेति प्रज्ञेत्यधिकृतम्। अशैक्षस्याशैक्षीत्य- 75.17 (14b–4)
शैक्षस्यानास्रवा प्रज्ञा ऽशैक्षी। क्षयानुत्पादज्ञानवर्ज्येति वक्तव्यम्। वक्ष्यति हि,

क्षयानुत्पादधीर्न दृक्।

इति। समेघामेघेति विस्तरेण यावत्क्लिष्टाक्लिष्टालौकिकीशैक्ष्यशैक्षीभिर्दृष्टि- 75.18 (14b–5)
र्धर्मदर्शनमिति। लोके भवा लौकिकी। क्लिष्टा चाक्लिष्टा च क्लिष्टाक्लिष्टा। 76.1 (14b–6)
क्लिष्टाक्लिष्टा चासौ लौकिकी च क्लिष्टाक्लिष्टलौकिकी। क्लिष्टाक्लिष्टलौकिकी च
शैक्षी चाशैक्षी च क्लिष्टाक्लिष्टलौकिकीशैक्ष्यशैक्ष्यः। ताभिर्धर्मदर्शनम्। कीदृशमित्याह,
समेघामेघरात्रिंदिवरूपदर्शनवदिति। यथा समेघायां रात्रौ रूपदर्शनं, एवं क्लिष्टया
लौकिकया सत्कायदृष्ट्यादिकया दृष्ट्या क्लिष्टधर्मदर्शनम्। अव्यक्ततरमित्यर्थः। यथा
तस्यामेव रात्रावमेघायां रूपदर्शनं, एवमक्लिष्टया लौकिकया दृष्ट्या धर्मदर्शनम्। अव्य-
क्तमित्यर्थः। यथा समेघे दिवसे रूपदर्शनं, एवं शैक्ष्या दृष्ट्या धर्मदर्शनम्। व्यक्तं न
त्वत्यर्थम्। यथा पुनरमेघे दिवसे रूपदर्शनं, एवमशैक्ष्या दृष्ट्या धर्मदर्शनम्। अत्यर्थं
व्यक्तमित्यर्थः॥ अनीरणादित्यसंतीरणात्। संतीरणं पुनर्विषयोपनिध्यानपूर्वकं 76.5 (14b–8)
निश्चयाकर्षणम्। अत एव चान्यापीति विस्तरः। अत एवासंतीरणादन्यापि मानसी 76.8 (14b–9)
क्लिष्टा रागादिसंप्रयुक्ता, ऽक्लिष्टा वा क्षयानुत्पादज्ञाना निवृताव्याकृता प्रज्ञा न
दृष्टिः॥ रूपालोचनार्थेनेति। चक्षुर्न संतीरकत्वेन दृष्टिः, किं तर्हि रूपालोचनार्थेन। 76.12 (14b–10)
प्रज्ञा तु संतीरकत्वेनेति दर्शितं भवति॥ ४१॥

अन्यविज्ञानसंसर्गिन इत्यन्यविज्ञानसंमुखीभाविनः पुद्गलस्यान्यविज्ञानव्यास- 76.18 (15a–1)
क्तस्येत्यर्थः। पश्येच्चक्षुरिन्द्रियं, विषयादिसांनिध्यात्। यस्य तु चक्षुर्विज्ञानं पश्यती-

77.3 (15a–3) ति पक्षः तस्य तद्विज्ञानासंभवाददोषः। तदेव चक्षुराश्रितं विज्ञानं पश्यतीति, दर्श-
77.6 (15a–4) नस्य तद्भावे भावात्तदभावे चाभावात् ॥ दृश्यते रूपं, न किलान्तरितं यत इति।
किलशब्दः परमतप्रदर्शनः। तस्याप्रतिघत्वादिति। विज्ञानममूर्तं कुड्यादीन्यतिक्रम्यापि
77.10 (15a–6) पश्येत्। विज्ञानवाद्याह, नैव ह्यावृते चक्षुर्विज्ञानमुत्पद्यत इति, अनाभासगत-
77.12 (15a–6) त्वाद् विषयस्येत्यभिप्रायः। किं खलु नोत्पद्यत इति। अप्रतिघत्वात्कुड्यादीनि
व्यतिभिद्य कुड्याद्यव्यवहित इव विषये विज्ञानमुत्पत्स्यत इति भावः। यस्य त्वि-
ति। यस्य मम वैभाषिकस्य पक्षः चक्षुः पश्यतीति तस्य मम चक्षुषः सप्रतिघत्वाद्
व्यवहिते कुड्यादिभिर्वृत्त्यभावः, तस्य चक्षुष आलोचनवृत्त्यभावः। विज्ञानं तर्हि
वैभाषिकस्य व्यवहितेऽपि प्राप्नोतीति। चोद्यमनुपातिमाशङ्क्य स एव वैभाषिकः पुन-
77.14 (15a–7) राह, विज्ञानस्याप्यनुत्पत्तिरिति। यथैव चक्षुषो व्यवहिते वृत्त्यभावो युज्यते, विज्ञा-
नस्याप्यनुत्पत्तिर् विज्ञानवृत्त्यभावः, आश्रयेण सहैकविषयप्रवृत्तत्वाद्, युज्यते।
य एव हि चक्षुषो व्यवहितोऽर्थो विषयः स्यात्स एव विज्ञानस्येति युक्ता विज्ञानस्याप्यनु-
त्पत्तिः। तव तु विज्ञानवादिनोऽप्रतिघत्वाद्विज्ञानस्य व्यवहिते विज्ञानमुत्पद्येत, न
तूत्पद्यते। तस्माच्चक्षुः पश्यति न विज्ञानमिति सिद्धम् ॥ एवं विज्ञानवादिनि प्रति-
77.15 (15a–8) षिद्धे तत्पक्षमाचार्यो गृहीत्वाह, किं नु वै चक्षुः प्राप्तविषयमिति विस्तरः। यथा
कायेन्द्रियं प्राप्तविषयं कुड्यादिव्यवहितं विषयं न गृह्णाति, कुड्यादिप्रतिघातात्
ततः परेण प्रवर्तितुमलभमानत्वात्, किमेवं चक्षुः प्राप्तविषयं कुड्यादिप्रतिघातेन प्रति-
हतं सत् ततः परेण गन्तुमलभमानं तं कुड्यादिव्यवहितं विषयं न गृह्णातीति। नैत-
77.16 (15a–10) द्युज्यते। तस्मात्सप्रतिघत्वाद् आवृतं चक्षुर्न पश्येदिति न वक्तव्यम्। काचाभ्रप-
टलस्फटिकाम्बुभिश्चान्तरितं कथं दृश्यत इति। काचेनाभ्रपटलेन स्फटिकेनाम्बुना
चान्तरितं व्यवहितं रूपं कथं दृश्यते। सप्रतिघत्वाद्धि कुड्यादिव्यवहितवत्काचादिव्य-
77.20 (15b–1) वहितं चक्षुर्न पश्येत्, तच्च पश्यतीति सिद्धान्तः। यत्रालोकस्याप्रतिबन्ध इति।
आलोके हि सति विषय आभासगतो भवतीति विज्ञानोत्पत्तिसंभवः। एवं हि विज्ञा-
नकारणं पठ्यते, चक्षुरिन्द्रियमनुपहतं भवति, विषय आभासगतो भवति, तज्जश्च

मनस्कारः प्रत्युपस्थितो भवतीति । यत आवृते रूपे काचादिभिस्तत्रोत्पद्यत एव
चक्षुर्विज्ञानम् । यत्र तु प्रतिबन्धो ऽकाचादिस्वभावैः कुड्यादिभिस्तमस्विभिः तत्रावृते 78.1 (15b–2)
नोत्पद्यते । किम् । चक्षुर्विज्ञानमिति । अनुत्पन्नत्वादावृतं नेक्ष्यत इति । यत्त्वया ' किं
खलु नोत्पद्यत इत्यनुत्पत्तौ कारणं पृष्टमिदं तत्कारणमिति ब्रूमः ॥ यत्तर्हि सूत्र उक्त- 78.3 (15b–4)
मिति विस्तरः । चक्षुषा रूपाणि दृष्ट्वा न निमित्तग्राही भवति नानुव्यञ्जनग्राहीति
विस्तरः । यस्माच्चक्षुः पश्यति तस्मात्पुद्गलश्चक्षुषा पश्यतीत्यभिप्रायः । आचार्यः प्राह '
तेनाश्रयेणेत्ययमत्राभिसंधिः । चक्षुराश्रित्येत्येवात्राभिसंधिः । चक्षुषा आश्रयेण वि-
ज्ञानेन दृष्ट्वेत्यर्थः । कथं ज्ञायत इत्याह ' यथा मनसा धर्मान्विज्ञायेति । मनसा 78.5 (15b–5)
आश्रयेण विज्ञानेन विज्ञायेति भवति । न ह्यनन्तरातीतं मनो धर्मान्विजानाति ।
वर्तमानावस्थायां हि विज्ञानं कारित्रं करोति । आश्रितकर्म वा आश्रयस्योपचर्यत 78.8 (15b–7)
इति । आश्रितस्य विज्ञानस्य कर्म दर्शनं ' आश्रयस्य चक्षुष उपचर्यते । विज्ञाने पश्यति
सति चक्षुः पश्यतीत्युपचारः । यथा मञ्चाः क्रोशन्तीति । यथा मञ्चस्थेषु पुरुषेषु 78.8 (15b–7)
क्रोशत्सु मञ्चाः क्रोशन्तीत्युपचारः ' तद्वत् । यथा च सूत्र उक्तमिति विस्तरः ।
वैभाषिकाणामप्ययं पक्षः । न चक्षुर्विजानाति किं तर्हि विज्ञानं विजानातीति । अथ
चोक्तं ' चक्षुर्विज्ञेयानि रूपाणि कान्तानीति । तत्र आश्रितकर्म आश्रयस्योपचर्यत 78.10 (15b–7)
इत्यवश्यं प्रतिपत्तव्यम् ॥ द्वारं यावदेव रूपाणां दर्शनायेति । द्वारमिव द्वारं ' हेतु- 78.12 (15b–9)
राश्रय इत्यभिप्रायः । अनेनागमेन तेनाश्रयेणेति यो ऽर्थ उक्तस्तमेव समर्थयति । तेन 78.13 (15b–9)
चक्षुषो द्वारेण चक्षुर्विज्ञानं पश्यतीति । दर्शने तत्र द्वाराख्येति ' चक्षुर्ब्राह्मण
द्वारं यावदेव रूपाणां दर्शनायेत्यत्र । न ह्येतद्युज्यते ' दर्शनं रूपाणां दर्शनाये- 78.15(15b–10)
ति । अत्रावाचकत्वान्नैतद्युज्यत इत्यभिप्रायः । यदि दर्शनं करणं दृश्यते ऽनेनेति दर्शन-
मिति ' कर्तरि वा ल्युट् पश्यतीति दर्शनमिति ' दर्शनायेति वा भावसाधनं ' दृष्टिर्दर्शनं
तस्मै दर्शनायेति कथमेतन्न युज्यते । यस्माच्चक्षुर्व्यतिरिक्तं दर्शनं नास्ति । आलोचनमिति
चेत् ' न ' विज्ञानाव्यतिरिक्तत्वात् । विज्ञानमेव ह्यालोचनम् । नातो ऽन्यत्पश्यामः ।
यदि तु चक्षुर्द्वारं विवरं रूपाणां दर्शनाय विज्ञानायेत्यर्थो गृह्येत तद्युज्यते ॥ तद्यथा 78.19 (16a–2)

काचित्प्रज्ञा पश्यत्यप्युच्यत इति ' पश्यतीत्यप्युच्यत इति ' इतिशब्दो ऽत्राध्याहार्यः '
प्रजानातीत्यप्युच्यत इति । अनेनोपन्यासेन दर्शनविज्ञानयोरनर्थान्तरभाव इति दर्शय-
ति । का पुनरसौ या प्रज्ञैवमुच्यते । या दर्शनात्मिकोक्ता '

तदन्योभयथार्या धीः ।

78.20 (16a–2) इति वचनात् । तस्यैवं जानत एवं पश्यत इति सूत्रे ऽपि वचनात् । किंचिदिति वच-
नान्न सर्वं विज्ञानं पश्यतीत्युक्तं भवति । चक्षुर्विज्ञानं हि पश्यतीत्युच्यते ' न तु श्रो-
79.2 (16a–3) त्रादिविज्ञानमिति ॥ कान्या दृशिक्रियेति ' यस्योपलम्भकत्वं तस्य दर्शनं युज्यत इत्य-
79.3 (16a–4) भिप्रायः । तदेतदचोद्यमिति विस्तरः । यदि विज्ञानं विजानाति ' कर्तृभूतस्य
79.4 (16a–4) विज्ञानस्य कान्या विज्ञानक्रियेति वक्तव्यमिति तुल्यं चोद्यमापद्यते । न च तत्र
कर्तृक्रियाभेदः । न कर्तुर्विज्ञानस्य क्रियायाश्च विज्ञानलक्षणाया भेदो ऽन्यत्वमस्ति ।
भवति च कर्तृक्रियासंबन्धव्यपदेशः ' विज्ञानं विजानातीति । तद्वदिहापि भवेत् '
79.6 (16a–5) चक्षुः पश्यतीत्यचोद्यमेतत् । चक्षुर्विज्ञानं दर्शनमित्यपरे ' तस्याश्रयभावाच्चक्षुः
79.8 (16a–6) पश्यतीत्युच्यते । यथा नादस्याश्रयभावाद् घण्टा नदतीत्युच्यते । विज्ञानं
तर्हि कस्याश्रयभावाद्रूपं विजानातीत्याह ' विज्ञानस्याश्रयभावादिति ' चक्षुर्विज्ञा-
79.11 (16a–7) नस्याश्रयभावादित्यर्थः ॥ तद्विज्ञानं दर्शनमिति दृष्टं लोक इति । दर्शनमिति लोके
79.12 (16a–8) दृष्टं न तु विज्ञानमिति दृष्टम् । कथं गम्यत इत्याह ' तथा हि तस्मिन्नुत्पन्ने रूपं
79.13 (16a–8) दृष्टमित्युच्यते न विज्ञातमिति । विभाषायामप्युच्यत इति ' स एवार्थो ऽभिधीयत
79.16 (16a–9) इत्यभिप्रायः । चक्षुःसंप्राप्तं चक्षुराभासगतम् । विज्ञानं तु सांनिध्यमात्रेणेति ' ना-
79.17(16a–10) श्रयभावयोगेनेति दर्शयति ' यथा सूर्यो दिवसकर इति । यथा सांनिध्यमात्रेण सूर्यो
दिवसं करोतीत्युच्यते तथा विज्ञानं विजानातीत्युच्यते । कस्मात् । लोके तथा सिद्ध-
79.20 (16b–2) त्वात् । निर्व्यापारं हीदमिति विस्तरः । निर्व्यापारमिति निरीहम् । अनेन हि
80.1 (16b–2) कर्तुरर्थान्तरभूतां क्रियां प्रतिषेधति । धर्ममात्रमिति स्वतन्त्रस्य कर्तुः प्रतिषेधं करोति ।
हेतुफलमात्रं चेति । असत्यपि कर्तरि हेतुफलयोः कार्यकारणार्थत्वं दर्शयति । तत्र छन्दत
उपचाराः क्रियन्ते ' चक्षुः पश्यति विज्ञानं विजानातीति । यदि वस्तु व्यवहाराङ्गं '

तेनेह व्यवहारार्थसंसिद्ध्यर्थमसदपि सद्रूपेण परिकल्प्य ' कर्तृक्रियादिव्यवस्थानं क्रियते '
चक्षुः पश्यति विज्ञानं विजानातीत्येवमादि । नात्राभिनिवेष्टव्यम् ' भावो भवि- 80.4 (16b–3)
त्रपेक्षो ऽन्य इत्यादि । जनपदनिरुक्तिं नाभिनिविशेतेति । जनपदः तत्र नियता 80.4 (16b–4)
निश्चिता चोक्तिर्जनपदनिरुक्तिः ' तां नाभिनिविशेत ' कस्माद् ' अत्रेयं निरुक्तिरिति ।
न वा सर्वमेवार्थवतीं निरुक्तिं कल्पयेत् । संज्ञां च लोकस्य नाभिधावेदिति । 80.5 (16b–5)
आत्मा जीव इत्येवमादिकां संज्ञां लोकस्य नाध्यारोपयेत् । अभूतसमारोपेण ' अस्त्यात्मा
शरीरादिव्यतिरिक्त इति नातीव गच्छेदित्यर्थः । अथवा संज्ञां च लोकस्य नाभिधावे-
न्नाभिसरेत् । अर्थाभावात्संज्ञापि नास्तीति न कल्पयेदित्यर्थः । अतिसरणमतिक्रमणा-
मित्येको ऽर्थः ॥ ४२ ॥

उभाभ्यामपीति । अपिशब्दादेकेनापि ' नात्र नियमः । द्वयोर्विवृतयोः 80.16 (16b–8)
परिशुद्धतरं दर्शनमित्युक्तं भवति । नैकतरान्यथाभावादित्युन्मीलितार्धनिमी- 81.2 (16b–10)
लितयोर्द्वयोरेकतरस्यान्यथाभावात् । द्वयोरेकतरदन्यदन्यथाभवति ' यदि यदुन्मीलितं
तदर्धनिमीलितं क्रियते सर्वनिमीलितं वा ' यच्चार्धनिमीलितं यदि तत्सर्वनिमीलितं
क्रियते सर्वोन्मीलितं वा ' तदा द्विचन्द्रदर्शनं न भवति । अतो ऽवगम्यते ' द्वयोरपि
चक्षुषोरत्र विज्ञानोत्पत्तौ व्यापारो ऽस्तीति ॥ देशाप्रतिष्ठितत्वाद् रूपवदिति । वि- 81.3 (17a–2)
परीतदृष्टान्तः । यथा रूपस्य देशप्रतिष्ठितत्वादाश्रयविच्छेदाद्विच्छेदो भवति नैवं विज्ञा-
नस्य । न हि विज्ञानं देशप्रतिष्ठितं ' किं तर्हि देशाप्रतिष्ठितममूर्तत्वात् । देशाप्र-
तिष्ठितत्वाच्च नाश्रयविच्छेदाद्विच्छेदो भवति ॥ तथा हि दूराद्रूपं पश्यतीति । यत्र 81.7 (17a–6)
रूपं दृश्यते न तत्र तद्ग्राहकं चक्षुरिन्द्रियमस्ति ' तत्रप्रमाणानुपलभ्यमानत्वात् ' तत्रा-
विद्यमानदेवदत्तादिवत् । यथा चक्षुरेवं श्रोत्रमपि वक्तव्यम् ॥ इतर आह ' स्वविषयदे-
शप्रापि चक्षुःश्रोत्रं ' इन्द्रियत्वाद् ' घ्राणेन्द्रियादिवत् । अनेनानुमानेन तत्रप्रमाणानुप-
लभ्यमानत्वं हेतुमसिद्धं दर्शयति । आचार्य आह ' सति च प्राप्तविषयत्व इति वि- 81.9 (17a–8)
स्तरः । यदि प्राप्तविषयं चक्षुःश्रोत्रं कल्प्येत दिव्यं चक्षुःश्रोत्रमिह मनुष्येषु ध्या-
यिनां नोपजायेत । यदि हि चक्षुःश्रोत्रमतिविप्रकृष्टदेशस्थं व्यवहितं च कुड्यादि-

भिर्यथायोगं रूपशब्दं गृह्णीयाद् एवमस्य दिव्यत्वं संभवेत्' तच्च प्राप्तविषयत्वे न स्याद्'
घ्राणादिवत्। यथा घ्राणजिह्वाकायाः प्राप्तविषयत्वाद् दिव्या ध्यायिनां नोपजायेरन्'
तद्वत्। अनेन स्वविषयदेशप्रापित्वपक्षस्य धर्मिविशेषविपर्ययापन्नत्वं दर्शयति। संभ-
वद्दिव्यत्वे हि चक्षुःश्रोत्रे धर्मो' असंभवद्दिव्यत्वभावो विशेषविपर्ययः। स प्राप्नोतीति
दोषः। अनेन दोषेणाननुमानत्वात् तत्प्रमाणानुपलभ्यमानत्वं सिद्धं व्यवस्थापयति।
81.11 (17a–9) तस्मादप्राप्तविषयं चक्षुःश्रोत्रम्॥ यद्यप्राप्तविषयं चक्षुरिति विस्तरः। आसन्नेनाति-
दूरस्थेन तिरस्कृतेन वा तुल्या तदप्राप्तिरिति तत्र दर्शनं प्रसञ्जयति। किमिदं परस्य
साधनमुत दूषणमिति। यदि तावदेवं साधनं' अतिदूरं तिरस्कृतं चक्षुःश्रोत्रेण गृह्यते'
अप्राप्तत्वाद्' आसन्नविषयवदिति। तदसाधनं' हेतोः स्वयमनिश्चितत्वात्' पूर्वाभ्युप-
गमविरोधाच्च। अथ दूषणं' सर्वाप्राप्तग्राहकत्वं चक्षुःश्रोत्रलक्षणस्य धर्मिणः प्रसज्यते।
81.13 (17a–10) तददूषणं' अनुमानबाधनात्। कथमित्याह' कथं तावदयस्कान्तो न सर्वमप्रा-
प्तमयः कर्षतीति। प्रश्नमुखेनायस्कान्तनिदर्शनमुपन्यस्य सर्वाप्राप्ताग्राहकत्वं चक्षुःश्रोत्रस्य
साधयति' न सर्वाप्राप्तग्राहकं चक्षुःश्रोत्रं' सर्वाप्राप्तग्रहणशक्तिहीनत्वाद्' अयस्कान्त-
वत्। अयस्कान्तो ह्यप्राप्तमयो गृह्णाति' कर्षतीत्यर्थः' न च सर्वमप्राप्तं गृह्णाति।
81.14 (17b–1) तद्वच्चक्षुःश्रोत्रम्। प्राप्तविषयत्वे ऽपि चैतत्समानमिति। नातिदूरतिरस्कृतो विष-
यश्चक्षुःश्रोत्रेण गृह्यते' ग्रहणायोग्यत्वात्। संप्राप्ताञ्जनशलाकावत्॥ अथवा न सर्व-
81.16 (17b-2) स्वग्राह्यग्राहि चक्षुःश्रोत्रं' इन्द्रियस्वाभाव्यात्' घ्राणेन्द्रियादिवत्। घ्राणादीनां हि
प्राप्तो विषयो न तु सर्वः' सहभूगन्धाद्यग्रहणात्। घ्राणादिसहभूनि हि
81.18 (17b–4) गन्धरसस्प्रष्टव्यानि घ्राणादिभिर्न गृह्यन्ते' शक्तिरीन्द्रियाणामीदृशीति॥ मनस्त्वरू-
पित्वादिति। प्राप्तत्वं मूर्तानामेव व्यवस्थाप्यते' नामूर्तानामिति' मनः प्राप्तविषयमिति
82.2 (17b–5) न विचारः क्रियते॥ त्रयमन्यथेति। प्राप्तविषयमेव त्रयमिति' इष्टावधारणार्थमा-
82.3 (17b–7) रम्भः। अन्यथा हि प्राप्ताप्राप्तविषयमित्यपि संभाव्येत। निरुच्छ्वासस्य गन्धाग्रह-
णादिति। यदुच्छ्वासेन सार्धं सूक्ष्मं भूतचतुष्कं घ्राणमागतं तस्य गन्धो घ्राणेन घ्रायते।
82.7 (17b–9) वायौ गन्धान्तरमुत्पन्नमित्यपरे॥ मीलीभवेयुरेकदेशीभवेयुः। अथैकदेशेन। किम्।

स्पृशेयुरिति वर्तते ॥ कथं शब्दाभिनिष्पत्तिरिति। यदि न स्पृशन्ति ' अनभिघाते 82.10(17b–10)
शब्दाभिनिष्पत्तिर्न प्राप्नोतीत्यभिप्रायः। अत एवेति काश्मीराः। यदि हि स्पृशेयु-
र्हस्तो हस्तेनाभ्याहतः सज्जेत। जतुनीव जतुन्तरम्॥ कथं संचितं प्रत्याहतं न 82.13 (18a–1)
विशीर्यत इति। अन्योन्यमस्पृशतां परमाणूनां संघातः प्रत्याहतः पाण्यादिभिः कथं
न विशीर्यते॥ तदेवैषां निरन्तरत्वं यन्मध्ये नास्ति किंचिदिति ' आलोकादि मध्ये 82.17 (18a–4)
नास्तीति निरन्तरत्वमेषां व्यवस्थाप्यते। तदेव च प्राप्तित्वं ' नान्यथेति ॥ अपि 82.19 (18a–5)
खल्विति ' अपि चेत्यर्थः। संघाताः सावयवत्वात्स्पृशन्तीत्यदोषः ' यो ऽसौ दोष
उक्तो यदि सर्वात्मना स्पृशेयुर्मिश्रीभवेयुर्द्रव्याणि ' अथैकदेशेन सावयवाः प्रसज्येरन्नि-
ति ॥ कारणं प्रतीति। यस्य यादृशं कारणं तस्य तत्कारणं स्पृष्टमस्पृष्टं वा प्रती- 83.2 (18a–7)
ति। आह ' कदाचिदिति विस्तरः। स्पृष्टहेतुकमिति स्पृष्टमन्योन्यं हेतुरस्य स्पृष्टहे- 83.3 (18a–7)
तुकम्। एवमस्पृष्टहेतुकम्। यदा विशीर्यत इति। तद्यथा शुष्का मृच् चूर्णीक्रि-
यमाणा। यदा चयं गच्छतीति तद्यथा हिमं ' तद्धि पूर्वं सूक्ष्मं पश्चान्महद्भवति। 83.5 (18a–7)
चयवतां चय इति तद्यथा मृत्पिण्डद्वयसंनिपाते ॥ उत्तरक्षणावस्थानं स्यादिति 83.10 (18b–2)
उत्पद्य स्पृष्टियोगात्॥ स्पर्शो नास्ति ' निरन्तरे तु स्पृष्टसंज्ञेति भदन्तः। भद- 83.11 (18b–3)
न्तमतं चेष्टव्यमिति। वैभाषिकमतं कस्मान्नेष्टव्यम्। ननु वैभाषिकैरप्येवमुक्तं ' तदे-
वैषां निरन्तरत्वं यन्मध्ये नास्ति किंचिदिति। अस्त्येवम्। सावकाशं तु तद्वचनम्।
यन्मध्ये नास्ति किंचिदिति ब्रुवाणा वैभाषिका मध्य आलोकादि नेच्छन्ति ' अन्यपर-
माणुप्रवेशानवकाशं तु न ब्रुवते। अन्यथा हि सान्तराणां परमाणूनां शून्येष्व- 83.13 (18b–4)
न्तरेषु गतिः केन प्रतिबध्येत ' गतिमत इति वाक्यशेषः। अयं चापरो दोषः '
न च परमाणुभ्यो ऽन्ये संघाताः ' यथा वैभाषिकाः कल्पयन्ति। त एव संघाते 83.15 (18b–5)
स्पृश्यन्ते यथा रूप्यन्त इति संघात एव ' नैक इत्यर्थः ॥ यदि च परमाणोरिति 83.17 (18b–6)
विस्तरः। परमाणवपरिनिष्पत्तिं वक्तुकाम आचार्यो विचारयति। यदि परमाणोरे-
कस्य पूर्वादिदिग्भागभेदः कल्प्येत स्पृष्टस्यान्योन्यमस्पृष्टस्य वा सावयवत्वप्र-
सङ्गः। न चेत्। किम्। दिग्भागभेद इति वर्तते। स्पृष्टस्याप्यप्रसङ्गः। कस्य। 83.19 (18b–7

सावयवत्वस्य । अत्र साधनम् । न निरवयवः परमाणुर् ' दिग्भागभेदवत्त्वाद् ' माषराशिवदिति । तदेतद्दिग्भागभेदवत्त्वं नेच्छन्ति वैभाषिकाः । दिग्भागभेदो हि संघातरूपाणामेव कल्प्यते । एवं च वर्णयन्ति ' धर्मतैवेयं यत्सप्रतिघानां भिन्नदेशत्वम् । तेषां नैरन्तर्येणावस्थानाद् अभिन्नदेशत्वं मा भूदिति सान्तराणामपि सप्रतिघत्वेन गतिः प्रतिबध्यत इति ॥ ४३ ॥

आशुवृत्त्या च पर्वतानामलातचक्रादिवदित्यात्मपरिमाणतुल्यस्यैवार्थस्य ग्रहणे
इष्यमाणे कथं पर्वतादीनां महतां सकृदिव ग्रहणं लक्ष्यते ' न क्रमेणेत्याशङ्क्य युक्तिं
84.1 (18b–8) तथा ग्रहणे कथयति । आशुवृत्त्या चेत्यादि । यथालातचक्रादिग्रहणं क्रमेण
84.2 (18b–9) वर्तमानं सकृदिव लक्ष्यते तथा पर्वतनदीशब्दादिग्रहणमाशुवृत्त्या भवतीति । अहो-
स्वित्तुल्यातुल्यस्येति । द्राक्षाफलादिदर्शने तुल्यस्य वालाग्रपर्वतादिदर्शने ऽतुल्य-
84.14 (19a–5) स्येत्यभिप्रायः ॥ उन्मिषितमात्रेणेति न क्रमदर्शनन्यायेन ॥ एवं श्रोत्रेणेति वि-
स्तरः । कदाचिदल्पीयांसः ' यदा मशकशब्दं शृणोति । कदाचित्समाः ' यदा श्रोत्रपर-
माणुसमप्रमाणं कस्यचिच्छब्दं शृणोति । कदाचिद्भूयांसः ' यदा मेघशब्दं शृणोतीति ॥
84.18 (19a–8) अतसीपुष्पवदवस्थिताः कालजीरकपुष्पवदवस्थिताः । एकलतावस्थिता इत्यर्थः ॥
85.4 (19a–10) भूर्जाभ्यन्तरावस्थिता इति । कर्णाभ्यन्तरे यद्भूर्जपत्त्रवर्णाकारं तद्भूर्जमिवेति भूर्जं ' तदभ्य-
85.5 (19b–1) न्तरे ऽवस्थिताः श्रोत्रेन्द्रियपरमाणवः ॥ घाटाभ्यन्तरे ' घाटा नासापुटी ॥ मालावदव-
85.7 (19b–3) स्थितानीति मण्डलेन समपङ्क्त्यावस्थितानीति ॥ वालाग्रमात्रं किलेति । आगमसू-
85.20 (19b–9) चनार्थः किलशब्दः ' अस्तृतमव्याप्तम् ॥ स किलेति । कर्मसामर्थ्यादेवाविशरणं स्यादि-
86.2 (19b–10) ति किलशब्देन अरुचिं सूचयति ॥ संचिताश्रयालम्बनत्वादिति संचिताश्रयत्वात्सं-
86.7 (20a–7) चितालम्बनत्वाच्च ॥ चरमस्याश्रयो ऽतीत इत्यतीत एवेत्यवधारणम् ॥ अत एवो-
86.14 (20a–10) च्यत इति यस्मात्पञ्चविज्ञानकाया इन्द्रियद्वयाश्रयाः ' चक्षुरादीन्द्रियाश्रया मनइन्द्रिया-
86.16 (20b–2) श्रयाश्च ' तस्माच्चतुष्कोटिकमातिष्ठते । प्रथमा कोटिश्चक्षुरिति । चक्षुर्विज्ञानस्य
चक्षुराश्रयभावेन न समनन्तरप्रत्ययभावेन । न हि चक्षुश्चित्तचैत्तस्वभावम् ।

चित्तचैत्ता अचरमा उत्पन्नाः समनन्तरः ।

इति च समनन्तरप्रत्ययलक्षणम् । द्वितीया कोटिः, समनन्तरातीतश्चैतसिको धर्म- 86.16 (20b–2)
धातुः । तस्य समनन्तरभावेन नाश्रयभावेन । यदत्र ह्याश्रया विज्ञानस्येष्यन्ते चक्षुरादयो
मनःपर्यन्ता नान्ये ॥ तृतीया समनन्तरातीतं मनः । उभयलक्षणयुक्तत्वात् । चतुर्थी 86.17 (20b–3)
उक्तनिर्मुक्ता धर्माः । कोटित्रयमुक्ता विप्रयुक्ता असंस्कृतादयः ॥ एवं यावत्काय- 86.19 (20b–4)
विज्ञानस्य स्वमिन्द्रियं वक्तव्यमिति । यः श्रोत्रविज्ञानस्याश्रयभावेन समनन्तरप्र-
त्ययभावेनापि स तस्येति । चतुःकोटिकम् । प्रथमा कोटिः श्रोत्रम् । द्वितीया समनन्तरा-
तीतश्चैतसिको धर्मधातुः । तृतीया समनन्तरातीतं मनः । चतुर्थी कोटिरुक्तनिर्मुक्ता धर्मा
इति । एवमन्यदपि वक्तव्यम् ॥ मनोविज्ञानस्य पूर्वपादक इति । यो मनोविज्ञान- 86.20 (20b–4)
स्याश्रयभावेन समनन्तरप्रत्ययभावेनापि स तस्येति पूर्वपादकः । यस्तावदाश्रयभावेन 87.1 (20b–5)
समनन्तरप्रत्ययभावेनापि स इति । मनस्तावदवश्यमसौ समनन्तरप्रत्ययः स्यात् ।
समनन्तरप्रत्ययभावेन नाश्रयभावेन, समनन्तरातीतश्चैतसिको धर्मधातुः, अचक्षुराद्या-
श्रयषट्स्वभावत्वात् ॥ ४४ ॥

तद्विकारविकारित्वादिति विस्तरः । तेषां चक्षुरादीनां विकारस्तद्विकारः, 87.12 (20b–8)
तद्विकारेण विकारः तद्विकारविकारः, स एषामस्तीति तद्विकारविकारीणि विज्ञा-
नानि, तद्भावः तद्विकारविकारित्वम् । तस्माच्चक्षुरादय एवैषामाश्रया इत्यवधार्यते ।
अनुग्रहोपघातपटुमन्दतानुविधानादिति । चक्षुरादीनामञ्जनादिभिरनुग्रहं रेण्वादि- 87.14 (20b–10)
भिश्चोपघातं चक्षुरादिविज्ञानान्यनुविदधते, ससुखोत्पादात्सदुःखोत्पादाच्च यथाक्रमम् ।
पटुमन्दतां च तेषामनुविदधते, पटुमन्दतोत्पादात् । अतो ऽवगम्यते, चक्षुरादिविकारेण
विज्ञानविकारो भवतीति ॥ ननु च पटुनि रूपे पटु चक्षुर्विज्ञानमुत्पद्यमानं दृश्यते, मन्दे
मन्दमिति । यद्यपि रूपस्य पटुमन्दते चक्षुर्विज्ञानमनुविदधीत, विधुरावस्थयोस्तु चक्षू-
रूपयोश्चक्षुरवस्थामेव चक्षुर्विज्ञानमनुविधत्ते, न रूपावस्थाम् । तथा हि चक्षुष्यनुगृहीते
रूपे चोपहते तद्वीतरागाणां मध्यस्थानां च चक्षुर्विज्ञानमविकारमुत्पद्यते, न तु सदुःख-
मुत्पद्यते । रूपे पुनरनुगृहीते ऽपरित्यक्ते, चक्षुषि चोपहते कामलव्याधिना तिमिरो-
पघातेन वा, पीतदर्शनं भ्रान्तं केशोण्डुकादिदर्शनं वा प्रवर्तते । तथा पटुनि रूपे जरया

मन्दे चक्षुषि मन्दं चक्षुर्विज्ञानमुत्पद्यते । एवं मन्दे रूपे चक्षुर्यद्यतिपटु भवेत्पटु चक्षुर्विज्ञानमुत्पद्यते । तथा हि जातिस्वभावेन पटूनि गृध्रचक्षुषि मन्दे ऽपि शवरूपे ऽनेकयो-
88.6 (21a–3) जनविप्रकृष्टे ऽपि चक्षुर्विज्ञानमुत्पद्यते । इत्येवं श्रोत्रादीन्यपि योज्यानि ॥ अतो ऽसाधारणत्वाच्चेति । यत आश्रयभावाद् ' असाधारणत्वाच्च । आश्रयभावो व्याख्यात इति
88.7 (21a–4) न तं प्रत्याद्रियते । असाधारणत्वमेव तु व्याचक्षाण आह ' कथमसाधारणत्वमित्या-
88.8 (21a–5) दि । अन्यचक्षुर्विज्ञानस्यापीति ' अन्यसंतानविज्ञानस्यापीत्यर्थः । तैरेव निर्दिश्यत इति चक्षुरादिभिः ' चक्षुर्विज्ञानं यावन्मनोविज्ञानं ' न रूपादिभिः ' रूपविज्ञानं यावद्धर्म-
88.13 (21a–7) विज्ञानम् । यथा भेरीशब्दो यवाङ्कुर इति । असाधारणत्वात् ताभ्यां भेरीयवाभ्यां ' यथा निर्देशो लोके भेरीशब्दो यवाङ्कुर इति ' न तु दण्डशब्दः क्षेत्राङ्कुर इति वा । दण्डो ऽपि पटहादिशब्दस्यापि कारणीभवेत् ' क्षेत्रं च शालिगोधूमाङ्कुरस्यापि ' इति साधारणत्वान्न ताभ्यां निर्देशः क्रियते । असाधारणाभ्यां तु भेरीयवाभ्यां निर्देशः । तद्वदिहापि द्रष्टव्यम् । अपि खलु चक्षुरिव विज्ञानं ' उभयोः सत्त्वसंख्यातत्वाद् ' रूपं त्वसत्त्वसंख्यातमपि । चक्षुषा विज्ञानं चक्षुर्विज्ञानं ' तस्य करणभावात् । चक्षुषो विज्ञानं चक्षुर्विज्ञानं ' सुखदुःखवेदनासंप्रयुक्तस्य विज्ञानस्य चक्षुरनुग्रहोपघातप्रवृत्तत्वात् । चक्षुषो विज्ञानं चक्षुर्विज्ञानं ' असाधारणत्वेन ततः प्रवृत्तेः । चक्षुषो विज्ञानं चक्षुर्विज्ञानं ' सत्त्वसंख्यातस्यैव स्वामिभावात् । चक्षुषि विज्ञानं चक्षुर्विज्ञानं ' तत्संप्रयोगिन्याः सुखाया दुःखाया वा वेदनायाः चक्षुष्येव परिच्छिद्यमानत्वात् । एवं श्रोत्रादिषु योज्यम् ।
89.12 (21b–5) तदेवं चक्षुरादिभिरेव विज्ञाननिर्देशो युज्यते ' न रूपादिभिः ॥ एवं तृतीयचतुर्थध्यानभूमिकेन चक्षुषा तद्भूमिकाधरभूमिकानि रूपाणि पश्यतो योजयितव्यमिति ।
90.3 (21b–9) तस्यैव कामधातूपपन्नस्य योजयितव्यम् ॥ एवं तृतीयादिध्यानचक्षुषा योज्यमिति । तस्यैव प्रथमध्यानोपपन्नस्य तृतीयचतुर्थध्यानचक्षुषा पश्यतो योज्यम् ॥ ४५ ॥

90.12 (22a–2) न कायस्याधरं चक्षुरिति ' अधरभूमिकमित्यर्थः । स्वभूमिकमूर्ध्वभूमिकं चाभ्य-
90.13 (22a–6) नुज्ञातं भवति ॥ पञ्चभूमिकानि हि कायचक्षूरूपाणीति । कायः शरीरम् । एतानि कायादीनि पञ्चभूमिकानि ' कामावचराणि प्रथमध्यानभूमिकानि यावच्चतुर्थध्यानभूमि-

कानि ' आरूप्यधातावभावात् । द्विभूमिकं चक्षुर्विज्ञानमिति ' कामावचरं प्रथ- 90.14 (22a-7)
मध्यानभूमिकं च ' तयोर्वितर्कविचारसद्भावात् ' चक्षुर्विज्ञानस्य चावश्यं सवितर्कवि-
चारत्वात् । ऊर्ध्वरूपं न चक्षुष इति ' नोर्ध्वभूमिकं रूपं चक्षुषो विषयो भवति ' ऊर्ध्वभू- 91.2 (22a-8)
मिकस्य रूपस्य सूक्ष्मत्वात् । स्वभूमिकमधरभूमिकं चाभ्यनुज्ञातं भवति । विज्ञानं च । 91.4 (22a-8)
किम् । ऊर्ध्वं न चक्षुष इति प्रकृतम् । कामावचरस्य चक्षुषो ऽधरभूमिकस्य प्रथमध्यान-
भूमिकं चक्षुर्विज्ञानं न भवति । स्वभूमिकमधरभूमिकं वाभ्यनुज्ञातं भवति । कामावच-
रस्य चक्षुषः स्वभूमिकं कामावचरमेव चक्षुर्विज्ञानं भवति । प्रथमध्यानभूमिकस्य चक्षुषः
प्रथमध्यानभूमिकमेव चक्षुर्विज्ञानं भवति ' कामावचरं तु चक्षुर्विज्ञानमस्य न भवति ।
ननु चोक्तमधरभूमिकमभ्यनुज्ञातमिति । सत्यमुक्तमेतत् । किं तु ' असत्यात्मीये ऽधर-
भूमिकमिष्यते ' न सतीति । द्वितीयतृतीयचतुर्थध्यानचक्षुषो ह्यसति आत्मीये प्रथम-
ध्यानभूमिकमेवाधरं चक्षुर्विज्ञानं भवति ' न तु कामावचरं ' परमनिहीनत्वात् । संभव-
तस्त्वेवमुक्तमधरभूमिकमभ्यनुज्ञातमिति ॥ अस्येत्यनन्तरोक्तस्य चक्षुर्विज्ञानस्येति 91.5 (22a-8)
चक्षुर्विज्ञानजातेः ' रूपं सर्वतो विषयः । संभवतस्तु योज्यम् । कामावचरस्य चक्षुर्वि-
ज्ञानस्य स्वभूमिकमेव रूपं ' प्रथमध्यानभूमिकस्य तु प्रथमध्यानभूमिकचक्षुराश्रयस्य
चक्षुर्विज्ञानस्य स्वभूमिकमधरभूमिकं च रूपं विषयः ' चतुर्थध्यानभूमिकचक्षुराश्रयस्य तु
चतुर्थध्यानभूमिकं रूपं ततश्चाधरभूमिकं सर्वं विषयः । एवं यावद्द्वितीयध्यानभूमिकच-
क्षुराश्रयस्य द्वितीयध्यानभूमिकं ' ततश्चाधरभूमिकं रूपं विषयः । एवं चक्षुर्विज्ञानजाते-
रूर्ध्वमधःस्वभूमौ च रूपं विषयो भवति । कायस्य चोभे रूपविज्ञाने सर्वतो भवत 91.7 (22a-9)
इति । कामावचरस्य कायस्य शरीरस्य स्वभूमिकोर्ध्वभूमिके रूपविज्ञाने भवतः । प्रथम-
ध्यानभूमिकस्य कायस्य प्रथमध्यानभूमिकमेव विज्ञानं ' रूपं तु स्वोर्ध्वाधरभूमिकम् ।
यथा स्वाश्रयं चक्षुः । द्वितीयादिध्यानभूमिकस्य कायस्य विज्ञानमधरभूमिकमेव ' प्रथ-
मध्यानभूमिकमेवेत्यर्थः । रूपं तु द्वितीयतृतीयध्यानभूमिकस्य कायस्य स्वोर्ध्वाधरभूमिकं '
यथा स्वाश्रयं चक्षुः । चतुर्थध्यानभूमिकस्य कायस्य रूपं स्वाधरभूमिकं ' तत ऊर्ध्वं रूपा-
भावात् ॥ ४६ ॥

91.13(22a-10) तथा श्रोत्रमिति । यथा चक्षुरुक्तं तथा श्रोत्रं व्याख्यातव्यम् । कथमि-
त्याह । यत्र काये स्थितः श्रोत्रेण शब्दाञ्शृणोति किं तानि कायश्रोत्रशब्दविज्ञाना-
न्येकभूमिकान्येव भवन्ति । आहोस्विदन्यभूमिकान्यपि । आह । सर्वेषां भेदः । कामधा-
तूपपन्नस्य स्वेन श्रोत्रेण स्वाञ्शब्दाञ्शृण्वतः सर्वं स्वभूमिकं भवतीति विस्तरेणानेना-
दिना ग्रन्थो वक्तव्यो यावदयं तु नियमः ।

91.14(22a-10) न कायस्याधरं श्रोत्रमूर्ध्वं शब्दो न च श्रुतः ।
विज्ञानं चास्य शब्दस्तु कायस्योभे च सर्वतः ॥

91.16 (22b-1) इति विस्तरेण योज्यम् । कथमिति । न कायस्याधरं श्रोत्रम् । पञ्चभूमिका हि
कायश्रोत्रशब्दाः । कामावचरा यावच्चतुर्थध्यानभूमिकाः । द्विभूमिकं श्रोत्रविज्ञानं । का-
मावचरं प्रथमध्यानभूमिकं च । तत्र यद्भूमिकः कायस्तद्भूमिकमूर्ध्वभूमिकं वा श्रोत्रं भव-
ति । न त्वधरभूमिकम् । यद्भूमिकं श्रोत्रं तद्भूमिको ऽधरभूमिको वास्य शब्दो विषयो
भवति । ऊर्ध्वं शब्दो न च श्रुतः । न हि कदाचिदूर्ध्वभूमिकः शब्दो ऽधरभूमिकेन श्रो-
त्रेण श्रोतुं शक्यते । विज्ञानं च । ऊर्ध्वं न श्रोत्रस्य । शब्दवत् । अस्य शब्दस्तु काय-
स्योभे च सर्वतः । अस्येत्यनन्तरोक्तस्य श्रोत्रविज्ञानस्य शब्दः । सर्वतो विषयः । ऊर्ध्व-
92.10 (22b-4) मधः स्वभूमौ च । कायस्य चोभे शब्दविज्ञाने सर्वतो भवत इति ॥ अनियतं मन इति ।
यथा चक्षुः श्रोत्रं च नियमितं । न कायस्याधरं चक्षुः श्रोत्रं चेत्येवमादिना नैवं नियमितं
92.12 (22b-5) मनः । अत एवाह । पञ्चभूमिके ऽपि काये सर्वभूमिकानि मनआदीनि भवन्ती-
ति । मनोधर्ममनोविज्ञानानि सर्वभूमिकानि कामावचराणि यावद्भवाग्रिकाणि । तद्यथा
कामधातूपपन्नो यदि कामावचरान्मनसो ऽनन्तरं कामावचरमेव कामावचरधर्मालम्बनं
मनोविज्ञानमुत्पादयति सर्वाणि कामावचराणि । यदि प्रथमध्यानभूमिकाद् यावद्भवा-
ग्रभूमिकादुपपत्तिकाले समापत्तिकाले वा संभवतः कामावचरं तथैव मनोविज्ञानमुत्पा-
दयति । मनस्ततस्त्यं । शेषाणि कामावचराणि । अथ तत्रैव तद्विज्ञानमुत्पादयति
धर्मास्त्वालम्बनं प्रथमध्यानभूमिका यावद्भवाग्रभूमिकाः । धर्मास्ततस्त्याः । शेषाणि
पूर्ववत् । एवं प्रथमध्यानोपपन्नो यावद्भवाग्रोपपन्नो यथायोगं वक्तव्यः ॥ समाप्त आनु-

षङ्गिकः प्रसङ्ग इति । चक्षुश्च धर्मधातोश्च प्रदेशो दृष्टिरित्येतदाधिकारिकः । अथवा 75.9 (14a–7)
यत्र काये स्थितश्चक्षुषा रूपाणि पश्यतीत्येवमादिरयमानुषङ्गिकः प्रसङ्गः ' दर्शनसंबन्धा- 88.14 (21a–8)
दागतत्वात् ॥ ४७ ॥

पञ्च बाह्या द्विविज्ञेया इति । पञ्चग्रहणं धर्मधातुनिराकरणार्थम् । बाह्यग- 93.7 (22b–10)
हणं चक्षुरादिनिरासार्थम् । बाह्या एव पञ्च द्विविज्ञेया इत्यवधारणादन्ये त्रयोदश धा-
तव एकविज्ञानविज्ञेया इति सिद्धं ' पञ्चविज्ञानकायानामविषयत्वात् ॥ नित्या धर्मा 94.2 (22b–10)
असंस्कृता इति । असंस्कृता एव नित्या इत्यवधारणम् । अध्वसंचाराभावान्नित्याः ॥

धर्मार्ध इन्द्रियं ये च द्वादशाध्यात्मिकाः स्मृताः । 94.4 (22b-10)

इति । धातव इत्यधिकारः ॥ द्वाविंशतिरिन्द्रियाण्युक्तानि ' सूत्र इति । अथ जा- 94.5 (23a–6)
तिश्रोणो ब्राह्मणो येन भगवांस्तेनोपसंक्रान्तः ' उपसंक्रम्य भगवता सार्धं संमुखं संमो-
दनीं संरञ्जनीं विविधां कथां व्यतिसार्यैकान्ते ऽन्यषीदत् । एकान्तनिषण्णो जातिश्रोणो
ब्राह्मणो भगवन्तमिदमवोचत् ' इन्द्रियाणीन्द्रियाणीति भो गौतम उच्यन्ते । कति भो
गौतम इन्द्रियाणि ' कियता चेन्द्रियाणां संग्रहो भवति । द्वाविंशतिरिमानि ब्राह्मण
इन्द्रियाणि । कतमानि द्वाविंशतिः । चक्षुरिन्द्रियं श्रोत्रेन्द्रियं घ्राणेन्द्रियं जिह्वेन्द्रियं
कायेन्द्रियं मनइन्द्रियं स्त्रीन्द्रियं पुरुषेन्द्रियं जीवितेन्द्रियं सुखेन्द्रियं दुःखेन्द्रियं सौमन-
स्येन्द्रियं दौर्मनस्येन्द्रियं उपेक्षेन्द्रियं श्रद्धेन्द्रियं वीर्येन्द्रियं स्मृतीन्द्रियं समाधीन्द्रियं
प्रज्ञेन्द्रियं अनाज्ञातमाज्ञास्यामीन्द्रियं आज्ञेन्द्रियं आज्ञातावीन्द्रियं ' इतीमानि ब्रा-
ह्मण द्वाविंशतिरिन्द्रियाणि । इयता इन्द्रियाणामिन्द्रियसंग्रहो भवति । अथ जातिश्रो-
णो ब्राह्मणो भगवतो भाषितमभिनन्द्यानुमोद्य भगवतो ऽन्तिकात्प्रक्रान्त इति ॥ धर्मार्ध 94.4 (23a–5)
इति धर्मधात्वेकदेश इत्यर्थः । धर्मार्धमिति नपुंसकनिर्देशेन केचित्पठन्ति । तेषां पाठे
अर्धधर्म इति समप्रविभागः प्राप्नोति ' अर्धं नपुंसकमिति लक्षणात् । अर्धपिप्पलीति
यथा । अथ नपुंसकलिङ्गो ऽप्यर्धशब्द एकदेशार्थे वर्तते ' तदेवं समासः क्रियते ' धर्म-
स्यासौ अर्धं च धर्मार्धम् । धर्मे वार्धं धर्मार्धमिति ॥ आभिधार्मिकास्तु षडायतनव्य- 94.14(23a–10)
वस्थामनादृत्येति । चक्षुरायतनं यावत्कायायतनं मनआयतनमिति षडायतनमिति

षडायतनव्यवस्थां युक्तरूपामनादृत्य ' जीवितेन्द्रियानन्तरं मनइन्द्रियं पठन्ति '
94.17 (23b–2) सालम्बनत्वात् । वेदनेन्द्रियादीनि हि सालम्बनानि तदनन्तरं पठन्ति ॥ जीवितेन्द्रि-
यादीन्येकादशेति ' जीवितेन्द्रियं ' वेदनेन्द्रियाणि पञ्च ' श्रद्धादीनि चेन्द्रियाणि
94.19 (23b–3) पञ्चेति । त्रयाणां च भाग इति ' आज्ञास्यामीन्द्रियादीनां नवद्रव्यात्मकानां मनइन्द्रियं
मुक्त्वान्यान्यष्टौ द्रव्याणि धर्मधात्वेकदेशः । चक्षुरादय पञ्च स्वनामोक्ता इति ' पञ्च
95.2 (23b–4) चक्षुरादयो धातवः पञ्चेन्द्रियाणि ' चक्षुरिन्द्रियं यावत्कायेन्द्रियम् । स्त्रीपुरुषेन्द्रिये च
कायेन्द्रियैकदेश एवेति पञ्च चक्षुरादिधातवः सप्तेन्द्रियाणि भवन्ति । सप्त चित्तधा-
तवो मनइन्द्रियमिति । एवं द्वादशाध्यात्मिका धातवो ऽष्टाविन्द्रियाणि भवन्तीति ।
95.3 (23b–5) द्वादशाध्यात्मिका धातव एव धर्मार्ध एव चेन्द्रियमित्यवधारणात्पञ्च धातवो रूपा-
दयः ' तदन्यधर्मधातुप्रदेशश्च नेन्द्रियमिति सिद्धम् ॥ ४८ ॥

आचार्ययशोमित्रकृतौ स्फुटार्थायामभिधर्मकोशव्याख्यायां धातुनिर्देशो नाम प्रथमं कोशस्थानम् ॥ १ ॥

Errata.

Page.	Printed.	Correct.
12.17	°श्यानास्रवश्चेति	°श्यानास्रवाश्चेति
13.18	अनाभिधर्मि°	अनाभिधार्मि°
14.14	वेति	चेति
18.11	गृह्यमाना°	गृह्यमाणा°
18.17	पश्चानं	पश्चानां
19. 4	वाभिसंधाय	चाभिसंधाय
19.13	वावश्यं°	चावश्यं°
19.16	श्रद्धानुसारिमार्ग	श्रद्धानुसारिमार्गाणाम्
19.17	शेषानां	शेषाणां
21.16	इति ।	इति ॥
22.10	कप्पिकारणो	कप्पिकणो (?)
23. 8	ते	त
26.24	वैभाषिकानां°	वैभाषिकाणां°
29. 1	चालम्बनाण्यभि°	चालम्बनान्यभि°
30.14	प्रवाहेन	प्रवाहेण
30.19	गम्यते ।	गम्यते ॥

Замѣченныя опечатки и исправленія въ тибетскомъ текстѣ Abhidharmakoçakārikā и bhāṣya (Bibl. Buddhica XX, fasc. 1).

Страница.	Напечатано.	Слѣдуетъ.
6. 3	རྒྱུ་དད་	རྒྱུ་ངན་
8. 1	སྨོས་ཏུ་	སྨོས་ཏེ་
10.15	ཡིན་ནེ།	ཡིན་ནོ།
11.15	སྡ་	ལྡ་
13. 2	འཐབ་ཙས་	འཐབ་བཙས་
13. 5	སྡ	ལྡ
14. 9	ལོ་སགས་	ལ་སོགས་
16. 8	ཁ་དོག་ཅིག་	ཁ་དོག་གཅིག་
23.15	ཟུག་རྟུས་	ཟུག་རྡུས་
34.10	རྒྱུད་ཅགི་	རྒྱུད་གཅིག་
34.16	དག་གི་རིགས་ཀྱི་རང་བཞིན་ ནི་ཁམས	དག་ནི་རིགས་ཀྱི་རང་བཞིན་ ནོ་ཞེ་ན། ཁམས་
35.17	དབང་པོ་ལོགས་	དབང་པོ་ལས་ལོགས་

Страница.	Напечатано.	Слѣдуетъ.
36. 6	རྣམས་གསུམ	རྣམ་གསུམ
40.10	ཉིད་ཀྱི་	ཉིད་ཀྱིས་
41. 2	དང་པོ་	དང་པོར་
43. 4	རགས་པའི་	རིགས་པའི་
44.8-9	ཆོས་ཀྱི་ཕུང་པོ་	ཆོས་ཀྱི་ཕུང་པོ
46. 8	མཆེད་ཀྱི་	མཆེད་ཀྱིས་
46.11	བཅས་ན་ནི་	བཅས་པ་ནི་
47. 8	ཁུང་དང་ག་དང་	ཁུང་དང་ཁ་དང་
47.12	རིག་བར་	རིག་པར་
49.18	དམིགས་པ་ཐོགས་	དམིགས་པ་ལ་ཐོགས་
50. 2	ལྷར་ནང་གི་ཡུལ་ལ་མ་དམིགས་	ལྷར་རང་གི་ཡུལ་ལ་དམིགས་
50.13	ཐོགས་བས་	ཐོགས་པས་
50.14-15	གང་དག་ཡིན་པ	གང་དག་ཐོགས་པ་དང་བཅས་པ་ཡིན་པ་
51. 7	རྣམ་པར་མིན་པའི་ཕྱིར་ལུང་བསྟན་དུ་མེད་པའི་ཕྱིར་རོ་	རྣམ་པར་སྨིན་པར་ལུང་བསྟན་དུ་མེད་པའི་ཕྱིར་ལུ་མ་བསྟན་པ་དག་གོ་
52. 7	ཀླུའི	ཀླུ་ཡི་

Страница.	Напечатано.	Слѣдуетъ.
54. 5	ལྦ་བསྐྱུབས་	སྦ་བ་སྐྱུགས་
54.10	དེ་ནས་དབང་པོ་དག་	དེ་ན་དབང་པོ་གང་དག་
54.12	འདི་སྐད་ཏུ་ལས ཀྱི་	འདི་སྐད་ཏུ། ལུས་ཀྱི་
54.15-16	ནས་ཅི་ཞིག་སྲེད་	ནས། ཅི་ཞིག །སྲེད་
57.11	ཡོན་པའི་	ཡིན་པའི་
58. 1	རྣན་པར་རྟོག་པ་	རྣམ་པར་རྟོག་པས་
59.12	བཅས་ཏེ། བཤད་	བཅས་ཏེ་བཤད་
63.11	བཅས་པའི་	བཅད་པའི་
63.12	པོ་མོད་པའི་	པོ་མེད་པའི་
65.10	པ་རིག་	པས་རིག་
65.16	ཕྱིར་བཞིན་ཏུ་	ཕྱི་ར་བཞིན་ཏུ་
68. 1	ཐོག་མར་	འོག་མར་
72.1-3	Эти три строки опустить.	
72. 6	དེའི་དང་	དེ་དང་
74.14	ཡིན་པའི། ལུང་	ཡིན་པའི་ལུང་
74.15	དང་། འདོད་	དང་འདོད་
74.18	རྟོག་པའི་	རྟོགས་པའི་
76. 8	ཅིའི་ཕྱིར་རྣམ་པར་ཤེས་པ	ཅིའི་ཕྱིར་ཡིད་ཀྱི་རྣམ་པར་ ཤེས་པ་

Страница.	Напечатано.	Слѣдуетъ.
77. 3	བསྟེན་	བརྟེན
77. 4	བསྟེན་	བརྟེན་
77.12	ཅི་སྟེ་མི་སྐྱེ་གང་	ཅི་སྟེ་མི་སྐྱེ། གང་
78. 2	དེ་ནི་མི་སྐྱེ་	དེ་ན་མི་སྐྱེ་
78.17	རྣམ་བར་	རྣམ་པར་
81. 3	ཚད་པར་ཐལ་	ཚད་པར་བརྟེན་རྣམ་པར་ཚད་ པ་ཐལ་
81.15-16	ཅི་ལྟར་	ཇི་ལྟར་
82.11	ལག་བ	ལག་པ་
83.13	རྣམས་ཀྱི། བར	རྣམས་ཀྱི་བར་
83.18	རྟོགས་ན་	རྟོག་ན་
85.19	བསྐྱེད་ན་	སྐྱེད་ན་
86.14	དེ་གཉིས་ཀྱི་	དེ་ཉིད་ཀྱི་
87. 5	ཤེས་པ་ནི་	ཤེས་པ་ལ་སོགས་པ་ནི་

XIX. Тибетскій переводъ сочиненій Saṃtānāntarasiddhi Dharmakīrti и Saṃtānāntarasiddhiṭīkā Vinītadeva вмѣстѣ съ тибетскимъ толкованіемъ, составленнымъ Агваномъ Дандаръ-Лхарамбой издалъ Ѳ. И. Щербатской. Fsc. I—II.

XX. Тибетскій переводъ Abhidharmakoçakārikāḥ и Abhidharmakoçabhāṣyam сочиненій Vasubandhu. Издалъ Ѳ. И. Щербатской. Fsc. I.

XXI. Sphuṭārthā Abhidharmakoçavyākhyā the work of Yaçomitra. Edited by Prof. S. Lévi and Prof. Th. Stcherbatsky (Ščerbatskoj). I Fsc.

Печатаются: Sous presse:

VII. Nyāyabindu и Nyāyabinduṭīkā (санскритскій текстъ). Изд. Ѳ. И. Щербатской. I Fsc.

VIII. Nyāyabindu и Nyāyabinduṭīkā (тибетскій переводъ). Изд. Ѳ. И. Щербатской. III Fsc.

XVI. Buddhapālita. Mūlamadhyamakavṛtti. Tibetische Übersetzung. Herausgegeben von M. Walleser. III Fsc.

XVII. В. В. Радловъ и С. Е. Маловъ. Сутра Золотого блеска (Suvarṇaprabhāsa). Уйгурская редакція. Fsc. IX.

XXI. Spuṭārthā Abhidharmakoçavyākhyā. Edited by Prof. U. Wogihara. Fsc. II.

Abhisamayālaṃkāraprajñāpāramitopadeçaçāstra (санскритскій и тибетскій тексты). Изд. Ѳ. И. Щербатской. I Fsc.

Б. Б. Барадійнъ. Описаніе статуи Майтреи въ Золотомъ храмѣ въ Лавранѣ. Переводъ съ тибетскаго.

Kāçyaparaparivarta. По хотанской рукописи Н. Ѳ. Петровскаго изд. баронъ А. А. фонъ Сталь-Гольстейнъ.

Приготовляются къ печати: En préparation:

Nyāyapraveça, съ комментаріемъ Haribhadra. Изд. Н. Д. Мироновъ.

Karuṇāpuṇḍarīka. Ed. by C. M. Ridding.

Pañcaviṃçatisāhasrikāprajñāpāramitāsūtra. Изд. Ѳ. И. Щербатской и Б. Б. Барадійнъ.

Kālacakratantra. Ed. Prof. A. Grünwedel.

Sādhanamālā. Изд. С. Ѳ. Ольденбургъ.

Saddharmalaṅkāvatāra. Изд. Ѳ. И. Щербатской.

Pañcarakṣā. Изд. С. Ѳ. Ольденбургъ.

BIBLIOTHECA BUDDHICA.

СОБРАНІЕ БУДДІЙСКИХЪ ТЕКСТОВЪ,

ИЗДАВАЕМЫХЪ РОССІЙСКОЙ АКАДЕМІЕЮ НАУКЪ

ПОДЪ РЕДАКЦІЕЮ АКАДЕМИКА С. Ѳ. ОЛЬДЕНБУРГА.

Изданы: Publiés:

I. Çikṣāsamuccaya. Ed. C. Bendall. Fsc. I—IV.

II. Rāṣṭrapālaparipṛcchā. Publ. par L. Finot. Fsc. I.

III. Avadānaçataka. Ed. J. S. Speyer. Vol. I (Fsc. I—IV). Vol. II (Fsc. I—IV).

IV. Madhyamakavṛtti. Publ. par L. de la Vallée Poussin. Fsc. I—VII.

V. Сборникъ 300 Бурхановъ. Изд. С. Ѳ. Ольденбургъ. Ч. I. Fsc. I.

VI. А. Грюнведель. Описаніе буддійскаго собранія кн. Э. Э. Ухтомскаго. Fsc. I—II.

VIII. Nyāyabindu и Nyāyabinduṭīkā (тибетскій переводъ). Изд. Ѳ. И. Щербатской. I—II Fsc.

IX. Madhyamakāvatāra par Candrakīrti (traduction tibétaine). Publ. par L. de la Vallée Poussin. Fsc. I—V.

X. Saddharmapuṇḍarīka. Ed. by Prof. H. Kern and Prof. Bunyiu Nanjio. Fsc. I—V.

XI. Nyāyabinduṭīkāṭippaṇī (толкованіе на сочиненіе Дармоттары Nyāyabinduṭīkā). Санскритскій текстъ съ примѣчаніями издалъ Ѳ. И. Щербатской. Fsc. I.

XII. Ṭišastvustik, ein in türkischer Sprache bearbeitetes Buddhistisches Sūtra. I. Transscription und Übersetzung von W. Radloff. II. Bemerkungen zu den Brāhmīglossen des Ṭišastvustik-Manuscripts (Mus. As. Kr. VII) von Baron A. von Staël-Holstein. Fsc. I.

XIII. Mahāvyutpatti. Издалъ И. П. Минаевъ. Второе изданіе, съ указателемъ. Приготовилъ къ печати Н. Д. Мироновъ. Fsc. I—III.

XIV. Kuan-ši-im Pusar. Eine türkische Übersetzung des XXV Kapitels der chinesischen Ausgabe des Saddharmapuṇḍarīka. Herausgegeben und übersetzt von W. Radloff. Fsc. I.

XV. Kien-ch'ui-fan-tsan (Gaṇḍīstotragāthā), сохранившійся въ китайской транскрипціи санскритскій гимнъ Açvaghoṣ'и. Издалъ и при помощи тибетскаго перевода объяснилъ бар. А. фонъ-Сталь-Гольстейнъ. Fsc. I—II.

XVI. Buddhapālita. Mūlamadhyamakavṛtti. Tibetische Übersetzung. Herausgegeben von M. Walleser. I—II Fsc.

XVII. В. В. Радловъ и С. Е. Маловъ. Сутра Золотого блеска (Suvarṇaprabhāsa). Уйгурская редакція. I—VIII Fsc.

XVIII. Tārānātha's Edelsteinmine, das Buch von den Vermittlern der sieben Inspirationen. Aus dem Tibetischen übersetzt von A. Grünwedel. Fsc. I—II.

См. на оборотѣ.